श्रीः

नारदीयशिक्षा

भट्टशोभाकरकृतविवरणेन, नारायणस्वामिदीक्षितकृत
प्रकाशाख्यटिप्पण्यान्वयेन च संवलिता तथा
नारदीयशिक्षासंग्रहयुता च

NĀRADĪYAŚIKṢĀ

With the Vivarana of Bhattasobhakar and
Prakash Comentry of Narayanaswamy Deekshita
&
Nāradīyaśikṣāsaṅgrahaḥ

Edited & Published
By

Dr. Girijaprasad Shadangi
Assistant Professor of Samaveda
Sri Venkateswara Vedic University
Tirupati

2014

नारदीयशिक्षा

(भट्टशोभाकरकृतविवरणेन, नारायणस्वामिदीक्षितकृत
प्रकाशाख्यटिप्पण्यान्वयेन च संवलिता तथा
नारदीयशिक्षासंग्रहयुता च)

NĀRADĪYAŚIKṢĀ

With the Vivarana of Bhattasobhakar and
Prakash Comentry of Narayanaswamy Deekshita
&
Nāradīyaśikṣāsaṅgrahaḥ

Edited & Published
By

Dr. Girijaprasad Shadangi, M.A, Ph.D
Assistant Professor of Samaveda
Sri Venkateswara Vedic University
Tirupati
2014

Published by
Dr Girijaprasad Shadangi
Sri Venkateswar vedic university
Alipiri Chandragiri by pass road
Tirupati, Andhrapradesh -517502
Email - gpshadangi@rediffmail.com
Mo- 9951051209

First Edition- 2014

Pages-19 +147=166

Copies- 500

Price Rs- 125.00

ISBN 978-93-5174-668-3

Printed by
C.N.PRINTERS
TIRUPATI-517502

विषयसूची

द्वितीयः प्रपाठकः

भूमिका

भारतीयवैदिकवाङ्मये षडङ्गेषु प्रथमतया शिक्षाशास्त्रस्य गणना भवति । उच्यते खलु शिक्षते अनया इति शिक्षा। वेदस्य स्वरूप, प्रयोग, अर्थ एवं रहस्यानां ज्ञानाय महर्षिभिः षडङ्गानि विरचितानि। एते तावत् अवबोधाय सोपान षटकम् । तत्तत् वेदशाखास्वर-वर्णोच्चारणमुद्दिश्य विभिन्नाः शिक्षाग्रन्थाः कालान्तरेण निरूपिताः। तत्स्वरूपतया इदानीं सामवेदस्य कृते शिक्षाचतुष्टयस्य प्रचलनं दरीदृश्यते। पाणिनीय, लोमशीय, गौतमीय, नारदीयश्चेति। पाणिनीय तु ऋग्वेदसम्बन्धं वहति । लोमशीय, गौतमीयशिक्षा यद्यपि सामवेद सम्बन्धिनौ परन्तु पाठपरम्परायां सामान्योपयोगः दृश्यते। परन्तु विशेषतया सामवेदिनः नारदीयशिक्षायाः अध्ययन अध्यापनपरम्परां अनुसरन्ति।

शिक्षायाः मुख्यविषयः-

शिक्षाग्रन्थस्य मुख्यविषयः वर्णोच्चारणप्रक्रियायाः विस्तृत प्रतिपादनम्। शास्त्रकाराणां मते वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा उच्यते। पाणिनीये तु शिक्ष्यतेऽनया वर्णोच्चारणमिति उक्तम्। इतोपि शिक्षा स्वरवर्णोच्चारकं शास्त्रम्, शिक्ष्यतेऽनया बालेभ्यो ह्रस्वदीर्घप्लुतोदात्ताऽनुदात्तस्वरितोरःकण्ठ शिरोजिह्वामूलदन्तनासौष्ठस्थानानि शिक्षा इति लक्षणत्वेन प्रतिपाद्यते।

मुख्यप्रयोजनः-

शिक्षाग्रन्थस्य मुख्यप्रयोजनः वेदमन्त्राणां स्पष्टतयोच्चारण-पद्धत्याः परिरक्षणम्। अनेन यज्ञयागादौ वेदमन्त्राणां शुद्धोच्चारण हेतु वेदाध्यायीनां योग्यतामभिवर्धयित्वा यज्ञात् यथोक्तफलप्राप्तिरूप स्वाधिकारस्य संबर्धनम्। उक्तं च-

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

लौकिकविद्यायाः अध्येतृणां कृते शिक्षाग्रन्थापि महदुपकाराय कल्प्यते। यतोहि तेषां सामान्य संस्कृतभाषा भाषा एवं उच्चारणपरम्परायाः उत्कृष्टतायाः कारणेन अपभ्रंशरहितः, स्पष्टोच्चारणेन युक्तः सन् यशः,ज्ञानं प्रतिष्ठाञ्च प्राप्नोति।

शिक्षाग्रन्थस्य उद्भवस्य मूलस्थानं वेदः। वेदेस्तावत् शिक्षायाः सिद्धान्तस्य निर्देशः उपलभ्यते। अतः वेदस्तावत् शिक्षाग्रन्थस्य मूलस्रोतमिति वक्तुं शक्यते। अथ शीक्षां व्याख्यास्यामः इत्यादि तैत्तिरीयाण्यकम् एतदर्थं प्रमाणम्। छान्दोग्योपनिषदि, मुण्डकोपनिषद्, गोपथब्राह्मणादिषु शिक्षासम्बन्धी नैकेपारिभाषिक शब्दाः उपलभ्यन्ते। भारतवर्षे शिक्षाग्रन्थस्य प्रचलनं अनादिकालादेव प्रवर्तमानत्वात् कदा कुत्र केन प्रणयनकृतादि प्रश्नानामुत्तरं दुर्भेद्यं अविदितञ्च।

पाणिनीयादि शिक्षाचतुष्टयानां सामान्यपरिचयः-

पाणिनीयशिक्षा

कर्ता "पाणिनिमहर्षिः"। पाणिनीयशिक्षायाः षष्टिपद्यात्मकपाठं सर्वविदितम्। एकादशखण्डात्मकः । आरम्भे "अचां व्यञ्जनानां व्यवस्था क्रियते"। अक्षराणां बुद्धिमनस्संयोगेन आविर्भावः मन्द्र मध्य तार स्थायि त्रयस्य उत्पत्तिस्थानं उदात्तादिस्वरेभ्यः निषादादयः उत्पद्यन्ते। अक्षराणां उच्चारणहेतुभूतानि स्थानानि अष्टौ। अक्षरोच्चारणप्रकारः यथा व्याघ्री स्वापत्यस्य नयनानयनकाले स्वदंष्ट्राभिः नात्यन्तकाठिन्यमार्दवाभ्यां संगृह्य नयति तथोच्चारणं कर्तव्यमिति ज्ञापनम्। वेदपाठकानां षड्गुणाः दोषाश्चेति कथनं,

वेदपुरुषस्य छन्दः पादौ, कल्पसूत्राणि हस्तौ, ज्योतिषश्शास्त्रं नेत्रं, निरुक्तं श्रोत्रं, शिक्षा घ्राणं, व्याकरणं मुखम्, उदात्तादयः हस्तरेखासु हस्तविन्यासेन दर्शनीयाः अन्यथा दोषः। वेद पारायणेन पापानि नश्यन्ति पुण्यानि वर्धन्ते इत्यादयो नैका विषयाः प्रदर्श्यन्ते।

"अथशिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।
शास्त्रानुपूर्वं तद्विद्यात् यथोक्तं लोकवेदयोः।"

इत्यारभ्य

त्रिणनयमभिमुखनिस्सृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः। स भवति धनधान्यपशुपुत्र कीर्तिमान् अतुलं च सुखं समश्नुते दिवि।। इति समाप्यते।

गौतमीयशिक्षा

अस्य शिक्षायाः कर्ता गौतमः। अत्यन्तप्राचीनशिक्षारूपेण प्रसिद्धिः। सामवेदस्य गौतमीयशाखायाः प्रातिशाख्यरूपेण उद्धृतः प्रतीयते। अत्र सामवेदस्वरविषयाणां वर्णनामधिकृत्य सामवेदीय-शिक्षामिति अवगम्यते। अस्यां शिक्षायां अक्षराणां संयोगे कीदृशो विकारः कति व्यञ्जनानि एकस्मिन् अक्षरे संयोक्तुं शक्यन्ते इत्यादयो विचार्यन्ते। अस्यास्संयोगश्रृङ्खलेति नामान्तरमस्ति। द्वे प्रपाठके षोडशखण्डाश्च सन्ति।

अत्र त्रयस्त्रिंशद्व्यञ्जनानि इत्यारम्भः। व्यञ्जनानि त्रयस्त्रिंशत्। कादयः मावसानाः स्पर्शाः। यकारादयः चत्वारः अन्तस्थाः। शकारादयः चत्वारः ऊष्माणः। एतेषां एकत्रयोगे संयुक्ताक्षरं भवति तत्र प्रथमस्थ द्वित्वं भवति। यथा अग्न आयाहीत्यत्र गकारस्य द्वित्वम्। वर्गद्वितीयचतुर्थाक्षराणां रेफहकारयोश्च द्वित्वं नास्ति। वर्गद्वितीयस्य द्वित्वस्थले पूर्वं वर्गप्रथमाक्षरं, चतुर्थस्य तृतीयाक्षरं च क्रमेण श्रूयते।

यथा वेत्थाहि, भरामेध्मम् इत्यादौ। रेफहकारयोः परमक्षरं द्विर्भवति। अर्क्कोदेवानां, ब्रह्मजज्ञानम् इत्यादौ अथ द्व्यक्षरयोस्संयोगः।

शन्नोदेवीः, उन्नयामि अत्र यथासंख्यम्, न् न् ओ, न् न् अ इति नकारद्धययोगः। त्र्यक्षरयोगः आक्रन्दय न् न् द् अ नकारद्धयं दकारश्च। चतुरक्षराणाम्। अग्न आयाहि, ग् ग् यम न् अ। अत्र गकारद्धयं नकारः, गकारतकारयोर्मध्ये यम इत्यक्षरमेकं विद्यते। तच्च निस्वरुपम्। अशरीरं यमं विद्यात् इत्युक्तेः। अनन्त्यान्त्यसंयोगे मध्ये यमो नाम कश्चिद्वर्णविषयः अस्तीति ज्ञेयम्। अत्र गकारः अनन्त्यः नकारः अन्त्यः तयोर्योगे मध्ये यमो वर्तते वर्णक्रमोच्चारणसमये तस्य विवरणं भवेत्। पञ्चाक्षराणाम्। विश्वप्स्न्या इति प् प् स् न् य् आ एवं अग्नेयुङ्क्ष्वा ङ् ङ् क् ष् व् आ। षडक्षराणामुदाहरणम् तत्र कात्स्न्र्या। र् त् त् स् न् य् आ एवं सप्ताक्षराणामपि उदाहरणं शाखान्तरे दृश्यते। इत्थमक्षरपरिज्ञानात् सुष्टु प्रयोगो भवति। संयुक्ताक्षराणि त्रिधा विभक्तानि, अयस्पिण्डः, दारुपिण्डः, ऊर्णापिण्डः इति । यमयुक्तः अयस्पिण्डः, अन्तस्थयुक्तः दारुपिण्डः। यमान्तस्थरहितः ऊर्णापिण्डः एवं निरूप्य-

"एषा सहस्रवर्त्मात्मा नाना वृत्तिविभूषिता।
संयोगश्रृङ्खलानाम सामवेदनिबन्धनात्।।"

इति ग्रन्थः समाप्यते। अस्य व्याख्या नोपलभ्यते।

लोमशीयशिक्षा

लोमशीयशिक्षा गर्गाचार्येण विरचितम्। अस्यां शिक्षायां कम्पस्वरस्य निरुपणं, उदात्तादिस्वराणां निरुपणोपायवर्णनं, व्यञ्जनद्वित्वविचारः, संहिताकाले वर्णानामुच्चारणे भेदाऽभेदविचारः, नादवर्णव्यवस्था, हकारस्य स्थानविशेषविचारः, रेफस्वरभक्तिः, ऋवर्ण एवं रेफस्वरभक्तौ अकारस्य उच्चारणसदृश उच्चारणस्य कथनं, सामगाने श्वासोच्छासप्रक्रियायाः नियमः, अनुस्वारस्य मात्राकालः,

यकार वकारयोः पूर्वस्वराङ्गता तथा परस्वराङ्गतायाः विचारः, हकारस्य एवं शषसकारस्य द्वित्वव्यवस्था, मात्रापरिभाषा इत्यादि विषयाः प्रतिपादिताः। ग्रन्थोऽयं 8 खण्डात्मकं एवं 73 श्लोकात्मकम्। ग्रन्थोयं-

"लोमशीयशिक्षा प्रवक्ष्यामि गर्गाचार्येण चिन्तिताम्।
साभिधानां यथोक्तान्तु आचार्य वचनं यथा।"

इत्यारम्भः

"शून्यगृहे पिशाचस्तु गर्जते न च दृश्यते।
एवं यकारा वक्तव्याधियग्निर्ज्म निदर्शनम्।।" इति समाप्यते।

नारदीयशिक्षा

अस्य शिक्षायाः कर्ता नारद इति। नारदेन प्रणीयत्वादस्य नारदीयशिक्षेति नाम। सामवेदीयं शिक्षा। कस्य शाखामधिकृत्य विद्यतेति निश्चयं न विद्यते। तथापि सामवेदस्य कौथुमराणायनीयाः विशेषरूपेण उपयुज्यन्ते। भट्टशोभाकरो अस्या व्याख्याता। प्रपाठकद्वयं षोडशखण्डाः चत्वारिंशदुत्तरद्धिशतश्लोकाश्चात्र सन्ति। परन्त्वत्र पाठभेदेनोपलभ्यमानं त्रिचत्वारिंशदुत्तरद्धिशतश्लोकानां सम्पादनं कृतास्ति।

"अथातः स्वरशास्त्राणां सर्वेषां वेदनिश्चयम्।
उच्चनीच विशेषाद्धि स्वरान्यत्वं प्रपद्यते।।" इत्यारम्भः

स्वरस्त्रिविधः, आर्चिकसामिकगाथिकभेदात्। स्वरादिवैगुण्ये विपरीतफलस्य श्रुतत्वात् तत्र अवधानमावश्यकम्। मन्द्रमध्यम-ताराणां स्थानभेदः। कुत्र कानि व्यज्यन्ते। ऋग्वेदे कीदृशः आह्वारकाः स्वराः के ? छन्दोगवाजसनेयिनोः ब्राह्मणस्वरः। ताण्डिभाल्लविनां स्वराः, एते प्रतिपाद्यन्ते प्रथमे खण्डे। सप्तस्वराः, त्रयो ग्रामाः

एकविंशतिर्मूर्च्छनाः । तेषां विवरणम्, मूर्छनानां नामानि उत्पत्तिः षड्जादिना केषां प्रीतिः इत्यादयो द्वितीये। रक्तं पूर्णमित्यादयो गानगुणा दश तेषां लक्षणानि। गानदोषाश्चतुर्दश। तेषां लक्षणानि च तृतीये। षड्जादीनां स्वराणां वर्णः पद्मपत्रनिभष्षड्जः, इत्यादिना स्वरसन्निवेशेन सामगानमनन्तप्रभेदं भवति। तथा ग्रामभेदोऽपि इत्यादयो विशेषाश्चतुर्थे।

वैदिकलौकिकगानयोः स्वरवैलक्षण्यम् यस्सामगानां प्रथमस्स वेणोर्मध्यमः स्वरः इत्यादिना। षड्जादीनां उर आदि स्थान विशेषादुत्पत्तिः, षड्जादीनां अग्न्यादिदेवताकत्वचिन्तनमावश्यकं, गान्धारादि स्वरश्रवणेन गवादीनां प्रीतिर्भवति, निषादादिशब्द निर्वचनं च क्रियते पञ्चमे। गानसाधनं वीणाद्वयं तत्र दारुमयी वीणा लौकिकगानस्य, शरीरमेव वीणा वैदिकस्य । हस्तसन्निवेशप्रकारः। प्रणवव्याहृतिसावित्र्यनुवचनपूर्वक स्वाध्यायाभ्यासः, अङ्गुल्या स्वर निर्देशः मात्रागणनं सव्येन, शरीरचेष्टाराहित्येन गानं हस्तसन्निवेश-मुखोच्चारणयोस्समकालिकत्वम्। स्वरच्युतौ दोषः द्रुतमध्यमवि-लम्बितभेदेन वृत्तिस्त्रिविधा। तस्य उपयोगकालः, एवं शिक्षाशिक्षित एवाध्यापयितुं शक्त इत्यादि षष्ठे प्रतिपाद्यते।

क्रुष्टादिस्वराणां मूर्धादिस्थानादुत्पत्तिः, अङ्गुष्ठाद्यङ्गुलिविशेषेण स्वरसन्निवेशप्रकारः, देवमानुषपशुगन्धर्वादयः सप्त, क्रुष्टाद्यैस्स्वरै-रुपजीव्यन्त इत्यादिः । दीप्ताऽऽयताकरुणानां ज्ञापनायाऽङ्गुलि-सन्निवेशप्रकारः, तेषां उच्चनीचत्वादि विशेषश्च प्रतिपाद्यते सप्तमे। अष्टमे, आर्चिकस्वरत्रयं, स्वरितप्रचययोस्स्वरुपं, स्वरितस्य साप्तिविद्ध्यं, वैस्वर्यलक्षणमित्यादयः प्रतिपाद्यन्ते। सप्तविध-स्वरितस्य पृथग्लक्षणं, कम्पलक्षणं चोच्यते नवमे। ह्रस्वदीर्घभेदेन कम्पो द्विविधः, शिवकोदात्तलक्षणं, व्यञ्जनानां द्वित्वविधिः, तस्याप-वादः, यमाख्यस्य वर्णविशेषस्य लक्षणं, अनुस्वारोपध्मामूलीयानां

लक्षणं, तेषां पूर्वाङ्गत्वपराङ्गत्वनिर्णयः इत्यादयो विचार्यन्ते दशमे। पदकाले उदात्तादीनां स्वरान्तरत्वप्राप्तिः, मात्राद्विमात्रादीनां, कालनिर्णयः, प्राणिध्वनिसादृश्येन, अवग्रहलक्षणमित्यादयः, प्रतिपाद्यन्ते एकादशे। चतसृणां विवृत्तीनां लक्षणं, तासां मात्राकालः, अनुस्वारलक्षणं, रङ्गलक्षणं, रङ्गोच्चारणप्रकारः, इत्यादयोद्वादशे निरूप्यन्ते। स्वराणामुदात्तादीनां स्वरानुवर्तित्वम्। अष्टविधा गतिः, सन्ध्यलक्षणं, तस्य विकारः, इत्यादिः त्रयोदशे। स्वरभक्तिलक्षणमुच्यते चतुर्दशे। पथ्यालक्षणं पदपाठे आद्युदात्ताद्यष्टविधस्वरलक्षणं, पञ्चविधमाचार्यलक्षणं, तत्र प्रतिज्ञायाः प्राबल्यं, स्वरसौक्ष्म्यस्य तुम्बुरुनारदादिभिरप्यविज्ञेयत्वमुक्तं पञ्चदशे। गानप्रागल्भ्याय शरीरारोग्यसाधनं, अभ्यव्यवहारादिकं, प्राणोपरोधस्वरोनोपयोक्तव्यः, सदाचार्यादभ्यासः, वेदोच्चारणसमये मुखसन्निवेशप्रकारः, विद्यादाने अपात्रनिरूपणं, विद्यार्थिभिरभ्यसनीयागुणविशेषाः, गुरुशुश्रूषाया आवश्यकत्वं च प्रतिपाद्यते अन्तिमे।

"एवं वर्णाः प्रयोक्तव्याः नाव्यक्ता न च पीडिताः।
सम्यक् वर्ण प्रयोगेण ब्रह्मलोके महीयते।"

इति समाप्यते। नारदीयशिक्षाविषये हरदत्तेन विरचित सामवेदसर्वानुक्रमण्युच्यते-

प्रपाठकौ द्वौ शिक्षायां नारदस्य तु शैक्षकम्।
खण्डाश्च षोडश प्रोक्ता अष्टावष्टौ प्रपाठयोः।।
श्लोकेन पञ्चत्रिंशेन समं द्विशतसंख्यकम्।
अथातः स्वरशास्त्राणां यवकारं समं विदुः।।
भट्टशोभाकरेणोक्तमिदं ग्रन्थस्य विवृतम्।।

अनेन आधारेण नारदीयशिक्षायाः विवरणकर्ता भट्टशोभाकरः इति प्रमाणीक्रियते। तदुपरि श्री नारायणस्वामीदीक्षितेन भट्टशोभाकर-विवरणस्य, प्रकाशाख्या टिप्पणी रचिता वर्तते।

नारदीयशिक्षास्थ पारिभाषिकशब्दावली-

१. अक्षरम्- न क्षरति न क्षीयते वा (निरक्तपरिशिष्टे -1.13)
२. उदात्तः- उत् आत्तः उदात्तः उच्चः स्वरः। उच्चैरुदात्तः (पा.व्या. भा.1.1.9)
३. अनुदात्तः-उदात्तविपरीतः स्वरः अधस्ताद् गृहीतः (पाणिनीय-शिक्षा पञ्जिका.श्लो.11)
४. अनुनासिकः-मुखनासिकावचनोऽनुनासिकः(पाणिनिः1.1.8
५. अनुस्वारः-स्वरमनु भवतीत्यनुस्वारः, अनु अकारानुगमेना-ऽनुस्वारः (पाणिनीयशिक्षा पञ्जिका.श्लो.4,5)
६. अन्तस्थाः- स्पर्शोष्मणामन्तर्मध्ये तिष्ठन्तीति अन्तः स्थाः (ऋग्प्राति व्या.1.9)
७. जिह्वामूलीयः- जिह्वामूले भवो वर्णः।
८. अयोगवाहाः- न विद्यते योगः संयोगो वर्णान्तरेण येषां ते अयोगवाहाः (पाणिनीयशिक्षापञ्जिका श्लो.22)
९. आस्यम्- अस्यन्ति वर्णाननेनेति आस्यम् (पा.व्या.भा.1.1.9) आस्य मस्यते आ स्यन्दत एतदन्नम् इति वा (निरुक्ते 1.3.4)
१०. उपध्मानीयः- उश्च पश्च ध्मायेते अनेन, तत्र भव इति योगेन उपध्मानीयस्यौष्ठ्यत्वम्। (लघुशब्देन्दुशेखरः)
११. उपांशु- यत् समीपस्थोऽपि परो न श्रृणोति तदुपांशु (मनुस्मृति भा- 2.85)
१२. ऊष्मा- ऊष्मा वायुः, तत्प्रधाना वर्णा ऊष्माणः (ऋग्वेद प्रातिशाख्यभाष्ये 1.10)

१३. करणम्- स्वराणां यत्रोपसंहारस्तत्स्थानम्, यदुपसंहरति तत्करणम्, अन्येषां तु यत्र स्पर्शस्तत्स्थानम्, येन स्पर्शयति तत्करणम् (तैत्तिरीयप्रातिशाख्ये 2.31-34)

१४. तारः- उच्चविशेषः।

१५. दीर्घः- ह्रस्वं मात्रा, द्वे दीर्घः, प्लुतं वृद्धं चेति मात्रामभिधीयते (मात्रालक्षणम्-1-3),मात्रा ह्रस्वः, द्वे दीर्घः, तिस्रः प्लुत उच्यते स्वरः (ऋग्वेदप्रातिशाख्यः 1.27-30), द्विस्तावान् दीर्घः (शुक्लयजुर्वेद प्रातिशाख्ये 1.57)

१६. दुःस्पृष्टः- दुस्स्पृष्टमन्तस्थानाम् (ऋक्तन्त्रे 1.3), द्विः स्पृष्टता च विज्ञेया डढयोः स्वरमध्ययोः। पदकाले वियुज्येत द्विः स्पृष्टो न भवेत् तदा (वर्णरत्नप्रदीपिका.श्लो 15-16)

१७. नादः- यदा कण्ठबिलं संवृतं भवति तदा नादो जायते (आपिशलीयशिक्षा),

१८. नासिक्यः- हुँ इति नासिक्यः (शुक्लयजुर्वेदप्रातिशाख्ये 8.23)

१९. पार्षदम्- पदप्रकृतीनि सर्वचरणानां पार्षदानि (निरुक्ते 1.6.1) शास्त्रविशेषाध्यायिनां समवायः परिषत् पर्षद्वा तत्र भवा कृतिः इति उद्योते(वार्तिक 4) नागोजिभट्टः।

२०. प्रातिशाख्यम्- शाखायां शाखायां प्रतिशाखम्, प्रतिशाखं भवं प्रातिशाख्यम् (अष्टाध्यायी 2.1.6) तत्तच्छाखासम्बन्धं वर्ण स्वर मात्रा बल साम सन्तानप्रतिपादकं शास्त्रम्।

२१. प्लुतः- ह्रस्वं द्विमात्रा संयुक्तं प्लुतमाहुर्मनीषिणः। दीर्घं तु मात्रासंयोगाद् वृद्धमित्यभिधीयते (मात्रालक्षणम्-1.4)

२२. मन्द्रः- मन्द्रं मन्दनं मोदनं वा (यास्कः 6.5.1) मधुरगम्भीरः स्वरः।

२३. यमः- यच्छन्तीति यमाः, स्वयमेवोपरमेरन् , के ते यमाः, लोके कुं खुं गुं घुं इति (पञ्जिकायाम् श्लो.4-5) यम्यन्ते मुखभवश्रुति-यमनेन निर्वर्त्यन्ते इति यमा वर्णविशेषाः।

२४. योगवाहः- योगेन स्वपूर्वस्थेन स्वोत्तरस्थेन वा स्वरेण युक्ता वहन्ति व्यवहारं निर्वर्तयन्तीति योगवाहाः ककारादयो हकारान्ता व्यञ्जनवर्णाः। (ऋक्तन्त्रम्)

२५. रक्तः- अनुनासिकः स्वरः।

२६. रङ्गः- नासिकास्थाने एवोच्चारणीयः पूर्वस्वरप्रान्तभागे ऐकारे इकार इव औकारे उकार इव च संलग्नो वेदेषु उपलभ्यमानो वर्णः। रङ्गः............नारदीयशिक्षा (2.4.6-10)

२७. वर्णः- मनुष्यस्य वाण्याः पृथक्प्रयत्नजाभ्यां भागाभ्यां तादृशैर्भागैर्वाऽपि रहितः स्वतन्त्रेण यत्नेन निर्वत्यः शब्दविशेषो वर्णः। ध्वनेः स्वरूपविशेषो हि वर्णः । वर्णो वृणोतेः (यास्कः 2.1.3)

२८. वर्णसमाम्नायः- वर्णसमुदायोपदेशः। अक्षरसमूहः।

२९. विवृत्तिः- विवेकेन पृथक्भावेन वर्तते इति विवृत्तिः । विशेषेण वृत्तिः विवृत्तिः। पदान्ते पदमध्ये वा स्थिते स्वरपरके स्वरे स्थानकरणविमोक्षसहितो विरामो विवृत्तिः।

३०. विसर्गः- श्वासस्य विनाऽवरोधं बहिर्विसर्जनेनोच्चारणीयः श्वासमयो वर्णविशेषो हि विसर्गः। विविधं सृज्यते इति विसर्गः (पाणिनीय शिक्षा भाष्ये- 4.5)

३१. विसर्जनीयः- विसर्ग एव विसर्जनीय उच्यते।

३२. वृत्तिः- येनि गतिविशेषेण वाग् वर्तते सा वृत्तिः। वृत्तिश्च त्रिधा द्रुता मध्यमा विलम्बेति।

३३. व्यञ्जनम्- व्यञ्जयन्ति प्रकटान् कुर्वन्त्यर्थानिति व्यञ्जनम् (ऋक्प्रातिशाख्यम्- 1.6), स्वरात्प्राक्पश्चाद्वा गत्वा स्वरेण सहाऽक्षराङ्गत्वं गच्छन्तो वर्णा व्यञ्जनानि।

३४. शिक्षा- वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा (ऋग्वेदभाष्यभूमिकायाम्)। शिक्ष्यतेऽनया बालेभ्यो ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितोरः कण्ठशिरोजिह्वामूल-दन्तनासौष्ठस्थानानि सा शिक्षा (पाणिनीयशिक्षा भाष्ये श्लो.1), शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम् ।

३५. संहिता- परः सन्निकर्षो संहिता।

३६. सन्धिः- वर्णयोर्वर्णलोपागमविकारप्रकृतिभावान्यतमफलकः परः सन्निकर्षः संहिता।

३७. साम- सामशब्देन साम्यमुक्तम्। अतिद्रुतातिविलम्बित-गीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यम्। (ऋग्वेदभाष्यभूमिकायाम्)

३८. स्थानम्- स्वराणां यत्रोपसंहारस्तत्स्थानम्, अन्येषां तु यत्र स्पर्शनं तत्स्थानमिति (तैत्तरीयप्रातिशाख्ये-2.31,33) तिष्ठन्तीति स्थानम्। फुस्फुसात् निर्गतः प्राणो यान्देशान् प्रतिहत्य वर्णी भवति ते देशा वर्णानां स्थानान्युच्यन्ते।

३९. स्पर्शः- जिह्वामूलतालुमूर्धदन्तोष्ठादिभिः परस्परं स्पर्शैरभि-निष्पत्याऽविर्भवन्तीति स्पर्शाः (पाणिनीयशिक्षा पञ्जिका श्लो.4-5), स्पृष्टप्रयत्नजन्यत्वात् स्पर्शा इत्याख्यायन्ते

४०. स्पृष्टम्-वर्णोच्चारणे तत्तत्स्थाने तत्तत्करणेन स्पर्शनं स्पृष्टम्।

४१. स्वरः-स्वयं राजन्त इति स्वराः (पाणिनीव्याकरणम् श्लो.4-5) स्वर्यन्ते नान्येन व्यज्यन्त इति स्वराः (ऋग्वेदप्रातिशाख्य भाष्ये 1.3)

४२. स्वरितः-स्वरतीति स्वरित। स्वर्यते पार्श्वत उत्क्षिप्यते इति स्वरितः (तैत्तरीयप्रातिशाख्यभाष्य.1.40)

नारदीयशिक्षायाः संस्करणानि-

1. सत्यव्रतसामश्रमीमहोदयेन कोलकत्तानगरीतः 1890तमे वर्षे भट्टशोभाकरकृतविवरणेन सह सम्पाद्य प्रकाशितम्।

2. पण्डितदत्तात्रेयशास्त्रिणा गान्धर्वमहाविद्यालयः, लाहौरतः भाषाटीकासमेतः 1909 तमे प्रकाशितम्।

3.. श्रीपीताम्बरपीठसंस्कृतपरिषद्, वनखण्डेश्वर,दतिया,मध्यप्रदेश 1964, पण्डित सुधाकरशुक्ला महोदयेन भट्टशोभाकरविरचिता शिक्षाविवरणोपेता टीकासहितेन सम्पाद्य प्रकाशितम्।

4. भाण्डारकर प्राच्यविद्यासंशोधनमन्दिर, पुणे तः 1986 तमे वर्षे भट्टशोभाकरव्याख्यायुता, आग्लभाषानुवादेन टिप्पणीभिश्चसहिता प्रकाशिता।

5. नारायणस्वामिदीक्षितेन मैसूरतः भट्टशोभाकरविवरणेन एवं स्वयं कृत प्रकाशाख्यटिप्पण्या 1949 तमे वर्षे पत्रिकायां प्रकाशितम्।

6. चौखम्बा विद्याभवन, वारणासीतः शिवराज आचार्यः कौण्डिन्न्यायेन शिक्षाविवेचन्याख्यया संस्कृतव्याख्यया नारायणाख्यया हिन्दीव्याख्यया विविधैः परिशिष्टैश्च सहित 2008 तमे वर्षे प्रकाशितम्।

प्रस्तुतसंस्करणस्यावश्यकता-

नारदीयशिक्षायाः भट्टशोभाकरकृत विवरणं तथा श्रीनारायणस्वामीदीक्षितकृत प्रकाशाख्याटिप्पणी यद्यपि पूर्वे प्रकाशिताः परन्त्विदानीं नोपलभ्यते। अनेन संस्करणमाध्यमेन श्लोकानां अन्वयं, विवरणं, प्रकाशाख्य टिप्पणी एव प्रदत्तम्। अनेन


साकं दुरुहपारिभाषिकशब्दानां दुर्बोध्यता निराकरणार्थं अर्थसहितपारिभाषिकशब्दावली सङ्कलिता वर्तते। ग्रन्थेस्मिन् 243 श्लोकानां सङ्कलनमपि विशेषतया प्रदत्तम्। दतिया संस्कराणात् गुरुशुश्रुषया पद्यं स्वीकृतम्। नारदीयशिक्षासंग्रहाख्यं ग्रन्थमपि अर्थसौकर्याय स्थापितम्। दक्षिणभारतीयपरम्परायां भट्टशोभाकरस्य व्याख्या एव पठनपाठनपरम्परायां विद्यते। अनेन प्रकाशनेन तस्य परम्परायाः पुनरुज्जीवनमेव मुख्यावश्यकता भवितुमर्हति।

उपसंहारः-

भारतीयवैदिकसंस्कृतवाङ्मयस्याभिन्नाङ्गरुपा नारदीय-शिक्षायाः प्रकाशनं, शिक्षायाः उज्वलपरम्परायाः प्रचारप्रसाराय तथा छात्राणामुपकाराय भविष्यतीति आशास्महे।ग्रन्थस्यास्य प्रकाशनरूपः ममायं प्रयत्नः गुरुपरम्परया प्राप्तस्य विद्यासम्प्रदायक्रमस्य रक्षणार्थं च भवतीति भावयामि। ग्रन्थस्यास्य प्रकाशने सश्रद्धं सोत्साहं च मुद्रापितवद्भ्यः तिरुपतिस्थ सि.एन् प्रिण्टर्स मुद्रणालयं कृतज्ञतां निवेदयामि। ग्रन्थस्यास्य सङ्कलनं यद्यपि जागरुकतया कृतं तथापि ममाज्ञानवशात् भ्रमवशाच्च दोषाः स्युः। दोषज्ञैः गुणैकपक्षपातिभिः विद्वद्भिः दोषान् परिष्कृत्य अधीतं चेत् अहमनुगृहीतो भवेयमिति भावये।

तिरुपति
25.09.2014

बुधजनवशंवदः
गिरिजाप्रसाद षडङ्गी



नारदीयशिक्षा

(मूलपाठः)

(1.1)

प्रथमा कण्डिका

1. अथाऽतः स्वरशास्त्राणां सर्वेषां वेद निश्चयम्।
उच्चनीचविशेषाद्धि स्वराऽन्यत्वं प्रवर्तते।।1।।

2. आर्च्चिकं गाथिकं चैव सामिकं च स्वरान्तरम्।
कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः।।2।।

3. एकान्तरः स्वरो ह्यृक्षु गाथासु द्व्यन्तरः स्वरः।
सामसु त्र्यन्तरं विद्यादेतावत्स्वरतोऽन्तरम्।।3।।

4. ऋक्सामयजुरङ्गानि ये यज्ञेषु प्रयुञ्जते।
अविज्ञानाद्धि शास्त्राणां तेषां भवति विस्वरः।।4।।

5. मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।5।।

6. प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते।
यज्ञेषु यजमानस्य रुशत्यायुः प्रजां पशून्।।6।।

7. उरः कण्ठशिरश्चैव स्थानानि त्रीणि वाङ्मये।
सवनान्याहुरेतानि साम्नश्चाप्यधरोत्तरे ।।7।।

8. उरस्सप्तविचारं स्यात् तथा कण्ठस्तथा शिरः।
न च सप्तोरसि व्यक्तास्तथा प्रावचनो विधिः।।8।।

9. कठकालापवृत्तेषु तैत्तिरीयाऽऽह्वरकेषु च।
ऋग्वेदे सामवेदे च वक्तव्यः प्रथमः स्वरः।।9।।

10. ऋग्वेदस्तु द्वितीयेन तृतीयेन च वर्तते।
उच्चमध्यमसङ्घातः स्वरो भवति पार्थिवः।।10।।

11. तृतीयप्रथमकृष्टान् कुर्वन्त्याह्वरकाः स्वरान्।
द्वितीयाद्यांस्तु मन्द्रान्तांस्तैत्तिरीयाश्चतुरः स्वरान्।।11।।

12. प्रथमश्च द्वितीयश्च तृतीयोऽथ चतुर्थकः।
मन्द्रः क्रुष्टोऽह्यतिस्वार एतान् कुर्वन्ति सामगाः।।12।।

13. द्वितीयप्रथमावेतौ ताण्डिभाल्लविनां स्वरौ।
तथा शातपथावेतौ स्वरौ वाजसनेयिनाम्।।13।।

14. एते विशेषतः प्रोक्ताः स्वरा वै सार्ववैदिकाः।
इत्येतच्चरितं सर्वं स्वराणां सार्ववैदिकम्।।14।।

(1.2)
द्वितीया कण्डिका

15. सामवेदे तु वक्ष्यामि स्वराणां चरितं यथा।
अल्पग्रन्थं प्रभूतार्थं श्रव्यं वेदाङ्गमुत्तमम्।।1।।

16. तान राग स्वर ग्राम मूर्च्छनानान्तु लक्षणम्।
पवित्रं पावनं पुण्यं नारदेन प्रकीर्तितम्।।2।।

17. शिक्षामाहुर्द्विजातीनामृग्यजुस्सामलक्षणम्।
नारदीयमशेषेण निरुक्तमनुपूर्वशः।।3।।

18. सप्तस्वरास्त्रयोग्रामाः मूर्च्छनास्त्वेकविंशतिः।
तान एकोनपञ्चाशदित्येतत्स्वरमण्डलम्।।4।।

19. षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा।
पञ्चमो धैवतश्चैव निषादः सप्तमस्वरः।।5।।

20. षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्तिताः।
भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः।।6।।

21. स्वर्गान्नाऽन्यत्र गान्धारो नारदस्य मतं यथा।।
स्वररागविशेषेण ग्रामरागा इति स्मृताः।।7।।

22. विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश।
तानान्पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान्।।8।।

23. नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा।
बला या चाऽथ विज्ञेया देवानां सप्तमूर्च्छनाः।।9।।

24. आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी।
मैत्री च बार्हती चैव पितृणां सप्तमूर्च्छनाः।।10।।

25. षड्जेतूत्तरमन्द्रास्यादृषभे चाऽभिरुद्गता।
अश्वक्रान्ता तु गान्धारे तृतीया मूर्च्छना स्मृता।।11।।

26. मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे।
धैवते चाऽपि विज्ञेया मूर्च्छना तूत्तरायता।।12।।

27. निषादाद्रजनीं विद्यात् ऋषीणां सप्तमूर्च्छनाः।
उपजीवन्ति गन्धर्वा देवानां सप्तमूर्च्छनाः।।13।।

28. पितृणां मूर्च्छनास्सप्त तथा यक्षा न संशयः।
ऋषीणां मूर्च्छनास्सप्त यास्त्विमा लौकिकाः स्मृताः।।14।।

29. षड्जः प्रीणाति वै देवानृषीन् प्रीणाति चर्षभः।
पितॄन् प्रीणाति गान्धारो गन्धर्वान् मध्यमः स्वरः।।15।।

30. देवान् पितॄन् ऋषींश्चैव स्वरः प्रीणाति पञ्चमः।
यक्षान्निषादः प्रीणाति भूतग्रामञ्च धैवतः।।16।।

(1.3)

तृतीया कण्डिका

गानस्य तु दशविधा गुणवृत्तिः। तद्यथा

31. रक्तं पूर्णं अलङ्कृतं प्रसन्नं व्यक्तं विक्रुष्टं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणाः।।1।।

32. तत्र रक्तन्नाम वेणुवीणास्वराणामेकीभावे रक्तमित्युच्यते।।2

33. पूर्णन्नाम स्वरश्रुतिपूरणात् छन्दःपादाक्षरसंयोगात् पूर्णम् इत्युच्यते ।।3।।

34. अलङ्कृतन्नाम उरसि शिरसि कण्ठयुक्तमलङ्कृतमित्युच्यते।।4

35. प्रसन्नन्नाम अपगतगद्गदं निर्विशङ्कं प्रसन्नमित्युच्यते।।5।।

36. व्यक्तन्नाम पदपदार्थ-प्रकृति-विकाराऽगम-लोपकृत्तद्धित-
समास-धातु-निपातोपसर्ग-स्वर-लिङ्ग-वृत्ति-वार्तिक-
विभक्त्यर्थ-वचनानां सम्यगुपपादने व्यक्तमित्युच्यते।।6।।

37.विक्रुष्टन्नामोच्चैरुच्चारितं व्यक्तपदाक्षरं विक्रुष्टमित्युच्यते।।

38. श्लक्ष्णन्नामाद्रुतमविलम्बितमुच्चनीचप्लुतसमाहारं (हे)लय-
तालोपनयादिभिरुपपादनादिभिः श्लक्ष्णमित्युच्यते।।8।।

39. समन्नाम आवाप-निर्वाप-प्रदेश-प्रत्यन्तर-स्थानानां समासः
सममित्युच्यते ।।9।।

40. सुकुमारन्नाम मृदुपदवर्णस्वरकुहरणयुक्तं सुकुमारम्-
इत्युच्यते।।10।।

41. मधुरन्नाम स्वभावोपनीतललितपदाक्षरगुणसमृद्धम्मधुरम्
इत्युच्यते ।।11।।

42. शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसिगतं तथा स्थानविवर्जितम्।।12।।

43. विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्।
व्याकुलन्तालहीनञ्च गीतिदोषाश्चतुर्दश।।13।।

44. आचार्यास्सममिच्छन्ति पदच्छेदन्तु पण्डिताः।
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः।।14।।

(1.4)

चतुर्थी कण्डिका

45. पद्मपत्रप्रभष्षड्ज ऋषभश्शुकपिञ्जरः।
कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः।।1।।

46. पञ्चमस्तु भवेत्कृष्णः पीतकं धैवतं विदुः।
निषादस्सर्ववर्णश्च इत्येतत्स्वरवर्णता।।2।।

47. पञ्चमो मध्यमः षड्जः इत्येते ब्राह्मणाः स्मृताः।
ऋषभो धैवतश्चापि इत्येतौ क्षत्रियावुभौ।।3।।

48. गान्धारश्च निषादश्च वैश्यावर्द्धेन तत्समौ।
शूद्रत्वं विद्धि चाऽर्द्धेन पतितत्वान्न संशयः।।4।।

49. ऋषभोत्थितषड्जहतो धैवतसहितश्च पञ्चमो यत्र।
निपतति मध्यमरागे तं निषादं षाडवं विद्यात्।।5।।

50. यदि पञ्चमो विरमते गान्धारश्चाऽन्तरो भवति।
ऋषभो निषादसहितस्तं पञ्चममीदृशं विद्यात्।।6।।

51. गान्धारस्याऽधिपत्येन निषादस्य गतागतैः।
धैवतस्य च दौर्बल्यान्मध्यमग्राम उच्यते।।7।।

52. ईषत्स्पृष्टो निषादस्तु गान्धारश्चाऽधिको भवेत्।
धैवतः कम्पितो यत्र षड्जग्रामन्तु निर्द्दिशेत्।।8।।

53. अन्तरस्वरसंयुक्ता काकलिर्यत्र दृश्यते।
तन्तु साधारितं विद्यात् पञ्चमस्थन्तु कैशिकम्।।9।।

54. कैशिकं भावयित्वा तु स्वरैस्सर्वैस्समन्ततः।
यस्मात्तु मध्यमे न्यासः तस्मात्कैशिकमध्यमः।।10।।

55. काकलिर्दृश्यते यत्र प्राधान्यं पञ्चमस्य तु।
कश्यपः कैशिकं प्राह मध्यमग्रामसम्भवम्।।11।।

56. गेति गेयं विदुः प्राज्ञा धेति कारुप्रवादनम्।
वेति वाद्यस्य संज्ञेयं गन्धर्वस्य विरोचनम्।।12।।

(1.5)

पञ्चमी कण्डिका

57. यस्सामगानां प्रथमस्स वेणोर्मध्यमः स्वरः।
यो द्वितीयस्स गान्धारः तृतीयस्त्वृषभः स्मृतः।।1।।

58. चतुर्थष्षड्ज इत्याहुः पञ्चमो धैवतो भवेत्।
षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः।।2।।

59. षड्जम्मयूरो वदति गावो रम्भन्ति चर्षभम्।
अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम्।।3।।

60. पुष्पसाधारणे काले पिको वक्ति च पञ्चमम्।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः।।4।।

61. कण्ठादुत्तिष्ठते षड्जः शिरसस्त्वृषभः स्मृतः।
गान्धारस्त्वनुनासिक्यः उरसो मध्यमः स्वरः।।5।।

62. उरसश्शिरसः कण्ठादुत्थितः पञ्चमः स्वरः।
ललाटाद्धैवतं विद्यान्निषादं सर्वसन्धिजम्।।6।।

63. नासाकण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः।
षड्भिस्सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः।।7।।

64. वायुस्समुत्थितो नाभेः कण्ठशीर्षसमाहतः।
नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते।।8।।

65. वायुस्समुत्थितो नाभेः कण्ठशीर्षसमाहतः।
नासागन्धावहः पुण्यो गान्धारस्तेन हेतुना।।9।।

66. वायुस्समुत्थितो नाभेरुरो हृदि समाहतः।
नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते।।10।।

67. वायुस्समुत्थितो नाभेरुरोहृत्कण्ठशिरोहतः।
पञ्चस्थानस्थितस्यास्य पञ्चमत्वं विधीयते।।11।।

68. धैवतञ्च निषादञ्च वर्जयित्वा स्वरद्वयम्।
शेषान्पञ्चस्वरांश्चान्यान्पञ्चस्थानोत्थितान्विदुः।।12।।
(पञ्चस्थानस्थितत्वेन सर्वस्थानानि धार्यते।)

69. अग्निगीतः स्वरष्षड्ज ऋषभो ब्रह्मणोच्यते।
सोमेन गीतो गान्धारो विष्णुना मध्यमः स्वरः।।13।।

70. पञ्चमस्तु स्वरो गीतो नारदेन महात्मना।
धैवतश्च निषादश्च गीतौ तुम्बुरुणा स्वरौ।।14।।

71. आद्यस्य दैवतं ब्रह्मा षड्जस्याऽप्युच्यते बुधैः।
तीक्ष्णदीप्तप्रकाशत्वादृषभस्य हुताशनः।।15।।

72. गावः प्रगीते तुष्यन्ति गान्धारस्तेन हेतुना।
श्रुत्वा चैवोपतिष्ठन्ति सौरभेया न संशयः।। 16।।
73. सोमस्तु पञ्चमस्याऽपि दैवतं ब्रह्मराट् स्मृतम्।
निर्ह्रासो यस्य वृद्धिश्च ग्राममासाद्य सोमवत्।। 17।।
74. अतिसन्धीयते यस्मादेतान्पूर्वोत्थितान्त्स्वरान्।
तस्मादस्य स्वरस्याऽपि धैवतत्वं विधीयते।। 18।।
75. निषीदन्ति स्वरा यस्मान्निषादस्तेन हेतुना।
सर्वांश्चाभिभवत्येष यदादित्योऽस्य दैवतम्।। 19।।

(1.6)

षष्ठी कण्डिका

76. दारवी गात्रवीणा च द्वे वीणे गानजातिषु।
सामिकी गात्रवीणा तु तस्याश्शृणुत लक्षणम्।। 1।।
77. गात्रवीणा तु सा प्रोक्ता यस्यां गायन्ति सामगाः।
स्वरव्यञ्जनसंयुक्ता अङ्गुल्यङ्गुष्ठरञ्जिता।।2।।
78. हस्तौ सुसंयुतौ धार्यौ जानुभ्यामुपरि स्थितौ।
गुरोरनुकृतिं कुर्यात् यथा ज्ञानमतिर्भवेत्।।3।।
79. प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।
सावित्रीञ्चाऽनुवचनन्ततो वृत्तान्तमारभेत्।।4।।
80. प्रसार्य चाऽङ्गुलीस्सर्वाऽरोपयेत् स्वरमण्डलम्।
न चाऽङ्गुलीभिरङ्गुष्ठमङ्गुष्ठेनाऽङ्गुलीः स्पृशेत्।।5।।
81. विरला नाऽङ्गुलीः कुर्यान्मूलेचैना न संस्पृशेत्।
अङ्गुष्ठाग्रेण ता नित्यम्मध्यमे पर्वणि स्पृशेत्।।6।।
82. मात्रद्विमात्रावृद्धानां विभागार्थं विभागवित्।
अङ्गुलीभिर्द्धिमात्रन्तु पाणेस्सव्यस्य दर्शयेत्।।7।।
83. त्रिरेखा यत्र दृश्येत सन्धिन्तत्र विनिर्दिशेत्।
स पर्व इति विज्ञेयः शेषमन्तरमन्तरम्।।8।।

84. यवान्तरन्तु सामसु ऋक्षुकुर्यात्तिलान्तरम्।
स्वरान्मध्यमपर्वसु सुनिविष्टान्निवेशयेत्।।9।।
(स एकमात्रोद्विस्तावान् दीर्घस्तु प्लुत उच्यते।)

85. न चाऽत्र कम्पयेत्किञ्चिदङ्गस्याऽवयवं बुधः।
अधस्तनं मृदुन्यस्य हस्तमास्ते यथाक्रमम्।।10।।

86. अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत्।
एष छेदो विवृत्तीनां यथा बालेषु कर्तरि।।11।।

87. कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिन्दिशम्मनः।
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः।।.12।।

88. नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत्।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।।13।।

89. सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च।
यथैवोच्चारयेद्वर्णांस्तथैवैनान्त्समापयेत्।।14।।

90. नाऽत्याहन्यान्न निर्हन्यान्न प्रगायेन्न च कम्पयेत्।
समं सामानि गायेत व्योम्नि श्येनगतिर्यथा।।15।।

91. यथाऽप्सु चरताम्मार्गो मीनानान्नोपलक्ष्यते।
आकाशे वा विहङ्गानान्तद्वत्स्वरगता श्रुतिः।।16।।

92. यथा दध्नि सर्पिस्स्यात्काष्ठस्थो वा यथाऽनलः।
प्रयत्नेनोपलभ्येत तद्वत्स्वरगता श्रुतिः।।17।।

93. स्वरात्स्वरं सङ्क्रामंस्तु स्वरसन्धिरनुल्बणम्।
अविच्छिन्नं समं कुर्यात्सूक्ष्मच्छायाऽतपोपमम्।।18।।

94. अनागतमतिक्रान्तं विच्छिन्नं विषमाहतम्।
तन्वन्तमस्थितान्तञ्च वर्जयेत्कर्षणं बुधः।।19।।

95. स्वरस्थानाच्युतो यस्तु स्वं स्थानमतिवर्तते।
विस्वरं सामगा ब्रूयुर्विरक्तमिति वीणिनः।।20।।

96. अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्।
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम्।।21।।

97. गृहीतग्रन्थ एवन्तु ग्रन्थोच्चारणशिक्षकान्।
हस्तेनाऽध्यापयेच्छिष्यान् शैक्ष्येण विधिना द्विजः।।22।।

(1.7)

सप्तमी कण्डिका

98. क्रुष्टस्य मूर्द्धनि स्थानं ललाटे प्रथमः स्वरः।
भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य तु कर्णयोः।।1।।

99. कण्ठःस्थानञ्चतुर्थस्य मन्द्रस्य रसनोच्यते।
अतिस्वारस्य नीचस्य हृदिस्थानं विधीयते।।2।।

100. अङ्गुष्ठस्योत्तमे क्रुष्टो ह्यङ्गुष्ठे प्रथमः स्वरः।
प्रदेशिन्यान्तु गान्धार ऋषभस्तदनन्तरम्।।3।।

101. अनामिकायां षड्जस्तु कनिष्ठायान्तु धैवतम्।
तस्याऽधस्ताच्च योऽन्यस्तु निषादन्तत्र निर्दिशेत्।।4।।

102. अपर्वत्वादसंज्ञत्वादव्ययत्वाच्च नित्यशः।
मन्द्रो हिनु हि भूतस्तु परिस्वार इति स्मृतः।।5।।

103. क्रुष्टेन देवा जीवन्ति प्रथमेन तु मानुषाः।
पशवस्तु द्वितीयेन गन्धर्वाऽप्सरसस्त्वनु।।6।।

104. अण्डजाः पितरश्चैव चतुर्थस्वरजीविनः।
मन्द्रन्त्वेवोपजीवन्ति पिशाचाऽसुरराक्षसाः।।7।।

105. अतिस्वारेण नीचेन शिष्टं स्थावरजङ्गमम्।
सर्वाणि खलु भूतानि धार्यन्ते सामिकैः स्वरैः।।8।।

106. दीप्ताऽऽयताकरुणानां मृदुमध्यमयोस्तथा।
श्रुतीनां योऽविशेषज्ञो न स आचार्य उच्यते।।9।।

107. दीप्ता मन्द्रे द्वितीये च प्र चतुर्थे तथैव च।
अतिस्वारे तृतीये च क्रुष्टे तु करुणा श्रुतिः।।10।।

108. श्रुतयोऽन्या द्वितीयस्य मृदुमध्याऽयताः स्मृताः।
तासामपि तु वक्ष्यामि लक्षणानि पृथक्पृथक् ।। 11 ।।

109. आयतात्वं भवेन्नीचे मृदुत्वञ्च विपर्यये।
स्वे स्वे स्वरे मध्यमत्वन्तत्समीक्ष्य प्रयोजयेत् ।। 12 ।।

110. द्वितीये विरता या तु क्रुष्टस्य परतो भवेत्।
दीप्तां तान्तु विजानीयात्प्रथमेन मृदुस्मृता ।। 13 ।।

111. अत्रैव विरता या तु चतुर्थेन प्रवर्तते।
तथा मन्द्रे भवेद्दीप्ता साम्नश्चैव समापने ।। 14 ।।

112. नाऽविरते श्रुतिं कुर्यात्स्वरयोर्नाऽपि चाऽन्तरे।
न च ह्रस्वे च दीर्घे च न चाऽपि घुटसंज्ञके ।। 15 ।।

113. द्विविधागतिः पदान्तः स्थितसन्धिस्सहोष्मभिः।
पञ्चस्वेतेषु स्थानेषु विज्ञेयं घुटसंज्ञितम् ।। 16 ।।

114. स्वरान्तरनिरतानि ह्रस्वदीर्घघुटानि च।
श्रुतिस्थाने विशेषेण श्रुतिवत्स्वरतो भवेत् ।। 17 ।।

115. दीप्तामुदात्ते जानीयाद्दीप्ताञ्च स्वरिते विदुः।
अनुदात्ते मृदुर्ज्ञेया गान्धर्वश्रुतिसम्पदः ।। 18 ।।

116. उदात्तश्चाऽनुदात्तश्च स्वरितप्रचिते तथा।
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा ।। 19 ।।

(1.8)

अष्टमी कण्डिका

117. अत ऊर्ध्वं प्रवक्ष्यामि आर्चिकस्य स्वरत्रयम्।
उदात्तश्चाऽनुदात्तश्च तृतीयस्स्वरितस्वरः ।। 1 ।।

118. य एवोदात्त इत्युक्तस्स एव स्वरितात्परः।
प्रचयः प्रोच्यते तज्ज्ञैर्नचाऽत्राऽन्यत्स्वरान्तरम् ।। 2 ।।

119. वर्णस्वारोऽतीतस्वारः स्वरितो द्विविधः स्मृतः।
मात्रिको वर्ण एवेति दीर्घस्तूच्चरितादनु ।। 3 ।।

120. स तु सप्तविधो ज्ञेयः स्वारः प्रत्ययदर्शनात्।
पदेन तु स विज्ञेयो भवेद्यो यत्र यादृशः।।4।।

121. सप्तस्वरान्प्रयुञ्जीत दक्षिणं श्रवणं प्रति।
आचार्यैर्विहितं शास्त्रं पुत्रशिष्यहितैषिभिः।।5।।

122. उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा।
वैस्वर्ये स्वारसंज्ञायां किं स्थानं स्वारमुच्यते।।6।।

123. उच्चनीचस्य यन्मध्ये साधारणमिति श्रुतिः।
तं स्वारं स्वारसंज्ञायां प्रतिजानन्ति शैक्षिकाः।।7।।

124. उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ।
स्वरितप्रभवाह्येते षड्जमध्यमपञ्चमाः।।8।।

125. यत्र क ख परा ऊष्मा जिह्वामूलप्रयोजना।
तामप्याऽज्ञापयेन्मात्रां प्रकृत्यैव तु सा कला।।9।।

126. जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जनमेव च।
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः।।10।।

127. स्वराणामहमेतेषां पृथग्वक्ष्यामि लक्षणम्।
उद्दिष्टानां यथान्यायमुदाहरणमेव च।।11।।

प्रथमप्रपाठकः समाप्तः

*****

अथ द्वितीयः प्रपाठकः

(2.1)

प्रथमा कण्डिका

128. सयकारं सवं वाऽपि अक्षरं स्वरितं भवेत्।
न चोदात्तं पुरस्तस्य जात्यः स्वारस्स उच्यते।।1।।

129. इ उ वर्णौ यदोदात्तावपद्येते य वौ क्वचित्।
अनुदात्त परे नित्यं विद्यात्क्षैप्रस्य लक्षणम्।।2।।

130. ए ओ आभ्यामुदात्ताभ्यामकारो निहितश्च यः।
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः।।3।।
131. उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत्।
एष सर्वबहुस्वारस्तैरोव्यञ्जनमुच्यते।।4।।
132. अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम्।
तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः।।5।।
133. इकारं यत्र पश्येयुरिकारेणैव संयुतम्।
उदात्तमनुदात्तेन प्रश्लिष्टन्तन्निबोधत।।6।।
134. स्वरे चेत्स्वरितं यत्र विवृत्ता यत्र संहिता।
एतत्पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम्।।7।।
135. जात्यस्स्वारस्सजात्येन श्रुष्ट्यग्ने क्षैप्र उच्यते।
तेऽमन्वताऽभिनिहितः तैरोव्यञ्जन ऊतये।।8।।
136. तिरोविरामो विष्कभिते प्रश्लिष्टो हीन्द्र गिर्वणः।
पादवृत्तः कईं वेद स्वारास्सप्तैवमादयः।।9।।
137. उच्चादेकाक्षरात्पूर्वं स्वर्यते यदिहाक्षरम्।
स्वाराणां जात्यवर्णानामेषा प्रकृतिरुच्यते।।10।।
138. चत्वारस्त्वादितः स्वाराः कम्पं पुष्यन्ति शास्त्रतः।
उदात्तैवैकनीचे वा जुह्वोग्निस्तत्र दर्शनम्।।11।।

(2.2)

द्वितीया कण्डिका

139. इकारान्ते पदे पूर्वे उकारे परतः स्थिते।
ह्रस्वकम्पं विजानीयान्मेधावी नाऽत्र संशयः।।1।।
140. इकारान्ते पदे चैवोकारद्वे परे पदे।
दीर्घकम्पं विजानीयाच्छग्ध्यूष्विति निदर्शनम्।। 2।।
141. त्रयो दीर्घास्तु विज्ञेया ये च सन्ध्यक्षरेषु वै।
मन्या पथ्या न इन्द्राभ्या शेषा ह्रस्वाः प्रकीर्तिताः।।3।।

142. अनेकानामुदात्तानां अनुदात्तः परो यदि।
शिवकम्पं विजानीयादुदात्तः प्रत्ययो यदि।।4।।

143. यत्र द्विप्रभृतीनि स्युः उदात्तान्यक्षराणि तु।
नीचञ्चोच्चञ्च परतः तत्रोदात्तं विदुर्बुधाः।।5।।

144. न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्।
न च वर्गद्वितीयेषु न चतुर्थे कदाचन।।6।।

145. चतुर्थञ्च तृतीयेन द्वितीयं प्रथमेन तु।
आद्यमन्त्यञ्च मध्यञ्च स्वाक्षरेणैव पीडयेत्।।7।।

146. अनन्त्यश्च भवेत्पूर्वोन्त्यश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः।।8।।

147. वर्गान्त्याञ्छषसैस्सार्द्धमन्तस्थैर्वाऽपि संयुतान्।
दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाऽध्वगाः।।9।।

148. तृतीयश्च चतुर्थश्च चतुर्थादि परं पदम्।
द्वौ तृतीयौ हकारश्च हकारादि परं पदम्।।10।।

149. अनुस्वारोपधमूलानां न क्वचित्क्रमतेऽक्षरम्।
र ह पूर्वयुतेचापि उत्तरं क्रमतेऽक्षरम्।।11।।

150. संयोगे यत्र दृश्येत व्यञ्जनं विरते पदे।
पूर्वाङ्गमादितः कृत्वा पराङ्गादौ निवेशयेत्।। 12।।

151. संयोगे स्वरिते यत्र उद्धाते पतने तथा।
पूर्वाङ्गमादितः कृत्वा पराङ्गादौ निवेशयेत्।।13।।

152. संयोगे दृश्यते यत्र व्यञ्जनं विरते पदे।
पूर्वाङ्गं तद्विजानीयात् येनारम्भः परं हि तत्।।13।।

153. संयोगात्तु परं स्वार्यं परं संयोगनायकम्।
संयुक्तस्य तु वर्णस्यास्वरं पूर्वमक्षरम्।। 14।।

154. अनुस्वारः पदान्तश्च क्रमजं प्रत्यये स्वके।
स्वरभक्तिस्तथारेफः सर्वं पूर्वाङ्गमुच्यते।।15।।

155. पादादौ च पदादौ च संयोगाऽवग्रहेषु च।
ग्यशब्द इति विज्ञेयो योऽन्यस्स य इति स्मृतः।। 16।।

156. पदादावप्यविच्छेदे संयोगान्ते च तिष्ठताम्।
वर्जयित्वा रहू याणामयादेशः प्रदृश्यते।। 17।।
(वर्जयित्वा रहौयानामयादेशः प्रदृश्यते।)

157. स्वसंयुक्तो गुरुर्ज्ञेयः साऽनुस्वारोऽग्रिमः स्फुटः।
अणुशेषोऽध्रिगोर्वाऽपि युगलादिरविस्फुटः।। 18।।

(2.3)

तृतीया कण्डिका

158. यदुदात्तमुदात्तन्तद्यत्स्वरितं तत्पदे भवति नीचम्।
यन्नीचन्नीचमेव तद्यत्प्रचयस्थन्तदपि नीचम्।। 1।।

159. अयमग्निस्सुतोमित्रमिदं वयमयावहाः।
प्रियन्दूतं घृतवित्त मित्रमभिशब्दश्च नीचतः।। 2।।

160. अर्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च।
शतेषु सपवित्रेषु नीचादुच्चार्यते श्रुतिः।। 3।।

161. हरिवरुणवरेण्येषु धारापुरुषेषु च स्वरति रेफः।
विश्वानरो नकारेण शेषा रस्वरिता नराः।। 4।।

162. द्वौ वरुणौ वस्वरितौ उदुत्तमं त्वं वरुणौ।
धाकारे चोरुधारायामुरुधारेव दोहते।। 5।।

163. मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाऽक्षरम्।
तस्यादितोऽर्द्धमात्रा वै शेषन्तु परतो भवेत्।। 6।।

164. अदीर्घं दीर्घवत्कुर्यात् द्विस्वरं यत्प्रत्युज्यते।
कम्पोत्स्वरिताऽभिगीतं ह्रस्वकर्षणमेव च।। 7।।

165. निमेषकाला मात्रास्याद्विद्युत्कालेति चाऽपरे।
ऋक्स्वरा तुल्ययोगा वा मतिरस्यात्सोमशर्मणः।। 8।।

166. समासेऽवग्रहं कुर्यात्पदज्ञाऽन्त्राऽनुसँहितम्।
यतोऽक्षरादितिकरणं पदान्तन्तस्य तं विदुः।।9।।

167. सर्वत्र पुत्र मित्र सखिशब्दा
अद्रि शतक्रतो इत्यवग्राह्याः।
आदित्य विप्रजातवेदाश्च सत्पति
गोपति वृत्रहा समुद्रश्च।।10।।

168. स्वर्युवो देवयवश्चाऽरतिन्देवतातये।
चिकितिश्चुक्रुधं चैव नाऽवगृह्णन्ति पण्डिताः।।11।।

(2.4)

चतुर्थी कण्डिका

169. विवृत्तयश्चतस्रो वै विज्ञेया इति मे मतम्।
अक्षराणान्नियोगेन तासान्नामानि मे श्रृणु।।1।।

170. ह्रस्वादिर्वत्सानुसृजा वत्सानुसारिणी चाऽग्रे।
पाकवत्युभयोर्ह्रस्वा दीर्घवृद्धा पिपीलिका।।2।।

171. चतसृणां विवृत्तीनामन्तरम्मात्रिकं भवेत्।
अर्द्धमात्रिकमन्येषामन्येषामणुमात्रिकम्।।3।।

172. आपद्येत मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्।
यलवेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम्।।4।।

173. नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते।
आकाँ रक्तमित्याहुर्नकारेण तु रज्यते।।5।।

174. नकारान्ते पदे पूर्वे व्यञ्जनैश्च यवोहिषु।
अर्द्धमात्रा तु पूर्वस्य रज्यते त्वणुमात्रया।।6।।

175. नकारः स्वरसंयुक्तश्चतुर्युक्तो विधीयते।
रेफो रङ्गश्च लोपश्चेत्यनुस्वारोऽपि वा क्वचित्।।7।।

176. हृदयादुत्थितो रङ्गः कांस्येन समनिस्स्वनः।
मृदुश्चैव त्रिमात्रश्च दधन्वाँ इति निदर्शनम्।।8।।

177. यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते।
एवं रङ्गः प्रयोक्तव्यः नारदस्य मतं यथा।।9।।

(2.5)

पञ्चमी कण्डिका

178. स्वरा गडदबाश्चैव ङणनमास्सहोष्मभिः।
चतुर्णां पदजातीनां पदान्ता दशकीर्तिताः।।1।।

179. स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः।।2।।

180. स्वरप्रधानन्त्रैस्वर्यमाचार्याः प्रतिजानते।
मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः।।3।।

181. दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः।
दुर्बलं व्यञ्जनन्तद्वद्धरते बलवान्स्वरः।।4।।

182. ओभावश्च विवृत्तिश्च शष सा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः।।5।।

183. स्वरप्रत्यया विवृत्तिः संहितायां तु या भवेत्।
विसर्गस्तत्र मन्तव्यस्तालव्यो वाऽत्र जायते।।6।।

184. सन्ध्यक्षरोपधे सन्धौ प्राप्तलुप्तौ यवौ यदि।
व्यञ्जनाख्या विवृत्तिस्तु स्वराख्या प्रकृतिसंहिता।।7।।

185. ऊष्मान्तं विरते यत्र सन्धावो भवते च यत्।
विवृत्तिर्या भवेत्तत्र स्वराख्यां तां विनिर्दिशेत्।।8।।

186. यद्योभावप्रसन्धानमुकारादि परं पदम्।
स्वरान्तन्तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः।।9।।

187. प्रथमा उत्तमाश्चैव पदान्तेषु यदि स्थिताः।
द्वितीयँ स्थानमापन्नाः शषसाः प्रत्यया यदि ।।10।।

188. प्रथमानूष्मसंयुक्तान् द्वितीयानिव दर्शयेत्।
न चैनान्प्रतिजानीयाद्यथामत्स्यः क्षुरोऽप्सराः।।11।।

(2.6)

षष्ठी कण्डिका

189. छन्दो मानञ्च वृत्तञ्च पादस्थानन्त्रिकारणम्।
ऋचः स्वच्छन्दवृत्तास्तु पादास्त्वक्षरमानशः।।1।।

190. ऋवर्णं स्वरभक्तिञ्च छन्दोमाने न निर्दिशेत्।
प्रत्ययेन सहाऽरेफं मिमीत स्वरभक्तिषु।।2।।

191. ऋवर्णे तु पृथक् रेफः प्रत्ययस्तु यदा भवेत्।
विद्याल्लघुमृकारन्तु यदि तूष्माण संयुतः।।3।।

192. ऊष्मणैव हि संयुक्त ऋकारो यत्र गम्यते।
गुरुवर्णस्स विज्ञेयस्तृचञ्चात्राऽनुदर्शनम्।।4।।

193. ऋषभञ्च गृहीतञ्च बृहस्पतिं पृथिव्याञ्च।
निर्ऋति पञ्चमाह्यत्र ऋकारा नाऽत्र संशयः।।5।।

194. शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदसन्धौ।
इउवर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता।।6।।

195. स्वरभक्तिर्द्विविधा तु ऋकारो रेफ एव च।
स्वरोदा व्यञ्जनोदा च विहिताऽक्षरचिन्तकैः।।7।।

196. शषसेषु स्वरोदयां हकारे व्यञ्जनोदयाम्।
शषसेषु विवृत्तान्तु हकारे संवृतां विदुः।।8।।

197. स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान्परिवर्जयेत्।
इकारञ्चाप्युकारञ्च ग्रस्तदोषन्तथैव च।।9।।

198. संयोगपरं छपरं विसर्जनीयं द्विमात्रिकञ्चैव।
अवसानिकञ्च न लघु साऽनुस्वारं घुटन्तञ्च।।10।।

(2.7)

सप्तमी कण्डिका

199. पथ्यापादः प्रथमो द्वादशमात्रस्तथा तृतीयोऽपि।
अष्टादशो द्वितीयस्समापनः पञ्चदशमात्रः।।1।।

200. पथ्यालक्षणमुक्तं या त्वन्या सा स्मृता विपुला ।। 2 ।।

201. अक्षराणां लघु ह्रस्वमसंयोगपरं यदि।
तत्संयोगोत्तरं विद्यात् गुरुर्दीर्घाक्षराणि तु ।। 3 ।।

202. विवृत्तिर्यत्र दृश्येत स्वारश्चैवाऽग्रतस्स्थितः।
गुरुस्वारस्सविज्ञेयः क्षैप्रस्तत्र न विद्यते ।। 4 ।।

203. अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम्।
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तन्नीचस्वरितम् ।। 5 ।।

204. मध्योदात्तं स्वरितं द्विरुदात्तमित्येता अष्टौ पदसंज्ञाः।
अग्निस्सोमः प्रवोवीर्यँ हविषास्वर्वनस्पतिः ।। 6 ।।

205. अन्तर्मध्यमयोर्नाप्युदमनुदनिपाते।
आद्यात्स्वरितमुपसर्गे द्विर्न्नीचमाख्यात इति ।। 7 ।।

206. स्वरितात्पराणि यानि स्युर्धार्याण्यक्षराणि तु।
सर्वाणि प्रचयस्थान्युपोदात्तन्निहन्यते ।। 8 ।।

207. प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः।
स्वरितः केवलो यत्र मृदुं तत्र निपातयेत् ।। 9 ।।

208. पञ्चविधमाचार्यकन्नाम मुखं न्यासः करणं प्रतिज्ञोच्चारणे
अत्रोच्यते श्रेयः खलु वै सप्रतिज्ञोच्चारणा ।। 10 ।।

209. यस्य कस्यचिद्वर्णस्य करणन्नोपलभ्यते।
प्रतिज्ञा तत्र वोढव्या करणं हि तदात्मकम् ।। 11 ।।

210. तुम्बुरुनारदवसिष्ठविश्वावस्वादयश्च गन्धर्वाः।
सामसु निभृतं करणं स्वरसौक्ष्म्यात्तेऽपि हि न कुर्युः ।। 12 ।।

(2.8)

अष्टमी कण्डिका

211. कौक्षेयाऽग्निं सदा रक्षेदश्नीयादशनं हितम्।
जीर्णाहारः प्रबुद्धस्सन्नुषसि ब्रह्मचिन्तयेत् ।। 1 ।।

212. शरद्विषुवतेऽतीते उषस्युत्थानमिष्यते।

यावद्वासन्तिकी रात्रिः मध्यमा पर्युपस्थिता।।2।।

213. आम्रपलाशबिल्वानामपामार्गशिरीषयोः।
वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम्।।3।।

214. खदिरश्च कदम्बश्च करवीरकरञ्जयोः।
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः।।4।।

215. तेनाऽस्यकरणं सौक्ष्म्यम्माधुर्यञ्चोपजायते।
वर्णांश्च कुरुते सम्यक्प्राचीनौदव्रजिर्यथा।।5।।

216. त्रिफलां लवणाख्येन भवेच्छिष्यस्य सर्वदा।
अग्निमेधाजनन्येषा स्वरवर्णकरी तथा।।6।।

217. कृत्वा चाऽवश्यकान् धर्माञ्जाठरं पर्युपास्य च।
पीत्वा मधुघृतञ्चैव शुचिर्भूत्वा ततो वदेत्।।7।।

218. मन्द्रेणोपक्रमेत्पूर्वं सर्वशाखा स्वयं विधिः।
सप्त मन्त्राનतिक्रम्य यथेष्टां वाचमुत्सृजेत्।
न तां समीरयेद्वाचं या प्राणमुपरोधयेत्।।8।।

219. प्राणानामुपरोधेन वैस्वर्यञ्चोपजायते।
स्वरव्यञ्जनमाधुर्यं लुप्यते नाऽत्र संशयः।।9।।

220. कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम्।
न तस्य परिमोक्षोऽस्ति पापाहेरिव किल्बिषात्।। 10।।

221. सुतीर्थादागतं व्यक्तं स्वाम्नातं सुप्रतिष्ठितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते।। 11।।

222. न करालो न लम्बोष्ठो न च सर्वाऽनुनासिकः।
गद्गदो बद्धजिह्वश्च प्रयोगान् वक्तुमर्हति।। 12।।

223. एकचित्तो निरुद्धान्तः तान्तगानविवर्जितः।
स तु वर्णान्प्रयुञ्जीत दन्तोष्ठं यस्य शोभनम्।। 13।।

224. पञ्चविद्यां न गृह्णन्ति चण्डाः स्तब्धाश्च ये नराः।
अलसाश्च सरोगाश्च येषाञ्च विसृतम्मनः।। 14।।

225. शनैर्विद्यां शनैरर्थानारोहेत्पर्वतं शनैः।
शनैरेवाध्वगमनं योजनानां परिव्रजेत्।। 15।।

226. योजनानां सहस्रन्तु शनैर्यान्ति पिपीलिकाः।
अगच्छन्वैनतेयोऽपि पदमेकं न गच्छति।। 16।।

227. न हि पार्ष्णि हता वाणी प्रयोगान्वक्तुमर्हति।
बधिरस्येव तल्पस्था विदग्धा वामलोचना।। 17।।

228. उपांशु त्वरितञ्चैव योऽधीति वित्रसन्निव।
अपि रूपसहस्रेषु सन्देहेष्वेव जायते।। 18।।

229. पुस्तकप्रत्ययाऽधीतं नाऽधीतं गुरुसन्निधौ।
न भ्राजते सभामध्ये जारगर्भा इव स्त्रियः।। 19।।

230. अञ्जनस्य क्षयन्दृष्ट्वा वल्मीकस्य च सञ्चयम्।
अवन्ध्यं दिवसं कुर्याद्दानाऽध्ययनकर्मसु।। 20।।

231. योजनानां शतं साग्रं शनैर्याति पिपीलिकाः।
अगच्छन्वैनतेयोपि पदमेकन्न गच्छति।। 21।।

232. यत्कीटैः पांसुभिश्लक्ष्णैः वल्मीकः क्रियते महान्।
न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम्।। 22।।

233. सहस्रगुणिता विद्या शतशः परिकीर्तिता।
आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम्।। 23।।

234. हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम्।
न हि विद्यार्थिनान्निद्रा चिरं नेत्रेषु तिष्ठति।। 24।।

235. न भोजनविलम्बी स्यान्न च नारीनिबन्धनः।
सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत्।। 25।।

236. अहेरिव गणाद्भीतः सौहार्दान्नरकादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति।। 26।।

237. न शठाः प्राप्नुवन्त्यर्थान्न क्लीबा न च मानिनः।
न च लोकरवाद्भीताः न च श्वः श्वः प्रतीक्षकाः।। 27।।

238. यथा खनन्खनित्रेण भूतले वारि विन्दति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।28।।

239. शुश्रूषारहिता विद्या यद्यपि मेधागुणैस्समुपयाति।
वन्ध्येव यौवनवती न तस्य विद्या फलवती भवति।।29।।

240. गुरुशुश्रुषया विद्या पुष्कलेन धनेन वा।
अथवा विद्यया विद्या चतुर्थेन न लभ्यते।।30।।

241. द्यूतं पुस्तकवाचञ्च नाटकेषु च सक्तिका।
स्त्रियस्तन्द्री च निद्रा च विद्याविघ्नकराणि षट्।।31।।

242. यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।।32।।

243. एवं वर्णाः प्रयोक्तव्या नाऽव्यक्ता न च पीडिताः।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।।33।।

इति द्वितीयः प्रपाठकः

इति नारदीयशिक्षायाः मूलपाठः

ॐ नमस्सामवेदाय

(1.1)

प्रथमा कण्डिका

1. अथाऽतः स्वरशास्त्राणां सर्वेषां वेदनिश्चयम्।
उच्चनीचविशेषाद्धि स्वरान्यत्वं प्रवर्तते ।। 1 ।।

अन्वयः- अथ अतः सर्वेषाम् स्वरशास्त्राणाम् वेदनिश्चयम् उच्च नीचविशेषात् हि स्वरान्यत्वं प्रवर्तते।

विवरणम्-

प्रणम्य परमात्मानं ऋग्यजुस्सामविग्रहम्।
मुनिना नारदेनोक्तां शिक्षां व्याख्यातुमिष्यते।।

अथ सामसँहिताध्ययनानन्तरम्। अत इति सँहिताध्ययनात्पूर्वं पठितशिक्षाध्याहारः। शिक्ष्यते मन्त्रब्राह्मणस्वरुपं सम्यगध्ययन पाठश्च क्षिप्रं, सर्वेषां स्वरशास्त्राणां ऋग्यजुस्सामगानां निश्चयं सम्यक्स्वरुप-प्रतिपत्तिं वेदमयोच्यमानं जानीयात्। इति भगवान्नारदः शिष्यं प्रत्याह। सामान्यभूताऽकारगतः स्वरः। उच्चे उच्चविशेषे उच्चतरे उच्चतमे। नीचे नीचविशेषे नीचतरे नीचतमे च अवस्थाने अभिव्यज्यमानः स्वरान्यत्वं नानास्वरतां प्रतिपद्यत इत्यर्थः।

अथवा सर्वेषां वाग्भिर्निश्चयमिति वा पाठः। कथयामीति पूर्वपठितशिक्षामाहारयिष्यते। मन्त्रब्राह्मणवाक्यानि, ऋगादि स्वराणां विवेक उच्यते। शिक्षति गृह्यत इति शिक्षा। चितिगृह्यतरति शिक्षाम्। शिक्षविद्योपादाने ।। 1.1.1 (धा.पा - 605) इति धातोरप्रत्यये रुपम्। व्याख्यातुमुच्यते इति पाठान्तरम्।।

प्रकाशः- शिक्षा स्वरवर्णोच्चारकं शास्त्रम्। यद्वा शिक्ष्यतेऽनया बालेभ्यो ह्रस्वदीर्घप्लुतोदात्ताऽनुदात्तस्वरितोरः कण्ठशिरोजिह्वामूल-दन्तनासौष्ठस्थानानि। अथवा वर्णस्वरादि उच्चारणप्रकारः यत्रोपदिश्यते सा शिक्षा। स्वरः –

श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ।।(सं.र.1.1.26)

वि- ऋगादि जगदादि विषयं स्वरं सम्यगवधार्य स्वाध्यायप्रयोगः कर्तव्य इत्याह-

2. आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम्।
कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः ।।2।।

अन्वयः- स्वरशास्त्राणाम् कृतान्ते आर्चिकम् गाथिकम् च एव सामिकम् च स्वरान्तरम् विशेषतः प्रयोक्तव्यम्।

उच्च नीचं तथा स्वरान्यत्वमित्युक्तं तच्च ऋग्विषये उदात्त स्वरित श्रुतिलोपे नान्तरत्वं व्यवधानम्।

स्वरशास्त्राणां विशेषतः कृतान्ते निश्चये सति ऋग्गाथासामसु भवं स्वरान्तरं अन्यदन्यत्स्वरजातं प्रयोक्तव्यम्। गाथास्वराक्षर-प्रयोज्यानि ब्राह्मणवाक्यानि।।

प्र- अन्तः निश्चयः। अन्तोऽस्त्री निश्चये इति निघण्टुः। शार्ङ्गदेवेनैवमुक्तम् –

आर्चिको गाथिकश्चाऽथ सामिकोऽथ स्वरान्तरः।
एकस्वरादितानानां चतुर्णामभिधा इमाः।।

इति यज्ञप्रयोगेष्वृचामेकस्वराश्रयत्वात्तत्सम्बन्धादार्चिकः। तथा गाथा सम्बन्धाद्गाथिको द्विस्वरः। सामसम्बन्धात्त्रिस्वरस्तानः सामिकः। साम्नान्तु त्रिस्वरवत्वं सप्तस्वरवत्वेऽपि मन्द्रादि स्थानत्रयविवक्षया चतुस्वरतानस्यैकस्वरादिसप्तविधतानमध्यवर्तित्वात् स्वरान्तर इति संज्ञा इति चतुरकल्लिनाथः।

विवरणे- गाथास्वराक्षरप्रयोज्यानि इत्यस्य गाथास्वरेण अक्षराणि प्रयोज्यानि इत्यर्थः।।

वि – ऋगादिस्वराणां विवेक उच्यते।

3. एकान्तरस्वरोह्यृक्षु गाथासु द्व्यन्तरं स्वरः।
सामसु त्र्यन्तरं विद्यादेतावत्स्वरतोऽन्तरम् ।।3।।

अन्वयः- ऋक्षु हि स्वरः एकान्तरः भवति, गाथासु स्वरः द्व्यन्तरं, सामसु त्र्यन्तरं विद्यात्, एतावत् स्वरत अन्तरम् विद्यात्।

उच्चनीचतयास्वरान्यत्वमित्युक्तम्। (1.1.1) तच्च ऋग्विषये उदात्ताऽनुदात्तस्वरितश्रुतिलोपादन्तरत्वं व्यवधानं भवति। उदात्त-समाहाररूपत्वात्स्वरितस्यार्द्धश्रुतिलोपेन उत्तरे व्यवधानम् । तद्यथा आर्चिके "तत्सवितुर्वरेण्यम्" (उ.आ.13.10) इत्यादि। स्वर व्यवधानं गाथां जानीयात्। ब्राह्मणे द्विश्रुतिलोपेन गाथास्वरव्यवधानं भवति। "महन्मेवोचः "(ता.ब्रा 1.1.1) इत्यादि। सामसु त्रिश्रुतिलोपेन त्र्यन्तरं व्यवधानं जानीयात्। गाने "धियो यो नः प्रचोदयात्" इत्यादि। एतावत् स्वराणामन्तरं व्यवधानं सर्वत्र बोद्धव्यम्।।

वि- शिक्षाया अपरिज्ञाने ऋगादौ सम्यक् स्वरो न परिज्ञायत इत्याह-

4. ऋक्सामयजुरङ्गानि ये यज्ञेषु प्रयुञ्जते ।
अविज्ञानाद्धि शास्त्राणां तेषां भवति विस्वरः ।।4।।

अन्वयः- ये यज्ञेषु ऋक् साम यजुरङ्गानि प्रयुञ्जते तेषाम् शास्त्राणाम् अविज्ञानात् हि विस्वरः भवति।

ऋक्सामयजुर्लक्षणानि यज्ञाङ्गानि याज्यास्तोत्रकरणमन्त्रा-दीनि तेषां सम्यक् स्वरूपाऽपरिज्ञाने विस्वरो विरुद्धस्वरो भवतीति ।।

प्र- शास्त्राणां स्वरादि प्रतिपादकशिक्षाशास्त्राणाम्। अविज्ञानात् सम्यक् स्वरूपतः अपरिज्ञानात्।।

वि- स्वरादि वैगुण्येन केवलं देवतायाः साम्मुख्यं न भवति यावद्विरुद्धाचरणं तावत्प्रत्यवायो भवतीत्याह-

5. मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।5।।

अन्वयः- स्वरतः वर्णतः वा हीनः मिथ्याप्रयुक्तः मन्त्रः तम् अर्थम् न आह। स वाग् वज्रः स्वरतः अपराधात् इन्द्रशत्रुः यथा यजमानम् हिनस्ति।

मिथ्येति न शास्त्रानुसारेण प्रयुक्तः। न तमर्थमाहेति वदन्नपि अर्थं वाच्यं अभ्यस्यासन्निधिपरान्निःप्रयोजनमर्थाभिधानम्। वदन्नपि अर्थं वाच्यस्याऽसन्निधिपरां निष्प्रयोजनमर्थाभिधानं स वाग्वज्रः वज्रक्षेपेणेव वज्र इव वज्रो यजमानं निषिद्धाचरणात् हिनस्त्येव। यथा इन्द्रशत्रुशब्दः स्वरस्याऽपराधात् प्रयोक्तारं हिनस्ति। इन्द्रशत्रुः मेघ उच्यते। इन्द्रशब्दः शातयिताऽस्येति बहुव्रीहौ "प्रकृत्या पूर्वपदमित्याद्युदात्तं" इति (पा.सू.6.2.9) उदात्तं पदम्। इतरथा इन्द्रस्य शत्रुरिति षष्ठीसमासे "समासस्य" (पा.सू.6.1.23) अन्त उदात्तः इत्यन्तोदात्तं स्यात्। इन्द्रस्य परमेश्वरस्य शत्रुः न सम्भवतीति विरुद्धार्थता, स्वरान्तरं च प्रसज्यते, अतः स्वराद्यवधारणे यत्नः कार्यः।।

प्र-

"स्वरो वर्णोऽक्षरम्मात्रा विनियोगार्थमेव च।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे"।। बृहद्देवता इति।

"एको वर्णः सम्यक् ज्ञातः स्वर्गे लोके कामधुक् भवति" इति च महाभाष्यं पस्पशाह्निकम्। "यथेन्द्रशत्रुः स्वरतोऽपराधादिति "इन्द्रशत्रुर्वर्द्धस्व" (तै.सं.2.4.12.1) इत्यस्मिन्मन्त्रे विवक्षितेऽर्थे तत्पुरुषसमासे "समासस्य" (पा.6.1.223) इति सूत्रेण तत्पुरुषत्वात् अन्तोदात्तेन भवितव्यम्। आद्युदात्तस्तु प्रयुक्तः। तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वात् इन्द्रो घातको यस्येत्यर्थः सम्पन्नः।

तस्मात्स्वरवर्णाद्यपराधपरिहाराय अवश्यं शिक्षाग्रन्थ अध्येतव्यः। ज्ञातव्यश्च तदर्थ इति भावः।।

वि- स्वरादिवैगुण्येन च न केवलं कर्मणि वैगुण्यम्, अदृष्टो दोषश्च। यावत् दृष्टेनाऽपि दोषयोग इत्याह।

6. प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते ।
यज्ञेषु यजमानस्य रुशत्यायुः प्रजां पशून् ।।6।।

अन्वयः- यः स्वरः वर्णाभ्याम् प्रहीणः वै मन्त्रः यज्ञेषु प्रयुज्यते (सः मन्त्रः) यजमानस्य आयुः प्रजाम् पशून् रुशति।
मन्त्रो यजमानस्य आयुरादीन् रुशति नाशयतीत्यर्थः।।

प्र- रुश हिंसायाम् (धा.पा 1420 तुदादिः)
वि- स्वरस्वरुपं त्रिषु स्थानेषु अभिव्यज्यत इत्याह-

7. उरः कण्ठश्शिरश्चैव स्थानानि त्रीणि वाङ्मये।
सवनान्याहुरेतानि साम्नश्चाप्यधरोत्तरे ।।7।।

अन्वयः-वाङ्मये उरः कण्ठः शिरः च इति त्रीणि स्थानानि एतानि सवनानि आहुः, साम्नः अपि च अधरोत्तरे अस्ति।

नीचमध्यमोत्तमरूपतया वाक् उरसि कण्ठे शिरसि च अभिव्यज्यते। उरसि वक्षस्थाने शब्दोच्चारणं प्रातस्सवनमुच्यते। नीचैरुच्चारणं प्रातस्सवनशब्दस्येत्यर्थः। कण्ठस्थाने मध्यमेन स्वरेणोच्चारणं माध्यन्दिनसवनम्। शिरोलक्षणे स्थाने उच्चैरभिव्यज्यमानं शब्दजातं तृतीयसवनम्। साम्नोऽपि सप्तस्वरात्मकस्याऽधरोत्तरभावेन स्थितस्य स्थानत्रयसवनत्रय व्यपदेशः तु प्रवर्तत एव। सप्तस्वरात्मकत्वं आस्ये उर आदावेव सम्भवः। स्वरसप्तकता कण्ठग्रीवा इति भेदेन निर्देशः। सामवाप्यर्थतोन्तरमिति पाठभेदः।

प्र-

अष्टौ स्थानानि वर्णानामुरः कण्ठशिशरस्तथा।
जिह्वामूलश्च दन्ताश्च नासिकोष्ठौ च तालु च।
इति (माण्डूक्य शिक्षायाम् 68)

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।
प्रातःसवनयोगन्तं छन्दोगायत्रमाश्रितम्।। पा.शि-7
कण्ठे माध्यन्दिनयुतं मध्यमन्त्रैष्टुभाऽनुगम्।
तारन्तार्तीयसवनं शीर्षण्यं जागतानुगम् ।।(पा.शि-8)

वि- ऋग्यजुस्सामान्येऽपि स्थानत्रये स्थितानि इत्याह।

8. उरस्सप्तविचारं स्यात् तथा कण्ठस्तथा शिरः।
न च सप्तोरसि व्यक्तास्तथा प्रावचनो विधिः।।8।।

अन्वयः- उरः सप्तविचारम् स्यात्, कण्ठः तथा, शिरः तथा, उरसि च सप्त व्यक्ताः न, प्रावचनः विधिः तथा।।

सप्तानां स्वराणां विवरणं विचार इति सप्तविचारं उरः। मन्द्रातिस्वारयोरुरसि न सम्यगभिव्यक्तिः यथेतरत्र इति। प्रवचने अध्ययने भवः विधिः अध्यापनकालेऽवगम्यते। अध्ययनकाले च अनभिव्यक्तावपि मानसप्रयोगे उपांशुप्रयोगे च वर्णस्वरयोरनाख्याध्यापनो भवत्येव।।

वि- साम्नि सर्वात्मना स्वराणामवधारणं प्रवर्तते, तदनुसारेण ऋग्यजुषामुदात्तादिस्वरप्रवृत्तिरित्याह।।

9. कठकालापवृत्तेषु तैत्तिरीयाह्वरकेषु च ।
ऋग्वेदे सामवेदे च वक्तव्यः प्रथमः स्वरः।।9।।

अन्वयः- कठ-कालाप-वृत्तेषु तैत्तिरीयाह्वरकेषु च ऋग्वेदे सामवेदे च प्रथमः स्वरः वक्तव्यः।

कठकालापादिशाखासु ऋग्वेदे सामवेदे च ऋग्यजुषां सामिकः स्वरः प्रवर्तते। स्वरिते प्रथमस्वरानुसारेण पाठोऽवधार्यते।।

प्र- आह्वरकाः यजुर्वेदीयचरकान्तर्गतशाखीयाः। एवं कठा अपि। तथा च शौनकः तत्र चरका नाम द्वादशभेदाः भवन्ति। चरकाः आह्वरकाः कठाः इत्यादि।।

वि- क्रुष्टप्रथमस्वरसमुदायाकारश्च लौकिके व्यवहारे प्रवर्तत इत्याह-

10. ऋग्वेदस्तु द्वितीयेन तृतीयेन च वर्तते ।
उच्चमध्यमसङ्घातः स्वरो भवति पार्थिवः ।।10।।

अन्वयः- ऋग्वेदः तु द्वितीयेन तृतीयेन च वर्तते, उच्च-मध्यम-सङ्घातस्वरः पार्थिवः भवति।

वि-प्रथमस्वरवत् द्वितीयतृतीयस्वरौ ऋग्वेदेऽनु क्रियमाणे वधार्यते। क्रुष्टः उच्चः मध्यमः प्रथमस्वरः।

11. तृतीयप्रथमकृष्टान् कुर्वन्त्याह्वरकाः स्वरान्।
द्वितीयाद्यांस्तुमन्द्रान्तांस्तैत्तिरीयाश्चतुरस्वरान् ।।11।।

अन्वयः- आह्वरकाः तृतीय प्रथम क्रुष्टान् स्वरान् कुर्वन्ति, तैत्तिरीयाः द्वितीयाद्यान् मन्द्रान्तान् चतुरः स्वरान् तु कुर्वन्ति।।

तृतीयादिस्वरानुसारेणाह्वरकाणां पाठः। द्वितीयाद्यनुसारेण तैत्तिरीयाणाम्।।

प्र-

द्वितीयप्रथमक्रुष्टाः त्रय आह्वरकाः स्वराः।
मन्द्रादयो द्वितीयान्ताः चत्वारस्तैत्तिरीयकाः।।

(तै.प्रा-23.16.17) "आह्वरकाणां स्वराः" इति त्रिभाष्यरत्नकृत्। वैदिकाभरणकृता तु अन्यथा व्याख्यातम्- "आह्वरकाः उत्क्षेपिण" इत्यर्थः। "द्वितीय प्रथमक्रुष्टा" इति पूर्वोक्त क्रमप्रातिलोम्यनिर्देश उत्क्षेपक्रमतदवधि संप्रत्ययार्थः। तेन तृतीयाख्यः मध्यमः स्वरः। स मध्यम उत्क्षेपिताया अवधिर्भवति। ततश्च तृतीयाख्यान्मध्यमस्वरादायामादिभिः उत्क्षेपकारणैः किञ्चिदुत्क्षिप्तः द्वितीयाख्यः स्वरः उत्क्षिप्ततरः प्रथमाख्यः। उत्क्षिप्ततमः क्रुष्टाख्यः। एतेन चतुर्थादीनां परेषां त्रयाणां स्वराणां अवक्षेपितत्वमपि दर्शितं भवति। तत्र मध्यमात्तृतीयाख्यात्स्वरात् अन्ववसर्गादिभिरवक्षेपणकारणैः किञ्चिदवक्षिप्तः चतुरथाख्यः स्वरः। अवक्षिप्ततरः मन्द्राख्यः। अवक्षिप्ततमः अतिस्वार्याख्यः । तदेवं सामवेदवर्तिनः क्रुष्टादयस्सप्तस्वराः सम्यङ् निरूपिताः। तेषु मन्द्रादयः द्वितीयान्ताश्चत्वारः स्वराः प्रतिलोमक्रमेण मन्द्रचतुर्थतृतीयाद्वितीयाः तैत्तिरीयका भवन्ति। तित्तिरिणा प्रोक्तं तैत्तिरीयम्। तत्र भवाः तैत्तिरीयकाः इति। तेषां स्वरनियोजनं च अङ्गुलीषु एवम्-

"उदात्तमाख्याति वृषोङ्गुळीनां
प्रदेशिनी मूलनिविष्टमूर्द्धा ।
उपान्तमध्ये स्वरितं श्रुतञ्च
कनिष्ठिकायामनुदात्तमेव।।
कनिष्ठिकाऽनामिका च मध्यमा च प्रदेशिनी ।
नीचस्वारधृतोदात्तान् अङ्गुष्ठाग्रेण निर्दिशेत्।।

इति त्रिभाष्यरत्ने 23-21

वि- साम्नि तु सप्तस्वरा भवन्तीत्याह-

12. प्रथमश्च द्वितीयश्च तृतीयोऽथ चतुर्थकः।
मन्द्रः क्रुष्टोऽह्यतिस्वार एतान् कुर्वन्ति सामगाः।। 12।।

अन्वयः- सामगाः प्रथमः च द्वितीयः च तृतीयः अथ चतुर्थकः मन्द्रः क्रुष्टः हि अतिस्वारः एतान् स्वरान् कुर्वन्ति।

प्र- अत्र श्लोकानुरोधात्क्रमो न विवक्षितः इति 2- 4 विवरणस्थं वाक्यं अत्र अपेक्षितमिति भाति।। क्रुष्टः- ऊँ[11]।। त[1]द्वि - विद्वाइ इत्यादि प्रथमस्वरः।। इ[2]न्द्रंविश्वाः- इत्यादि द्वितीयस्वरः। इ[3]- इत्यादि तृतीयस्वरः।। हि[4]ताः इत्यादि चतुर्थस्वरः। अ[5]ग्निन्दूताम् - इत्यादि मन्द्रस्वरः। योऽ6 इत्यादि अतिस्वार्यः।।

वि- छन्दोगानां वाजसनेयिनां च ब्राह्मणे गाथास्वरौ प्रथमद्वितीयौ भवतः इत्याह-

13. द्वितीयप्रथमावेतौ ताण्डिभाल्लविनां स्वरौ।
तथा शातपथावेतौ स्वरौ वाजसनेयिनाम् ।। 13।।

अन्वयः- ताण्डिभाल्लविनाम् एतौ द्वितीय प्रथमौ स्वरौ तथा वाजसनेयिनाम् शातपथौ एतौ स्वरौ भवतः।

ताण्ड्यं पञ्चविंशादिकं ब्राह्मणं कौथुमादयः अधीयन्त इति ताण्डिनः, भाल्लविनः छन्दोगा एव। वाजसनेयिनां अध्वर्यूणां शतपथभवौ।।

प्र- अनेन सामवेदसंबन्धिनां अष्टानामपि ब्राह्मणानां प्रथमद्वितीयस्वरौ इत्युक्तं भवति। तत्र भवता भट्टकुमारिलेन तु -

ब्राह्मणानि हि यान्यष्टौ सरहस्यान्यधीयते।
छन्दोगास्तेषु सर्वेषु न कश्चिन्नियतः स्वरः।।

इति छन्दोगब्राह्मणानां स्वरविशेषनियमाभावः स्पष्टमभिहितः कल्पसूत्राधिकरणे (1.3.6) अस्माकं पाठस्तु एकश्रुतिरेव।।

वि- एतत्सर्ववेदविषयकस्य लक्षणस्य नैव विशेषोऽतः संक्षेपेण स्वरनिरूपणं कृतमित्युपसंहरति-

14. एते विशेषतः प्रोक्ताः स्वरा वै सार्ववैदिकाः ।
इत्येतच्चरितं सर्वं स्वराणां सार्ववैदिकम् ।। 14।।

अन्वयः- एते वै विशेषतः सार्ववैदिकाः स्वराः प्रोक्ताः, इति एतत् स्वराणाम् सार्ववैदिकम् सर्वम् चरितम्।

सर्ववेदेषु भवं चरितं स्वरुपम्।।

इति प्रथमा कण्डिका

(1.2)

द्वितीया कण्डिका

वि- अथ छन्दोगानां सामगाने आर्च्चिके च स्वरनिरूपणं विशेषतः क्रियते-

15. सामवेदे तु वक्ष्यामि स्वराणां चरितं यथा ।
अल्पग्रन्थं प्रभूतार्थं श्रव्यं वेदाङ्गमुत्तमम् ।। 1।।

अन्वयः- सामवेदे तु स्वराणां चरितम् यथा अल्पग्रन्थम् प्रभूतार्थम् श्रव्यम् उत्तमम् वेदाङ्गम् वक्ष्यामि।

ऋक्सामलक्षणस्य नैराकांक्ष्यात् प्रभूतार्थम्। सामस्वराणां महता यत्नेनाधिगमात् तदुपायस्य श्राव्यता । उत्तमं वेदाङ्गं वेदस्वरुपविषयत्वात् सामवेदगतस्वरादि निरूपणं क्रियते सामार्थ्यात् सामर्थ्यलभ्यत्वादार्चिकस्य ।

प्र- स्वराणां चरितं स्वराणां स्वरुपं इत्यर्थः।

16. तान राग स्वर ग्राम मूर्च्छनानान्तु लक्षणम् ।
पवित्रं पावनं पुण्यं नारदेन प्रकीर्तितम् ।।2।।

अन्वयः- पवित्रम् पावनम् पुण्यम् तान राग स्वर ग्राम मूर्च्छनानाम् तु लक्षणम् नारदेन प्रकीर्तितम्।

17. शिक्षामाहुर्द्विजातीनामृग्यजुस्सामलक्षणम् ।
नारदीयमशेषेण निरुक्तमनुपूर्वशः ।।3।।

अन्वयः- अशेषेण अनुपूर्वशः निरुक्तम् नारदीयम् ऋग् यजुः साम लक्षणम् द्विजातीनाम् शिक्षाम् आहुः।

18. सप्तस्वरास्त्रयोग्रामाः मूर्च्छनास्त्वेकविंशतिः।
तान एकोनपञ्चाशदित्येतत्स्वरमण्डलम् ।।4।।

अन्वयः- स्वराः सप्त ग्रामाः त्रयः मूर्च्छनाः तु एकविंशतिः तान एकोनपञ्चाशत् इति एतत् स्वरमण्डलम् ।

वि- स्वराणां समूहो मण्डलम्। तस्य नाम्ना निरूपणं क्रियते।

19. षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा।
पञ्चमो धैवतश्चैव निषादः सप्तमस्वरः ।।5।।

अन्वयः- षड्जः च ऋषभः च एव गान्धारः मध्यमः तथा पञ्चमः धैवतः सप्तमः स्वरः निषादः च एव।

प्र- षड्जादयः लौकिकवैदिकोभयसाधारणाः। सामवेदे तु क्रुष्ट - प्रथम - द्वितीय - तृतीय- चतुर्थ- मन्द्रातिस्वार्याख्याः सप्तस्वराः। तेषामुदाहरणं पूर्वमेवोक्तम् (1.1.12)। लौकिके गाने तु षड्जादीनां प्रयोगसौकर्यार्थं तेषामाद्याक्षराण्युद्धृत्य व्यवहारः क्रियते सरिगमपधनि इत्येवम्। तथा च शार्ङ्गदेवः- "तेषां संज्ञाः सरिगमपधनीत्यपरा मताः" इति (सं.र-1.3.25)

20. षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्तिताः।

अन्वयः- त्रयः षड्ज मध्यम गान्धाराः ग्रामाः प्रकीर्तिताः।

वि- षड्जानुसारेण कदाचित् स्वरः प्रवर्तते। मध्यमानुसारेण गान्धारानुसारेण वा। अत एव ग्रामत्रयमेव, प्रधानमुखेनेतरेषामवधारणात्, एकदेशोपाधिवशेन यथा जनपदादेः ग्रामत्वम्।।

प्र- ग्रामो नाम स्वरसमूहः। तदुक्तं शार्ङ्गदेवेन- "ग्रामः स्वरसमूहस्स्यान्मूर्च्छनादेस्समाश्रयः" इति। अस्यार्थः- "ग्रामवद् ग्रामः"। यथा लोके "जनसमूहो ग्राम" इत्युच्यते एवमत्र "स्वरसमूहो ग्राम" इति विवक्षितः इति (सं.र. 1.4.1)

वि- गान्धारानुसारेण तु मनुष्यलोके स्वरावस्थानं स्फुटमुपलभ्यत इत्याह-

भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः।।6।।
21. स्वर्गान्नान्यत्र गान्धारो नारदस्य मतं यथा।

अन्वयः- षड्जः भूर्लोकात् जायते, मध्यमः च भुवर्लोकात् जायते, यथा नारदस्य मतम्, गान्धारः स्वर्गात् अन्यत्र न भवति।

प्र-

गान्धारग्राममाचष्टे तदा तं नारदो मुनिः।
प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले।।

इति (सं.र.1.4.5)

वि- दीप्ताऽयता स्वरश्रुतिविशेषपरैव ग्रामाणाम्। ग्रामरागाः ग्रामरागप्रकारादवधार्यन्त इत्याह-

स्वररागविशेषेण ग्रामरागा इति स्मृताः ।।7।।

अन्वयः- स्वररागविशेषेण ग्रामरागाः इति स्मृताः।

रागप्रकारानवधारयन्नाह -

22. विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश।
तानान्पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान् ।।8।।

अन्वयः- मध्यमग्रामे विंशतिम् तानान् इच्छन्ति, षड्जग्रामे चतुर्दश, गान्धारग्रामम् आश्रितान् तानान् पञ्चदश इच्छन्ति।

परस्परं स्वराणां तननात्तानाः। वैचित्र्येण मध्यमादनन्तरं गान्धारः ततः षड्जः तत ऋषभः इत्येवं प्रकारेण स्वराणां प्रयोगे मध्यमग्रामे विंशतिस्ताना भवन्ति। तथा षड्जग्रामे चतुर्दश। गान्धारग्रामे पञ्चदश इत्येवं एकोनपञ्चाशदुच्यन्ते तानाः।।

प्र- तानाः तन्यन्ते विस्तार्यन्त इति तानाः।

23. नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा।
बला या चाऽथ विज्ञेया देवानां सप्तमूर्च्छनाः ।।9।।

अन्वयः- नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा अथ या च बला देवानाम् सप्त मूर्च्छना विज्ञेया।

वि- बला या च बला नाम अथैतास्सप्तेति संबन्धः।।

प्र- क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम्। "मूर्च्छनेत्युच्यते" इति शार्ङ्गदेवः ।। यथा करणभूतया रागो मूच्छ्र्यते व्याप्यत इति श्रोता मूछ्र्यते व्याप्यत इति वा मूर्च्छना (सं.र.1.4.9)

24. आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी ।
मैत्री च बार्हती चैव पितृणां सप्तमूर्च्छनाः।। 10।।

अन्वयः- आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी मैत्री च बार्हती च एव सप्त पितृणाम् मूर्च्छनाः विज्ञेयाः।

25. षड्जेतूत्तरमन्द्रास्यादृषभे चाभिरुद्गता।
अश्वक्रान्ता तु गान्धारे तृतीया मूर्च्छना स्मृता ।।11।।

26. मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे ।
धैवते चापि विज्ञेया मूर्च्छना तूत्तरायता ।। 12।।

27. निषादाद्रजनी विद्यात् ऋषीणां सप्तमूर्च्छनाः।

अन्वयः- षड्जे तु उत्तरमन्द्रास्यात्, ऋषभे तु अभिरुद्गता, गान्धारे तु अश्वक्रान्ता, तृतीया मूर्च्छना स्मृता, मध्यमे खलु सौवीरा, पञ्चमे स्वरे हृष्यका, धैवते च अपि तु मूर्च्छना उत्तरायता विज्ञेया, निषादात् रजनी (एवम्) ऋषीणाम् सप्त मूर्च्छनाः विद्यात्।

वि- स्वराणां समुच्छ्रयणात् ऊर्द्ध्वमुच्छ्रयणात् प्रेरणं मूर्च्छना। प्रतिग्रामं स्वरसप्तकभावनादेकविंशतिर्भवन्ति। नन्दी विशालेति देवापेक्षया मूर्च्छनासप्तकमुक्तं न तु ग्रामापेक्षया। अतश्च ग्रामत्रये देवानां सप्त इति देवमूर्च्छना तथा पितृणां ऋषीणाञ्च सप्त। नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा। बला इत्यन्वर्थानुसारेण संज्ञाः देवतार्थे चेति आगम एवावगन्तव्यम्। यथा स्वरवर्णनिर्देशः। आप्यायनी विश्वभृतेत्यादि पितृणां मूर्च्छनास्सप्त इति पितृमूर्च्छनाः। उत्तरमन्द्राभिरुद्गताऽश्वक्रान्ता सौवीरा हृष्यका उत्तरायता रजनीति षड्जादि स्वरगताः सप्तर्षिसंबन्धिन्यः उक्ता इति ऋषि मूर्च्छनाः।।

प्र- तासामन्यानि नामानि नारदो मुनिरब्रवीत्। मूर्च्छनोत्तर वर्णाद्या षड्जग्रामेऽभिरुद्गता। अश्वक्रान्ता च सौवीरि हृष्यकाचोत्तरायता। रजनीति समाख्याता ऋषीणां सप्त मूर्च्छनाः। आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी । मैत्री चन्द्रावती पित्र्या मध्यमे मूर्च्छना इमाः। नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा । आलापे चेति गान्धारग्रामे स्युः सप्त मूर्च्छनाः। ताश्च स्वर्गे प्रयोक्तव्याः विशेषात्तेन नोदिताः । इति (शां. दे, सं.र-1.4.22-26)

वि- देवमूर्च्छनानां गन्धर्वा अनुयायिनः। पितृमूर्च्छनानां यक्षाः। ऋषिमूर्च्छनानां मनुष्याः इत्याह-

उपजीवन्ति गन्धर्वा देवानां सप्तमूर्च्छनाः ।। 13 ।।

28. पितृणां मूर्च्छनास्सप्त तथा यक्षा न संशयः।
ऋषीणां मूर्च्छनास्सप्त यास्त्विमा लौकिकाः स्मृताः।।14

अन्वयः- गन्धर्वाः देवानाम् सप्त मूर्च्छनाः उपजीवन्ति, तथा यक्षाः पितृणां सप्त मूर्च्छनाः, संशयः न, याः तु इमा ऋषीणां सप्त मूर्च्छनाः, (ताः) लौकिकाः स्मृताः। उत्तरमन्द्रादिका या मूर्च्छना ऋषीणां सप्तलौकिकाः इति।

वि- षड्जादिभिः सप्तभिः स्वरैः सहिताभिः उच्चार्यमाणैः देवादयः परितुष्यन्तीत्याह।

29. षड्जः प्रीणाति वै देवानृषीन् प्रीणाति चर्षभः।
पितृन् प्रीणाति गान्धारो गन्धर्वान् मध्यमः स्वरः।। 15।।

30. देवान् पितृन् ऋषींश्चैव स्वरः प्रीणाति पञ्चमः।
यक्षान्निषादः प्रीणाति भूतग्रामञ्च धैवतः ।। 16।।

अन्वयः-षड्जः देवान् प्रीणाति वै, ऋषभः च ऋषीन् प्रीणाति, गान्धारः पितृन् प्रीणाति, मध्यमः स्वरः गन्धर्वान् प्रीणाति,पञ्चमः स्वरः देवान् पितृन् ऋषीन् च एव प्रीणाति, धैवतः च भूतग्रामम्, निषादः यक्षान् प्रीणाति।

उत्तरमन्द्रादिकादिभिः मूर्च्छनाभिः सहोच्चार्यमाणः षड्जादयः क्रमेण देवादीन् प्रीणयन्तीत्यर्थः।।

प्र- षड्जः प्रीणाति वै देवानित्यादि। तदुक्तं सामविधौ "तद्योऽसौ क्रुष्टतम इव साम्नि स्वरस्तं देवा उपजीवन्ति योऽवरेषां प्रथमस्तं मनुष्या यो द्वितीयस्तं गन्धर्वाप्सरसो यस्तृतीयस्तं पशवो यश्चतुर्थस्तं पितरो ये चाण्डेषु शेरते यः पञ्चमस्तमसुररक्षांसि योन्त्यस्तमोषधिवनस्पतयो यच्चान्य-ज्जगत्" इति (सा.वि.ब्रा .1.3)।।

तमुपजीवन्ति तेन तृप्ता भवन्तीत्यर्थः। एवमुत्तरेष्वपि वाक्येषु योज्यम्। अण्डेषु ब्रह्माण्डेषु । शेरते निवसन्ति। एतेन कृत्स्नस्यापि जगतः सामोपजीवित्वमुक्तम्।।

इति द्वितीया खण्डिका।।

(1.3)

तृतीया कण्डिका

वि- लौकिकं वैदिकञ्च गानं दशगुणयुक्तं कार्यमित्यु-च्यते। गानस्य दशविधा गुणवृत्तिस्तद्यथा-

31. रक्तं पूर्णं अलङ्कृतं प्रसन्नं व्यक्तं विक्रुष्टं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणाः ।।1।।

वि- रक्तादीनां परस्परं विवेकेन स्वरूपनिर्देशः क्रियते-

32. तत्र रक्तन्नाम वेणुवीणास्वराणामेकीभावे रक्तमित्युच्यते ।।2।।

वि- वंशवीणापुरुषस्वराणामभेदे सति या रञ्जना तद्रक्तमित्युच्यते।

33. पूर्णन्नाम स्वरश्रुतिपूरणात् छन्दःपादाक्षरसंयोगात् पूर्णमित्युच्यते ।।3।।

वि- स्वरो मध्यमादिस्वरविशेषः। श्रुतिः वक्ष्यमाणा। स्वरश्रुत्योरनयोः करणं पूरणम्। छन्दसः पादानामक्षराणाञ्च संयोगात् स्फुटमुच्चारणं तत्पूर्णम्।।

34. अलङ्कृतन्नाम उरसि शिरसि कण्ठमित्यलङ्कृतम् ।।4।।

वि- मध्यमस्थाने यदवस्थितन्नीचैः उरसि स्थितं क्रियते। शिरसि चोच्चैर्वा क्रियते तदलङ्कृतं तत्र भवति।।

35. प्रसन्नं नाम अपगतगद्गदं निर्विशङ्कं प्रसन्नमित्युच्यते ।।5।।

वि- कण्ठनिष्पीडनेनोच्चारणं गद्गदं तदपगतं यत्रेति निर्गता विविधा शङ्का यत्रेति तत्प्रसन्नम्।।

श्लोकान्तर्गतानां पदादीनां गीत्याश्चावधारणं सम्यग-वधारणात् व्यक्तमित्याह-

36. व्यक्तन्नाम पदपदार्थ - प्रकृति - विकारागम - लोप - कृत्तद्धित - समास- धातु निपातोपसर्ग- स्वर- लिङ्ग- वृत्ति- वार्तिक - विभक्त्यर्थ- वचनानां सम्यगुपपादने व्यक्तमित्युच्यते ।।6।।

पदस्यार्थानुसारेण प्रकृतेर्धातोः प्रातिपदिकस्य व्यवधारणम्। वृद्ध्यादिकाः विकाराः। प्राकृतवार्ता ए हे वा गूढार्थं स्फुटव्यहनिकार्यम् (असु) सुडित्याद्यागमः। उपधादि लोपः। कृत्तद्धिताः प्रत्ययाः। इयं प्रकृतिश्चायं धातुः। अयं निपातभागः। अयमुपसर्गभागः इति विवेक्तव्यम्। द्वन्द्वतत्पुरुषादयः समासाः। स्वर उदात्तादिः। स्त्रीपुन्नपुंसकानि लिङ्गानि। सामान्येनार्थावधारणं वृत्तिः। ऊहापोहवशेनार्थावधारणं वार्तिकम्। कर्तृकर्माद्यवधारणं विभक्त्यर्थः। एकद्विबहुत्वावगमो वचनम्। एवं परिज्ञाने व्यक्तताऽवगमः।।

37.विक्रुष्टन्नामोच्चैरुच्चारितं व्यक्तपदाक्षरं विक्रुष्टमित्युच्यते।। 7

वि- उच्चैरुच्चारणेऽपि पदाक्षराणां स्फुटता यत्र भवति नाव्यक्तत्वं तद्विक्रुष्टम्।

वि- शोभनयाऽत्वरितादिकया वृत्या वर्तत इति श्लक्ष्णमित्याह-

38. श्लक्ष्णन्नामाद्रुतमविलम्बितमुच्चनीचप्लुतसमाहारं हेलतालोपनयादिभिरुपपादनादिभिः श्लक्ष्णमित्युच्यते ।।8।।

अत्वरितं गानमद्रुतं विशुद्धं सममविलम्बितं उच्चनीचप्लुतानां समाहरणं समाहार इति यावत्। यत्र नात्युच्चं नातिनीचम्। प्लुतं त्रिमात्रमेव। अतश्च ह्रस्वमेकमात्रं दीर्घं द्विमात्रम्। दीर्घाच्च वैषम्यं कार्यमिति सामर्थ्यादुक्तं भवति। हेलया सहवेलया तालस्य द्रुताया वृत्तेरुपनयः सम्पादनम्। आदिग्रहणान्मध्यमाया विलम्बितायाश्च ग्रहणम्। तच्च स्फुटवाचपुटाच्चतत्पीता आत्मवृत्तयो गीतेत्युच्यते।।

39. समन्नाम आवापनिर्वापप्रदेशप्रत्यन्तरस्थानानां समासस्समित्युच्यते ।।9।।

वि- स्वरस्यापूरणं प्रक्षेपः आवापः। निर्वापो न्यूनताकरणम्। तेषामावापनिर्वापप्रदेशानां प्रत्यन्तरेषु व्यवहितेषु स्थानेषु समं समप्रक्षेपः न व्युत्क्रमेणेति समं गानं भवति।

40. सुकुमारन्नाम मृदुपदवर्णस्वरकुहरणयुक्तं सुकुमारमित्युच्यते ।।10।।

वि- मृदुभिः पदाक्षराद्युच्चारणैर्युक्तं न कठिनैः। कुहरणं अव्यक्तानां वर्णानां कण्ठनिष्पीडनेनोच्चारणम्।

41. मधुरन्नाम स्वभावोपनीतललितपदाक्षरगुणसमृद्धम्मधुरमित्युच्यते ।।11।।

वि- ललिताः प्रहर्षितमुखाऽऽस्याद्यैर्निस्सृताः पदाक्षरगताः गुणाः तैर्युक्तं सुखकरं गानम्। एवमेतैर्दशभिर्गुणैर्युक्तं गानं भवति। एतद्विपरीता गीतिदोषा उच्यन्ते।

भवन्ति चाऽत्र श्लोकाः-

42. शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसिगतं तथा स्थानविवर्जितम्।। 12।।

43. विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्।
व्याकुलन्तालहीनञ्च गीतिदोषाश्चतुर्दश।। 13।।

अन्वयः- अत्र श्लोकाः च भवन्ति, शङ्कितम् भीतम् उद्घृष्टम् अव्यक्तम् अनुनासिकम् काकस्वरम् शिरसिगतम् तथा स्थानविवर्जितम् विस्वरम् विरसम् च एव विश्लिष्टम् विषमाहतम् व्याकुलम् तालहीनम् च चतुर्दश गीतिदोषाः भवन्ति।

वि- शङ्कितस्य च भीतस्य च गानं शङ्कितं भीतञ्च। क्षुब्धं गानमुद्घृष्टम्। अव्यक्तमस्फुटम्। नासिकास्थानप्राधान्येन गानं अनुनासिकम्। कण्ठस्थाननिष्पीडनेन गानं काकस्वरम्। अत्युच्चैरपरिपूर्णं गानं शिरसि गतम्। एकस्थानविषयस्य गानस्यानेकस्थानयोगात् स्थानविवर्जितम्। यस्मिन् वर्णे यत्स्वरो विहितः तस्याविरामात् विस्वरम्। गानमध्ये चित्तव्याक्षेपाद्विरसम्। पर्वणामप्राप्तव्यवधानकरणाद्विश्लिष्टम्। प्लुतस्य दीर्घं ह्रस्वश्च। दीर्घह्रस्वयोश्च विलम्बितं पातनं विषमाहतम्। वर्णस्वरादि वैषम्येन गानं व्याकुलम्। वृत्तीनामनियमेन प्रवर्तनं तालहीनम्।।

44. आचार्यास्सममिच्छन्ति पदच्छेदन्तु पण्डिताः।
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः।। 14।।

अन्वयः- आचार्याः समम् इच्छन्ति, पण्डिताः तु पदच्छेदं, स्त्रियः मधुरम् इच्छन्ति, इतरे जनाः विक्रुष्टम् इच्छन्ति।

वि- समपदच्छेदमधुरोच्चारणरूपं गानं चतुः प्रकारं कर्तव्यमित्याचार्यादि मुखेनोच्यते। न तु समादीनां विकल्पः। विक्रुष्टन्तु न नियमं इतरग्रहणात्।।

प्र- शार्ङ्गदेवेन तु एते गीतिगुणाः किञ्चिद्भेदेनाभिहिताः। तद्यथा-

दशैते स्युर्गुणा गीतेस्तत्र व्यक्तं स्फुटैः स्वरैः।
प्रकृतिप्रत्ययैश्चोक्तं छन्दोरागपदैः स्वरैः।।
पूर्णं पूर्णाङ्गगमकं प्रसन्नं प्रकटार्थकम्।
सुकुमारं कण्ठभवं त्रिस्थानोत्थमलङ्कृतम्।।
समवर्णलयस्थानं सममित्यभिधीयते।
सुरक्तं वल्लकीवंशकण्ठध्वन्यैकतायुतम्।।
नीचोच्चद्रुतमध्यादौ लक्ष्णत्वे श्लक्ष्णमुच्यते।
उच्चैरुच्चारणादुक्तं विक्रुष्टं भरतादिभिः।।

इति (सं.र.375-377)

गीतिदोषाश्च तन्मते दशैव-

दुष्टं लोकेन शास्त्रेण श्रुतिकालविरोधि च।
पुनरुक्तं कलाबाह्यं गतक्रममपार्थकम्।
ग्राम्यं सन्दिग्धमित्येवं दशधा गीतिदुष्टता ।।

इति (सं.र.378,379)

इति तृतीया कण्डिका

(1.4)

चतुर्थी कण्डिका

वि- वर्णस्वरच्छन्दोमन्त्रसामाधिष्ठात्र्यो देवता भवन्ति। तासां चेच्छावशेनाऽधिष्ठेयापेक्षया शरीरग्रहणे पद्मपत्रादिरूपता भवन्तीत्यागमादवधार्यत इत्याह-

45. पद्मपत्रप्रभष्षड्ज ऋषभश्शुकपिञ्जरः।
कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः ।।1।।
46. पञ्चमस्तु भवेत्कृष्णः पीतकं धैवतं विदुः।
निषादस्सर्ववर्णश्च इत्येतत्स्वरवर्णता ।।2।।

अन्वयः- षड्जः पद्मपत्रप्रभः, ऋषभः शुकपिञ्जरः, गान्धारः तु कनकाभः, मध्यमः कुन्दसप्रभः, पञ्चमः तु कृष्णः भवेत्, धैवतं पीतकं विदुः, निषादः सर्ववर्णः स्यात् इति एतत् स्वरवर्णताः ज्ञेयाः ।

47. पञ्चमो मध्यमः षड्जः इत्येते ब्राह्मणाः स्मृताः।
ऋषभो धैवतश्चापि इत्येतौ हि क्षत्रियावुभौ ।।3।।
48. गान्धारश्च निषादश्च वैश्यावर्द्धेन तत्समौ ।
शूद्रत्वं विद्धि चार्द्धेन पतितत्वान्न संशयः ।।4।।

पञ्चमस्योत्कर्षात् मध्यमषड्जयोश्च ग्रामत्वाद् ब्राह्मणत्वं उत्कर्षसामान्यात्। ऋषभधैवतयोश्च बलयोगात् क्षत्रियत्वम्। गान्धारस्य मध्यमादवरोहात् धैवताच्च निषादस्यावरोहात् वैश्यत्वं शूद्रत्वं च प्रतिपाद्यते।।

वि- दुःखषाडवस्य मध्यमस्य लक्षणमेवमर्थं क्रियते। यथा स्वरसन्निवेशेन ग्रामवैचित्र्यं लौकिके गाने एवं स्वरसन्निवेशेन वैचित्र्यात् सामगानं अनन्तप्रभेदं भवति इत्याह।।

49. ऋषभोत्थितषड्जहतो धैवतसहितश्च पञ्चमो यत्र।
निपतति मध्यमरागे तं निषादं षाडवं विद्यात् ।।5।।

अन्वयः- यत्र मध्यमरागे ऋषभोत्थितषड्जहतः धैवतसहितः च पञ्चमः निपतति तं निषादं षाडवं विद्यात्।

ऋषभादनन्तरं योऽसौ षड्जः तेन धैवतसहितः पञ्चमः प्रतिहतो यत्र गाने मध्यमरागे मध्यमग्रामे तत्सहितन्निषादं षाडवं विजानीयात्। गान्धाराभावे तु षाडवम्।।

वि- स्वरपञ्चकेन गीयमानस्य मध्यमरागस्यादित्वेन लक्षणं क्रियते-

50. यदि पञ्चमो विरमते गान्धारश्चान्तरस्वरो भवति।
ऋषभो निषादसहितस्तं पञ्चममीदृशं विद्यात् ।।6।।

अन्वयः- यदि पञ्चमः विरमते, गान्धारः च अन्तरस्वरः भवति, निषादसहितः ऋषभः तम् पञ्चमम् ईदृशम् विद्यात्।

मध्यमरागः इत्यनुवर्तते। मध्यमे पञ्चमस्य विरामे गान्धारस्तत ऋषभः। ततो निषादः पञ्चमः इति क्रमः।

वि- पुनर्मध्यमलक्षणमुच्यते-

51. गान्धारस्याऽधिपत्येन निषादस्य गतागतैः।
धैवतस्य च दौर्बल्यान्मध्यमग्राम उच्यते ।।7।।

अन्वयः- गान्धारस्य आधिपत्येन निषादस्य गतागतैः धैवतस्य दौर्बल्यात् च, मध्यमग्राम उच्यते।

मध्यमप्रारम्भे गान्धारस्याधिपत्यमाधिक्यं यदा भवति निषादस्य गमनमागमनञ्च पुनः पुनरुच्चारणम्। धैवतस्य दौर्बल्यं

सकृदुच्चारणमिति यावत्। षड्जऋषभपञ्चमानां सामान्येनावस्थानं तदा मध्यमग्रामो भवति।।

वि- षड्जग्रामस्य लक्षणं क्रियते-

52. ईषत्स्पृष्टो निषादस्तु गान्धारश्चाधिको भवेत्।
धैवतः कम्पितो यत्र षड्जग्रामन्तु निर्दिशेत् ।।8।।

अन्वयः- यत्र निषादः तु ईषत् स्पृष्टः, गान्धारः च अधिकः भवेत्, धैवतः कम्पितः, तु षड्जग्रामम् निर्दिशेत्।

षड्जप्रारम्भे निषादस्य लाघवेनोच्चारणं गान्धारस्याधिक्येनोच्चारणं ततो धैवतस्य कम्पनं पातनं स्वरान्तरागमनं अनन्तरं यथारुचिगानं एवं षड्जग्रामो भवति।

वि- षड्जग्रामरागलक्षणं क्रियते-

53. अन्तरस्वरसंयुक्ता काकलिर्यत्र दृश्यते।
तन्तु साधारितं विद्यात् पञ्चमस्थन्तु कैशिकम् ।।9।।

अन्वयः- यत्र अन्तरस्वरसंयुक्ता काकलिः दृश्यते कैशिकम् तु पञ्चमस्थं तम् तु साधारितम् विद्यात्।

षड्जप्रारम्भे चतुश्रुतिको गान्धारोन्तरसंज्ञितो यः तेन संयुक्ता काकलिश्चतुश्रुतिक एव निषादो यदा भवति तदा पञ्चमस्थं परं पर्यवसितं तं साधारितं सदृशश्रुतिकैशिकसंज्ञं गीतकं भवतीति।

वि- मध्यमग्रामे लक्षणञ्च श्लोकद्वयेनोच्यते-

54. कैशिकं भावयित्वा तु स्वरैस्सर्वैस्समन्ततः।
यस्मात्तु मध्यमे न्यासः तस्मात्कैशिकमध्यमः ।।10।।

अन्वयः- यस्मात् तु समन्ततः सर्वैः स्वरैः कैशिकम् तु भावयित्वा मध्यमे न्यासः क्रियते तस्मात् कैशिकमध्यमः उच्यते।

55. काकलिर्दृश्यते यत्र प्राधान्यं पञ्चमस्य तु।
कश्यपः कैशिकं प्राह मध्यमग्रामसम्भवम्।। 11।।

अन्वयः- यत्र काकलिः दृश्यते, प्राधान्यम् तु पञ्चमस्य मध्यमग्राम सम्भवम् कश्यपः कैशिकम् प्राह।

पूर्वोक्तः कैशिकः यदा स्वरैस्सर्वैर्भाव्यते योज्यते मध्यमादुपक्रम्यते मध्यमे च न्यस्यते तत्र स्थाप्यते तदा कैशिक मध्यमग्रामरागो भवति। मध्यमग्रामादुत्पन्नस्य काकलिरेव चतुश्रुतिको निषादो भवति। पञ्चमस्य प्राधान्यं पुनः पुनरुच्चारणं शेषाणि स्वरान्तराणि सामान्येन वर्तन्ते तदा मध्यमग्रामसम्भवं कैशिकं कश्यप ऋषिराह।।

वि- वीणादिसहितं हस्ताङ्गुलिचातुर्येणाऽभ्यस्तं स्फुटं यदावधृतं भवति तदनुसारेण सामस्वराधिगमः सम्यक् भवतीति निर्वचनेन प्रतिपाद्यते-

56. गेति गेयं विदुः प्राज्ञा धेति कारुप्रवादनम् ।
वेति वाद्यस्य संज्ञेयं गन्धर्वस्य विरोचनम् ।। 12।।

अन्वयः- प्राज्ञाः गा इति गेयम् विदुः, ध इति कारुप्रवादनम्, व इति वाद्यस्य संज्ञानम्, (एतत्) गान्धर्वस्य विरोचनम्।

गन्धर्वेभ्य आगतं गान्धर्वं तस्याक्षरोपलक्षितार्थप्रतिपादनेन विरोचनं विशेषतो रोचनं उद्दीपनं भवति। तद्विवरणमाह गशब्देन गानं लक्ष्यते। धकारेण कारोर्वैणिकस्य प्रवादनं चातुर्येण हस्ताङ्गुलिधारणं प्रवादनपदेन कथितम्। वकारेण वाद्यस्य वादनं लक्षितम्।।

इति चतुर्थी कण्डिका

(1.5)

पञ्चमी कण्डिका

वि- लौकिके गाने स्वराणां मध्यमादिस्वरशब्दैर्व्यवहारः प्रायेण सर्वेषां स्वराभावात्। वैदिके तु पञ्चमनिषादादयः क्वचिदेव भवेत्। हस्ताङ्गुळिनिवेशनेन चापि सम्यगवधारणात् प्रथमादि संज्ञा। अङ्गुळिनिवेशनञ्च स्वराणां क्रियते-

57. यस्सामगानां प्रथमस्स वेणोर्मध्यमः स्वरः।
यो द्वितीयस्स गान्धारः तृतीयस्त्वृषभः स्मृतः।। 1।।

58. चतुर्थष्षड्ज इत्याहुः पञ्चमो धैवतो भवेत्।
षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः।।2।।

अन्वयः- सामगानाम् यः प्रथमः स वेणोः मध्यमः स्वरः, यः द्वितीयः स गान्धारः, तृतीयः तु ऋषभः स्मृतः, चतुर्थः षड्ज इति आहुः, पञ्चमः धैवतः भवेत्, षष्ठः निषादः विज्ञेयः, सप्तमः (स्वरः सः वेणोः) पञ्चमः स्मृतः।

वि- वेणुवंशपरिज्ञानार्थमिदमुच्यते-

59. षड्जम्मयूरो वदति गावो रम्भन्ति चर्षभम्।
अजाविके तु गान्धारं क्रौञ्चो वदति मध्यमम् ।।4।।

60. पुष्पसाधारणे काले पिको वक्ति च पञ्चमम्।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ।।5।।

अन्वयः- मयूरः षड्जम् वदति, गावः च ऋषभम् रम्भन्ति, अजाविके तु गान्धारम्, क्रौञ्चः मध्यमम् वदति, पिकः पुष्पसाधारणे काले पञ्चमम् वक्ति,अश्वः तु धैवतम् वक्ति, कुञ्जरः निषादम् वक्ति।

वि- रम्भन्ति उच्चारयन्ति। पुष्पाणान्नानाजातीयानां साधारणः उद्भवकालः वसन्त इति यावत्। तत्र बहूनि पुष्पाणि सम्भवन्ति।

वि- प्राधान्येन कण्ठादिस्थानतां षड्जादीनामित्याह-

61. कण्ठादुत्तिष्ठते षड्जः शिरसस्त्वृषभः स्मृतः।
गान्धारस्त्वनुनासिक्यः उरसो मध्यमः स्वरः ।।6।।

62. उरसश्शिरसः कण्ठादुत्थितः पञ्चमः स्वरः ।
ललाटाद्धैवतं विद्यान्निषादं सर्वसन्धिजम् ।।7।।

अन्वयः- षड्जः कण्ठात् उत्तिष्ठते, ऋषभः तु शिरसः स्मृतः, गान्धारः तु अनुनासिक्यः, मध्यमः स्वरः उरसः, पञ्चमः स्वरः उरसः शिरसः कण्ठात् उत्थितः, धैवतम् ललाटात् विद्यात्, निषादम् सर्वसन्धिजम् ।

मुखेनानुगता नासिका अनुनासिका। तया सहितः आनुनासिक्यः। उरसि तिष्ठते मध्यमः स्वरः। स्थानत्रयादुत्पन्नः पञ्चमः स्वरः। ललाटादुत्थितः धैवतः सर्वेभ्यः कण्ठादिभ्यस्सन्धिभ्यो जायत इति सर्वसन्धिजं निषादं विद्यात्।।

वि- कण्ठादुत्पद्यमाना अपि षड्जादयः अन्यान्यपि स्थानानि गुणत्वेन स्पृशन्तीत्याह-

63. नासाकण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः।
षड्भिस्सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः।।7।।

अन्वयः- यस्मात् नासाम् कण्ठम् उरः तालु जिह्वाम् दन्तान् च संश्रितः षड्भिः सञ्जायते, तस्मात् षड्ज इति स्मृतः।

वि- ऋषभश्शिरस उत्पद्यमानः कण्ठमपि स्पृशतीत्याह-

64. वायुस्समुत्थितो नाभेः कण्ठशीर्षसमाहतः।
नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते ।।8।।

अन्वयः- यस्मात् नाभेः समुत्थितः कण्ठशीर्षसमाहतः वायुः ऋषभवत् नर्दति, तस्मात् ऋषभः उच्यते।

वि- गान्धारश्शिरसो नासिकाप्रदेशादुत्पन्नः कण्ठमपि स्पृशतीत्याह-

65. वायुस्समुत्थितो नाभेः कण्ठशीर्षसमाहतः।
नासागन्धावहः पुण्यः गान्धारस्तेन हेतुना ।।9।।

अन्वयः- नाभेः समुत्थितः कण्ठशीर्षसमाहतः पुण्यः वायुः नासागन्धावहः, तेन हेतुना गान्धारः (उच्यते)।

शीर्षशब्देन नासिकोच्यते। नासया गन्धानावहतीति नासागन्धावहः। गान्धारो नासिक्यो वायुः। तन्निस्सृतः स्वरः गान्धारः। पुण्यः शोभनः।।

वि- उरस उत्पन्नः हृदयन्नाभिञ्च स्पृशति मध्यम इत्याह-

66. वायुस्समुत्थितो नाभेरुरो हृदि समाहतः।
नाभिं प्राप्तो महानादः मध्यमत्वं समश्नुते।। 10।।

अन्वयः- नाभेः समुत्थितः उरोहृदि समाहतः नाभिम् प्राप्तः महानादः वायुः मध्यमत्वम् समश्नुते।

नाभेरवस्थानादुत्क्रान्तः उरोमध्ये अवस्थानात् उच्चनीच-मध्येऽवस्थानाच्च मध्यमस्य च मध्यमत्वम्।।

वि- कण्ठादिभ्य उत्पन्नः नाभिहृदयस्पर्शनात् पञ्चस्थानः पञ्चम इत्याह-

67. वायुस्समुत्थितो नाभेः उरोहृत्कण्ठशिरोहतः।
पञ्चस्थानस्थितस्यास्य पञ्चमत्वं विधीयते ।। 11।।

अन्वयः- नाभेः समुत्थितः वायुः उरो हृत् कण्ठ शिरोहतः पञ्चस्थानस्थितस्य अस्य पञ्चमत्वम् विधीयते।

वि- निषादस्य सर्वसन्धिजत्वात्। धैवतस्य मुख्यतया ललाटजत्वेऽपि सर्वसन्धिस्पर्शः। षड्जस्य षट्स्थानत्वम्। शेषाः स्वराः गौणेन मुख्येन च रुपेण पञ्चस्थानानि स्पृशन्तीत्याह-

68. धैवतञ्च निषादञ्च वर्जयित्वा स्वरद्वयम्।
शेषान्पञ्चस्वरांश्चान्यान्पञ्चस्थानोत्थितान्विदुः।। 12।।

अन्वयः- धैवतम् च निषादम् च स्वरद्वयम् वर्जयित्वा शेषान् अन्यान् पञ्चस्वरान् तु पञ्चस्थानोत्थितान् विदुः।

पञ्चस्थानस्थितत्वेन सर्वस्थानानि धार्यते।।
अतो न षड्जस्य पञ्चस्थानत्वमेव।।
प्र-मतङ्गादिभिः षड्जादिनां स्वरूपाण्येवं वर्णितानि-

षण्णां स्वराणां जनकः षड्भिर्वा जन्यते स्वरैः।
षड्भ्यो वा जायतेऽङ्गेभ्यष्षड्ज इत्यभिधीयते।।
प्राप्नोति हृदयं शीघ्रमन्यस्मादृषभः स्मृतः।
स्त्रीगविषु यथा तिष्ठन्विभाति ऋषभो महान्।।
स्वरग्रामे समुत्पन्नः स्वरोऽयमृषभस्तथा।
वाचं गानात्मिकां धत्त इति गान्धारसंज्ञकः।।
स्वराणां मध्यमत्वाच्च मध्यमः स्वर उच्यते।
(सप्तानां स्वराणां चतुर्थस्य मध्यस्थत्वात्)
स्वरान्तराणां विस्तारं यो मिमीते स पञ्चमः।।
पाठक्रमेण गणने सङ्ख्यया पञ्चमोऽथवा।
धीर्यस्यास्ति स धीवान् तत्संबन्धी धैवतः स्मृतः।।
यद्वा षष्ठस्थाने युतो यस्मात्ततोऽसौ धैवतो मतः।

(षष्ठस्थाने ललाटस्थाने)

निषीदन्ति स्वरास्सर्वे निषादस्तेन कथ्यते ।। इति

वि-स्वाध्यायादौ षड्जादिस्वरगाने अग्न्यादिरुपतामात्मनि चिन्तये-दित्युच्यते-

69. अग्निगीतः स्वरष्षड्ज ऋषभो ब्रह्मणोच्यते ।।
सोमेन गीतो गान्धारो विष्णुना मध्यमः स्वरः ।।13।।

70. पञ्चमस्तु स्वरो गीतो नारदेन महात्मना।
धैवतश्च निषादश्च गीतौ तुम्बुरुणा स्वरौ।। 14।।

अन्वयः- षड्जः स्वरः अग्निगीतः, ऋषभः ब्रह्मणा उच्यते, गान्धारः सोमेन गीतः, मध्यमः स्वरः विष्णुना, पञ्चमः स्वरः तु महात्मना नारदेन गीतः, धैवतः च निषादः च स्वरौ तुम्बुरुणा गीतौ (उच्यते)।

वि- अधिष्ठात्र्यो देवता उच्यन्ते-

71. आद्यस्य दैवतं ब्रह्मा षड्जस्याप्युच्यते बुधैः।
तीक्ष्णदीप्तप्रकाशत्वादृषभस्य हुताशनः।। 15।।

अन्वयः- आद्यस्य षड्जस्य अपि दैवतम् बुधैः ब्रह्मा उच्यते, ऋषभस्य तीक्ष्णदीप्तप्रकाशत्वाद् हुताशनः उच्यते।

आद्यो मध्यमः स्वरः. गम्भीरस्वरूपत्वात् तीक्ष्णदीप्तप्रकाश-त्वादग्निदेवतात्वमृषभे।

72. गावः प्रगीते तुष्यन्ति गान्धारस्तेन हेतुना ।
श्रुत्वा चैवोपतिष्ठन्ति सौरभेया न संशयः ।। 16।।

अन्वयः- प्रगीते गावः तुष्यन्ति, तेन हेतुना गान्धारः, श्रुत्वा च सौरभेया उपतिष्ठन्ति एव, संशयः न।

वि- गौर्देवता गान्धारस्य। गां धारयति सन्निहितां करोतीति गान्धारः। गान्धारोच्चारणेन सौरभेयाः गावः उपतिष्ठन्ति। गोदेवताप्रसादात्।।

73. सोमस्तु पञ्चमस्यापि दैवतं ब्रह्मराट् स्मृतम्।
निर्ह्रासो यस्य वृद्धिश्च ग्राममासाद्य सोमवत् ।।17।।

अन्वयः- यस्य च ग्रामम् आसाद्य सोमवत् निर्ह्रासः च वृद्धिः च पञ्चमस्य अपि ब्रह्मराट् सोमः तु दैवतम् स्मृतम्।

वि- सोमश्चन्द्रमाः। ब्रह्मराट् ब्राह्मणानां राजा। पञ्चमस्य दैवतम्। सोमस्य यथा कृष्णपक्षे निर्ह्रासः शुक्ले च वृद्धिः एवं षड्जमध्यमगतस्य पञ्चमस्योच्चगीतित्वाद्वृद्धिः स्वरस्य षड्जमध्यम असंभवात् निर्ह्रासः हानिः उत्तरस्थानता इति सोमसाधर्म्यम्।।

74. अति सन्धीयते यस्मादेतान्पूर्वोत्थितान्स्वरान्।
तस्मादस्य स्वरस्यापि धैवतत्वं विधीयते ।।18।।

अन्वयः- यस्मात् एतान् पूर्वोत्थितान् स्वरान् अति सन्धीयते तस्मात् अस्य स्वरस्य अपि धैवतत्वम् विधीयते।

75. निषीदन्ति स्वरा यस्मान्निषादस्तेन हेतुना।
सर्वांश्चाभिभवत्येष यदादित्योऽस्य दैवतम् ।।19।।

अन्वयः- यस्मात् स्वराः निषीदन्ति तेन हेतुना निषादः, यत् एष सर्वान् अभिभवति च अस्य आदित्यः दैवतम् (स्मृतम्)।

वि-मध्यमादीनां पूर्वोत्थितानां पूर्वमुत्पन्नानां अभिभवा-दति सन्धानान्निवारणात् निर्वाणाद्वा अतो धैवतः रोधकरणात् निवारणात् पिबन्तीति पिदधाति । यथा आदित्यो ग्रहनक्षत्राणि रुणद्धि एवम्।

यथा निषादे निषीदन्तीव अन्तर्भवन्तीव स्वराः तत्र पर्यवसानात् तेन च अभिभवोऽपसारणमिवक्रियते।सूर्येणेव ज्योतिषाम्। आदित्योऽस्य धैवतस्य निषादस्य च दैवतमित्यर्थः।।

प्र- क्रुष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वा आदित्यानां प्रथमस्साध्यानां द्वितीयोऽग्नेस्तृतीयो वायोश्चतुर्थस्सौमो मन्द्रो मित्रावरुणयोरतिस्वार्यः इति देवताः सामविधौ उक्ताः। (सा.वि.ब्रा.1.5)

इति पञ्चमी कण्डिका

(1.6)

षष्ठी कण्डिका

वि- एवं लौकिके वैदिके च गानसाधारण्येन लक्षणमुक्तम्। इदानीं सामविषयं विशेषत उच्यते-

76. दारवी गात्रवीणा च द्वे वीणे गानजातिषु।
सामिकी गात्रवीणा तु तस्याश्शृणुत लक्षणम् ।।1।।

अन्वयः- गानजातिषु दारवी गात्रवीणा च द्वे वीणे, सामिकी तु गात्रवीणा, तस्याः लक्षणम् श्रृणुत।

77. गात्रवीणा तु सा प्रोक्ता यस्यां गायन्ति सामगाः।
स्वरव्यञ्जनसंयुक्ता अङ्गुल्यङ्गुष्ठरञ्जिता ।।2।।

अन्वयः- यस्यां सामगाः गायन्ति सा तु स्वरव्यञ्जनसंयुक्ता अङ्गुल्य ङ्गुष्ठरञ्जिता गात्रवीणा प्रोक्ता।

78. हस्तौ सुसंयुतौ धार्यौ जानुभ्यामुपरि स्थितौ।
गुरोरनुकृतिं कुर्यात् यथा ज्ञानमतिर्भवेत्।।3।।

अन्वयः- जानुभ्याम् उपरि स्थितौ हस्तौ सुसंयुतौ धार्यौ,यथा ज्ञानमतिः भवेत् गुरोः अनुकृतिम् कुर्यात्।

वि- दारोरुत्पन्ना गात्रोत्पन्ना चेति गीतिः द्विविधा। साम्नान्तु गात्रवीणा। तत्स्वरूपावधारणं श्रृणुत। सामगाः खलु गात्रवीणायां गायन्ति। नियमार्थं पुनर्वचनम्। स्वरमात्राद्युच्चारण सहिताङ्गुल्यङ्गुष्ठसंयोजनम्। जानूपरि हस्तधारणं सुसंयुतत्वञ्च स्वरनिक्षेपसौकर्यार्थम्। "विरलानाङ्गुलीः कुर्यात्" इति वक्ष्यमाणत्वात् (1.6.6) । गुरोः आचार्यस्य अनुकृतिः तन्मुखोच्चारितमन्त्रस्वरूपा-वधारणम्। ज्ञानसाधनीभूता मतिः ज्ञानमति गुरुमुखोच्चारणाऽ-नूच्चारणरुपमध्ययनम्। "अध्यापयेच्छिष्यान्" इति हि वक्ष्यति।।

प्र- "पठन्नान्यमतिर्भवेत्" इति "ततो वेदान्तसमारभेत्" इति च शिक्षान्तरपाठः।अर्थः स्पष्टः।।

वि- ओंकारो व्याहृतयस्सावित्रीञ्च पच्छोर्द्धर्चशः ऋक्शः साम सावित्रीञ्च स्वाध्यायवेदारम्भप्रारम्भकाले प्रयोक्तव्येत्युच्यते-

79. प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीञ्चानुवचनन्ततो वृत्तान्तमारभेत् ।।4।।

अन्वयः- प्राक् प्रणवम् प्रयुञ्जीत, तदनन्तरम् व्याहृतीः अनुवचनम् सावित्रीम् च, ततः वृत्तान्तम् आरभेत्।

वि- व्याहृत्यनुवचनस्य पश्चादनुवचनं स्वाध्यायजपावर्तन-स्थानवृत्तान्तः।।

वि- हस्ताङ्गुळीषु स्वरारोपणं सम्यग्गीत्यवधारणार्थं कर्तव्यमित्याह-

80. प्रसार्य चाङ्गुलीस्सर्वाऽरोपयेत् स्वरमण्डलम्।
न चाङ्गुलीभिरङ्गुष्ठमङ्गुष्ठेनाङ्गुलीः स्पृशेत् ।।5।।

अन्वयः- सर्वाः अङ्गुलीः प्रसार्य स्वरमण्डलम् च आरोपयेत्, अङ्गुलीभिः च अङ्गुष्ठं न , अङ्गुष्ठेन अङ्गुलीः स्पृशेत्।

हस्तेनैव च तन्त्रीरङ्गुळीः स्पृशेत् स्वरादीनाम्मात्राणां च।

प्र- ...चालयेत् करमण्डलम्। न चाङ्गुळीभिरङ्गुष्ठमुपेयाद्दोषवित्ततः। इति (मा.शि.29)। न चाङ्गुळीभिरिति-

पुरुषो हि व्रजेन्नारीं न नारी पुरुषं व्रजेत्।
अङ्गुळीषु च सर्वासु नयेदङ्गुष्ठमेव च ॥

इति वचनात् अङ्गुष्ठेनैव अङ्गुळीषु स्वरनियोजनं कार्यम्॥

81. विरळा नाङ्गुळीः कुर्यान्मूलेचैना न संस्पृशेत्।
अङ्गुष्ठाग्रेण ता नित्यम्मध्यमे पर्वणि स्पृशेत्॥6॥

अन्वयः- अङ्गुलीः विरलाः न कुर्यात्, एनाः च मूले न संस्पृशेत्, नित्यम् अङ्गुष्ठाग्रेण ताः मध्यमे पर्वणि स्पृशेत्।

वि- पूर्वोक्तं विशिष्यते। अङ्गुष्ठाग्रेण संहतानामङ्गुळीनां यन्मध्यमपर्व तत्र संस्पर्शः कार्यः॥

82. मात्राद्विमात्रावृद्धानां विभागार्थं विभागवित्।
अङ्गुळीभिर्द्विमात्रन्तु पाणेस्सव्यस्य दर्शयेत् ॥7॥

अन्वयः- विभागवित् मात्राद्विमात्रवृद्धानाम् विभागार्थं द्विमात्रम् तु सव्यस्य पाणेः अङ्गुलीभिः दर्शयेत्।

83. त्रिरेखा यत्र दृश्येत सन्धिन्तत्र विनिर्दिशेत् ।
स पर्व इति विज्ञेयः शेषमन्तरमन्तरम् ॥8॥

अन्वयः- यत्र त्रिरेखा दृश्येत तत्र सन्धिम् विनिर्दिशेत्, स पर्व इति विज्ञेयः, शेषम् अन्तरम् अन्तरम्।

84. यवान्तरन्तु सामस्वृक्षुकुर्यात्तिलान्तरम्।
स्वरान्मध्यमपर्वसु सुनिविष्टान्निवेशयेत् ।।9।।

अन्वयः- सामसु तु यवान्तरम्, ऋक्षु तिलान्तरम् कुर्यात्। मध्यमपर्वसु सुनिविष्टान् स्वरान् निवेशयेत्।

विभागार्थं परिज्ञानार्थम्। विभागवित् स्वरमात्रापरिज्ञानवान्। प्रथमद्वितीयस्वरयोर्यवप्रमाणं अङ्गुष्ठतर्जन्योर्मध्यं साम्नि। तिलप्रमाणमात्रमङ्गुष्ठतर्जन्योर्मध्यमृग्विषये। सुनिविष्टानिति स्वरोच्चारणसमकालमेव पर्वस्वङ्गुष्ठनियोजनं कार्यम्। नादौ पश्चाद्वा।।

प्र- अक्ष्णोर्निमेषमात्रेण यो वर्णः समुदीर्यते।
स एकमात्रोद्विस्तावान् दीर्घस्तु प्लुत उच्यते।
एकमात्रो भवेद्ध्रस्वः द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयः व्यञ्जनञ्चार्धमात्रिकम्।।

अयमपि-

निमेषकाळामात्रास्याद्विद्युत्कालेति चाऽपरे।
ऋक्स्वरा तुल्ययोगा वा मतिस्यात्सोमशर्मणः।

इति वक्ष्यति।।

85. न चाऽत्र कम्पयेत्किञ्चिदङ्गस्यावयवं बुधाः।
अधस्तनं मृदुन्यस्य हस्तमास्ते यथाक्रमम् ।।10।।

अन्वयः- अत्र बुधाः अङ्गस्य अवयवम् किञ्चित् न कम्पयेत् च, अधस्तनम् हस्तम् यथाक्रमम् मृदु न्यस्य आस्ते।

वि- अङ्गानान्तदवयवानाञ्च कम्पो न कार्यः। अधोभवं अधस्तनं ऊरुजङ्घापादम्। मृदुन्यस्य सुखेनावस्थाप्य तत्र न्यस्तं दक्षिणं वामञ्च यथाक्रमन्निधाय दक्षिणं गोकर्णवत् वाममुत्तानमास्ते तिष्ठति।।

86. अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत् ।
एष छेदो विवृत्तीनां यथा बालेषु कर्तरि ।। 11।।

अन्वयः- यथा अभ्रमध्ये मणिसूत्रवत् विद्युत् दृश्यते, यथा बालेषु कर्तिरि (तथा) एषः छेदः विवृत्तीनाम् भवति।

वि-संहतमेघान्तरे मणिग्रथितसूत्रवदविच्छिन्नेव यथा विद्युद्रेखा दृश्यते एवं स्वरादि वृत्तीनामपि स्वरान्तरगमने वृत्तिविच्छेदोऽपि सूक्ष्मतयैकरूपता । स्वराणां परस्परविच्छेदो न कार्यः। यथा इषुकार्यकृद्धालः पुनः पुनः इषून्प्रयुङ्क्ते न विरमति। एवं स्वराणां पुनः पुनः प्रयोगेऽपि स्वरसाम्यं स्वरविच्छेदो न कार्यः।।

87. कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिन्दिशम्मनः।
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः।। 12।।

अन्वयः- स्वस्थः प्रशान्तः निर्भीतः बुधः कूर्मः अङ्गानि इव चेष्टाम् दृष्टिम् दिशम् मनः संहृत्य वर्णान् उच्चारयेत्।

वि- यथा कूर्मोऽङ्गानि संहरति तथा अङ्गचेष्टां दृष्टिं चक्षुरादिकं दिगवलोकनेन मनोव्यापारं च उपसंहृत्य सुखासनस्थः चक्षुरादिव्याक्षेपोपसंहारात् प्रशान्तमानसः प्रशान्तमनसो व्याकुलता निवृत्तिः। निर्भयः वर्णाद्युच्चारणं कुर्यात्।।
वि- दक्षिणहस्तसन्निवेशः प्रतिपाद्यते-

88. नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत्।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।। 13।।

अन्वयः- हस्तम् तु नासिकायाः पूर्वेण गोकर्णवद् हरेत्। हस्ताग्रे दृष्टिम् निवेश्य शास्त्रार्थम् अनुचिन्तयेत्।

वि- नासिकायास्साम्मुख्येन हस्तं दक्षिणं गोकर्णवत्। नोत्तानं नाप्यधोमुखं हरेत् कुर्यात्। हस्ताग्रे दृष्टिनिधानं कृत्वा शिष्यशिक्षाशास्त्रोक्तमर्थं अनुचिन्तयेत्।।

प्र- समस्ताङ्गुळिसाहित्यमेव गोकर्णाकृतिः।
उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुळिरञ्जितम्।
स्वरविद्धं करं कुर्यात् प्रादेशोद्देशगामिनम्।। इति (या.शि.45)

89. सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च।
यथैवोच्चारयेद्वर्णांस्तथैवैनान्तसमापयेत्।। 14।।

अन्वयः- वाक्यम् हस्तेन च मुखेन च समम् उच्चारयेत्। वर्णान् यथा एव उच्चारयेत् एनान् तथा एव समापयेत्।

मुखोच्चारणसमकालमेव हस्तन्यासः कर्तव्यः। प्रथमादि स्वरोच्चारणसमकालं अङ्गुष्ठयोजनं कार्यम्। नादौ पश्चाद्वा। द्रुतादिकया वृत्या पाठो यथा प्रारब्धः तथा मन्त्रस्समापनीयः। नत्वेकस्मिन्नेव मन्त्रे वृत्तिद्वययोजना कार्या। स्वरान्तरगमने स्वरादीनां भेदपरिज्ञानाऽभावेपि यत्र यत्र स्वरादिषु यावत्कालं वर्णाः प्रयुञ्जते तत्स्वरोच्चारणसदृशं तत्रैव हस्तन्यासादिकं कार्यन्न ततो न्यूनमधिकं वा

प्र- अत्र शिक्षान्तरवचनानि -

सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च।
स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ।।
हस्तभ्रष्टः स्वरभ्रष्टः न वेदफलमश्नुते।
(स्वरहीनन्तु)हस्तहीनन्तु योऽधीते मन्त्रं वेदविदो विदुः।
न साधयति याजूँषि भुक्तमव्यञ्जनं यथा ।।
हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुस्सामभिर्दग्धो वियोनिमधिगच्छति।।

ऋचो यजूँषि सामानि हस्तहीनानि यः पठेत्।
अनृचो ब्राह्मणस्तावद्यावत्स्वारन्न विन्दति।।

इति .या.शि.28.33

स्वरवर्णान्प्रयुञ्जानः हस्तेनाधीतमाचरन्।
ऋग्यजुस्सामभिः पूतो ब्रह्मलोकमवाप्नुयात्।।

इति या.शि.42

चुलुर्नौकास्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः।
एते वै हस्तदोषास्युः परशुश्चेति सप्तमः।।
नचाऽसौ मुष्टिबन्धी स्यान्नचाप्युत्तममाचरेत्।

इति या.शि.38.39

न कम्पयेच्छिरः पादौ मुखदोषांश्च वर्जयेत्।।
नासिकायास्तु पूर्वेण हस्तं सञ्चालयेद्बुधः।
सूक्ष्मान् वर्णानुच्चारयेद्वै दक्षिणं श्रवणं प्रति।।
श्रुतिं वाचोऽनुगां कृत्वा वाचं कृत्वा मनोऽनुगाम्।
दृष्टिं हस्तानुगां कृत्वा ततः पदमिवोच्चरेत्।।
अक्षरज्ञो विरामज्ञः प्रत्यारम्भी तथैव च।
स्वरमात्राऽविभागज्ञः न स आचार्य उच्यते।।
यथा नौस्स्त्रोतसाम्मध्ये समं गच्छति संयुता।
तैलधारेव वा वाणी तद्वद्वर्णान्प्रयोजयेत्।।

इति (अ.मां.शि.27.28,29,37,51)

90. नाऽत्याहन्यान्न निर्हन्यान्न प्रगायेन्न च कम्पयेत्।
समं सामानि गायेत व्योम्नि श्येनगतिर्यथा ।। 15।।

अन्वयः- न अत्याहन्यान्, न निर्हण्यात्, न प्रगायेत्, न कम्पयेत्, यथा व्योम्नि श्येनगतिः समम् सामानि गायेत।

अतिसंरम्भेणोच्चारणमत्याहननम्। स्थानकरणपीडा निर्हननम्। अत्युच्चैर्गानमतित्वरया वा गानं प्रगाणम्। कम्पनं चलद्रूपस्वरोच्चारणम्। एवन्दोषवर्जनादाकाशे यथा श्येनस्य गतिः तथा सामानि समं गायेत् इति। मृदुमध्यादिके अशीत्यन्तर्गता गीतिः अन्तराऽन्तरो गीतिविशेषः प्रयत्नेनाऽवधार्यते। तस्मान्नातिसंरम्भेण नात्युच्चैर्नातिवा नीचैर्न त्वरया च स्वरादीनामुच्चारणेन समगुणवृत्या मृदुमध्यादि श्रुत्यन्तर्गतगीतिविशेषेण चान्वितं कम्पनादिवर्जितं सामाध्ययनं व्योम्नि श्येनस्य गमनन्तत्सदृशं गानं कर्तव्यम्। नैवमेवोच्यते एवमेवोच्यते इत्यन्यतरः पाठः।

प्र- न चास्य वदतो दोषात्कश्चिदप्युपलक्षयेत्। नात्युच्चैर्नातिवा नीचैः..। प्रब्रूयान्नाति तीक्ष्णेन कण्ठेन मृदुनादिना इति।।

91. यथाप्सु चरताम्मार्गो मीनानान्नोपलक्ष्यते।
आकाशे वा विहङ्गानान्तद्वत्स्वरगता श्रुतिः।। 16।।

अन्वयः- यथा अप्सु चरताम् मीनानाम् आकाशे विहङ्गानाम् वा मार्गः न उपलक्ष्यते तद्वत् स्वरगता श्रुतिः।

वि- मत्स्यानां जले। आकाशे पक्षिणां । मार्गो गमनं सामान्येनावगम्यते न तु पादविचलनपूर्वकत्वेन। एवं गीतिमात्रं विना प्रयत्नेनाऽवगम्यते। न गीतिविशेषोऽवधार्यते।।

वि- अभिधावृत्तिवदनियोगात्। गीतिविशेषोऽवधारणमित्याह-

92. यथा दध्नि सर्पिस्स्यात्काष्ठस्थो वा यथाऽनलः।
प्रयत्नेनोपलभ्यते तद्वत्स्वरगता श्रुतिः ।। 17।।

अन्वयः- यथा दध्नि सर्पिः स्यात्, यथा वा काष्ठस्थः अनलः, प्रयत्नेन उपलभ्यते, तद्वत् स्वरगता श्रुतिः।

93. स्वरात्स्वरसङ्क्रमंस्तु स्वरसन्धिरनुल्बणम् ।
अविच्छिन्नं समं कुर्यात्सूक्ष्मच्छायातपोपमम् ।।18।।

अन्वयः- स्वरात् स्वरं सङ्क्रमन् तु स्वरसन्धिः अनुल्बणम् अविच्छिन्नम् समम् छायातपोपमम् सूक्ष्मः कुर्यात्।

प्रथमस्वरात् द्वितीयादिस्वरगमनमविच्छेदेन कार्यम्। नाप्युल्बणं स्वरस्थानवेगकरणम्। अतश्च समं भवति। सूक्ष्मच्छायातप उपमा यस्य स्वरसन्धेः । छायाया आतपस्य च यथा प्रदेशान्तरे सूक्ष्ममविच्छिन्नं सङ्क्रमणं तद्वदित्यर्थः। अतश्च स्वरादीनां परस्परसङ्क्रमणे स्वरसन्धेर्विच्छेदेऽपि सूक्ष्मतया श्रुत्यन्तर्भावतया च विच्छेदाभावात् समतया स्वरान्तरकर्षणादिष्वेनेकरुपावस्थानता सिद्धा।।

वि- कर्षणे दोषषट्कं वर्जयेदित्याह-

94. अनागतमतिक्रान्तं विच्छिन्नं विषमाहतम्।
तन्वन्तमस्थितान्तञ्च वर्जयेत्कर्षणं बुधः।। 19।।

अन्वयः- बुधः अनागतम् अतिक्रान्तम् विच्छिन्नम् विषमाहतम् तन्वन्तम् अस्थितान्तम् च कर्षणम् वर्जयेत्।

प्रथमस्वरं कर्षयन् द्वितीयस्वरं यदा गच्छति तदा अनागतं प्रथमत एव अतिक्रान्ते च कर्षणन्न कर्तव्यम्। स्वरमध्ये कार्यम्। विच्छिन्नं प्रथमाम्मात्रां विच्छिद्य न कर्षणं कार्यम्। विषमाहतं कम्पयन्तं द्वितीयस्वरे मात्रात्रयं कृत्वा स्थितिः कार्या ।न त्वेकद्विमात्रयुक्तेति।।

प्र- तन्वन्तं मात्रत्रयातिरेकेण विस्तारणं न कार्यम्। अस्थितान्तञ्च द्वितीयस्वरे।।

95. स्वरस्थानाच्युतो यस्तु स्वं स्थानमतिवर्तते।
विस्वरं सामगा ब्रूयुर्विरक्तमिति वीणिनः।।20।।

अन्वयः- स्थानात् च्युतः यः तु स्वरः स्वंस्थानम् अतिवर्तते सामगाः विस्वरम् ब्रूयुः, वीणिनः विरक्तम् इति ब्रूयुः।

वि- स्वस्थानातिवर्तनेन स्वरो यदा च्यवते अन्यथात्वं गच्छति तदा विस्वरशब्देन तं स्वरं सामगा ब्रूयुः। वीणिनो गायकाः विरक्तशब्देन व्यवहरन्ति। अन्यथात्वं अन्यत्स्वरवद्गानम्। गानकाले तं विस्वरं कथयन्ति सामगाः वीणिनः विरक्तं कथयन्ति व्यवहरन्ति।।

प्र-

उदात्तन्नानुवर्तेत नीचन्न स्वरितन्तथा।
विस्वरन्तं विजानीयाद्दीर्घह्रस्वविवर्जितम्।।

इति (या.शि.112)

96. अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद्वृत्तिं विलम्बिताम्।।21।।

अन्वयः- अभ्यासार्थे द्रुताम् वृत्तिम् कुर्यात्, प्रयोगार्थे तु मध्यमाम्, शिष्याणाम् उपदेशार्थे विलम्बितां वृत्तिम् कुर्यात्।

वि- उपदेशार्थे पाठे विलम्बितया वृत्या शिष्याणां ग्रहणं सम्यग्भवति। गृहीतस्य ग्रन्थस्य त्वरितया वृत्या धारणसौकर्यम्। स्वाद्ध्यायादौ च प्रयोगे मध्यमावृत्तिरदृष्टार्थत्वेनोचिता।

प्र-

ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता।
आग्निमारुतयोर्वृत्तिस्सर्वशास्त्रेषु निन्दिता।।

इति (या.शि.53)

मात्रालक्षणेपि "द्रुता मध्यमा विलम्बितेति द्रुतायां वृत्तौ त्रिकला मात्रा भवति चतुष्कला मध्यमायां पञ्चकला विलम्बितायां द्रुता रोहिणी श्यामा मध्यमा श्वेता विलम्बिता तासां देवताः वायव्या द्रुतावृत्ति-

बार्हस्पत्या मध्यमा सौरी विलम्बिता तासु मात्राकालस्तिसृष्वेकोवृत्ति-समञ्च गीतं सामसु" इति।।

97. गृहीतग्रन्थ एवन्तु ग्रन्थोच्चारणशिक्षकान्।
हस्तेनाध्यापयेच्छिष्यान् शैक्ष्येण विधिना द्विजः ।।22।।

अन्वयः- एवम् शैक्ष्येण विधिना गृहीतग्रन्थः द्विजः तु ग्रन्थोच्चारण शिक्षकान् शिष्यान् हस्तेन अध्यापयेत्।

वि- एवमुक्तेन वक्ष्यमाणेन च शैक्ष्येण विधिना गृहीतो ग्रन्थः सामगानं येन हस्तेन करणभूतेन शिष्यानध्यापयितुं योग्यो नान्यः। ग्रन्थोच्चारणाय शिक्षकाः ग्रन्थोच्चारणशिक्षकाः।।

इति षष्ठी कण्डिका

(1.7)
सप्तमी कण्डिका

वि- पूर्वं क्रुष्टादीनामुत्पत्तिस्थानान्युक्तानि। इदानीमुत्पन्नानामवस्थितिस्थानान्युच्यन्ते-

98. क्रुष्टस्य मूर्द्धनि स्थानं ललाटे प्रथमः स्वरः।
भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य तु कर्णयोः।।1।।

99. कण्ठस्स्थानञ्चतुर्थस्य मन्द्रस्य रसनोच्यते ।
अतिस्वारस्य नीचस्य हृदिस्थानं विधीयते ।।2।।

अन्वयः- क्रुष्टस्य स्थानम् मूर्धनि, प्रथमः स्वरः ललाटे, द्वितीयस्य भ्रुवोः मध्ये, तृतीयस्य तु कर्णयोः, चतुर्थस्य च स्थानं कण्ठः, मन्द्रस्य रसना उच्यते, नीचस्य अतिस्वारस्य स्थानम् हृदि विधीयते।

क्रुष्टः सप्तमः प्रथमपञ्चम इति य उक्तः। अतिस्वार्यते कनिष्ठामूलन्नीयत इति नीचस्वरः। षष्ठो निषादः।।

वि- अङ्गुष्ठाङ्गुळियोजनं स्वराणां क्रियते। उच्चनीचस्वरस्थान-संरक्षणार्थम्-

100. अङ्गुष्ठस्योत्तमे क्रुष्टो ह्यङ्गुष्ठे प्रथमः स्वरः।
प्रदेशिन्यान्तु गान्धार ऋषभस्तदनन्तरम् ।।3।।

101. अनामिकायां षड्जस्तु कनिष्ठायान्तु धैवतम्।
तस्याधस्ताच्च योन्यस्तु निषादन्तत्र निर्दिशेत् ।।4।।

अन्वयः- अङ्गुष्ठस्य उत्तमे क्रुष्टः, अङ्गुष्ठे प्रथमः स्वरः, प्रदेशिन्याम् तु गान्धारः, ऋषभः तदनन्तरम्, अनामिकायाम् तु षड्जः, कनिष्ठायाम् तु धैवतः, तस्य अधस्तात् च यः अन्यः तत्र निषादम् तु निर्दिशेत्।

102. अपर्वत्वादसंज्ञत्वादव्ययत्वाच्च नित्यशः।
मन्द्रो हिनु हि भूतस्तु परिस्वार इति स्मृतः।।5।।

अन्वयः- अपर्वत्वात् असंज्ञत्वात् नित्यशः अव्ययत्वात् च हिनुहिभूतः मन्द्रः तु परिस्वारः इति स्मृतः।

मन्द्रात्पृथग्भूतत्वाभावापर्वत्वन्निषादस्य च। अत एव स्यात्पृथक्त्वेन अज्ञानादसंज्ञत्वम्। सम्यक् पृथक्त्व संज्ञाभावाद-संज्ञकत्वम्। अव्ययत्वं लिङ्गविभक्तिवचनाभावात्। अतो मन्द्रो हि यस्मात् "हिनुहिभूतः" हिन्विति प्रेरणां प्राप्तः परिस्वारो निषाद इति उच्यते षष्ठः। "हि गता" विति लोण्मध्यमपुरुषानुकरणेन प्रेरणं लभ्यते।

प्र- शिक्षान्तरे हस्ताङ्गुष्ठयोजनं क्रुष्टादीनामेवमुक्तम्-

बाह्याङ्गुष्ठन्तु क्रुष्टं स्यात् अङ्गुष्ठे मध्यमः स्वरः।
प्रदेशिन्यान्तु गान्धारो मध्यमायान्तु पञ्चमः।।
अनामिकायां षड्जस्तु कनिष्ठायान्तु धैवतः।
तस्याधस्तात्तु योऽन्त्यस्स्यान्निषाद इति तं विदुः।।

इति (अ.मा.शि.15.16)

"हिनुहिभूतः" उच्चान्नीचैरवस्थानं हीति संज्ञा प्रकीर्तिता। (656-परिस्वारस्वरुपमेवम्)

वि- क्रुष्टादि गीतिश्रवणेन देवादीनां परितोषो भवति। यथा मन्द्रोच्चारणेन गौतमादीनां मन्त्रसञ्चेतनेनाग्न्यादीनामभिधेयानामिति स्वाध्यायस्य सर्वोपकारकताप्रतिपादनार्थमुच्यते-

103. क्रुष्टेन देवा जीवन्ति प्रथमेन तु मानुषाः।
पशवस्तु द्वितीयेन गन्धर्वाप्सरसस्त्वनु।।6।।

104. अण्डजाः पितरश्चैव चतुर्थस्वरजीविनः।
मन्द्रन्त्वेवोपजीवन्ति पिशाचाऽसुरराक्षसाः ।।7।।

105. अतिस्वारेण नीचेन शिष्टं स्थावरजङ्गमम्।
सर्वाणि खलु भूतानि धार्यन्ते सामिकैः स्वरैः।।8।।

अन्वयः- देवाः क्रुष्टेन जीवन्ति, मानुषाः तु प्रथमेन, पशवः तु द्वितीयेन, गन्धर्वाप्सरसः तु अनु, अण्डजाः पितरः च एव चतुर्थस्वरजीविनः, पिशाचाऽसुरराक्षसाः तु एव मन्द्रम् उपजीवन्ति, स्थावरजङ्गमम् शिष्टं नीचेन अतिस्वारेण, सर्वाणि भूतानि सामिकैः स्वरैः धार्यन्ते खलु।

द्वितीयस्य अनु पश्चात्स्वरेण तृतीयेन। गन्धर्वाप्सरसो जीवन्ति। अतिस्वारेण स्थावरजङ्गमं च जीवतीति वर्तते।

प्र- अस्यार्थः (1-2-15,16) इत्यत्र स्पष्टः।।

वि- स्वरविशेषश्रुतिः प्रयोगार्थमवश्यमवधारणीयेत्युच्यते-

106. दीप्ताऽयताकरुणानां मृदुमध्यमयोस्तथा ।
श्रुतीनां योऽविशेषज्ञो न स आचार्य उच्यते ।।9।।

अन्वयः- यः दीप्ता आयता करुणानाम् तथा मृदु मध्यमयोः श्रुतीनाम् अविशेषज्ञः सः आचार्यः न उच्यते।

अविशेषज्ञस्याचार्यस्याधिको दोषः। न केवलमज्ञत्वात्स्वयं प्रत्यवैति। अन्यानपि प्रत्यवायेन योजयतीत्याचार्यग्रहणम्।।

107. दीप्ता मन्द्रे द्वितीये च प्र चतुर्थे तथैव च।
अतिस्वारे तृतीये च क्रुष्टे तु करुणा श्रुतिः।।10।।

अन्वयः- मन्द्रे द्वितीये च प्र चतुर्थे तथा एव तु अतिस्वारे तृतीये च दीप्ता, क्रुष्टे तु करुणा श्रुतिः।

वि- पञ्चानां स्वराणां दीप्ताश्रुतिः प्रथमस्य मृदुभूता। सप्तमस्य करुणा।।

प्र- अत्र यद्यपि प्रथमस्यापि दीप्ताश्रुतिः उक्ता । सा च मृदुभूता "प्रथमेन मृदुस्मृता" इत्यनुपदमेव वक्ष्यमाणत्वात्। "सप्तमः क्रुष्टः" इत्यर्थः।।

108. श्रुतयोऽन्या द्वितीयस्य मृदुमध्यायताः स्मृताः ।
तासामपि तु वक्ष्यामि लक्षणानि पृथक्पृथक् ।।11।।

अन्वयः- द्वितीयस्य अन्याः श्रुतयः मृदु मध्य आयताः स्मृताः। तासाम् अपि तु पृथक्पृथक् लक्षणानि वक्ष्यामि।

वि- द्वितीयस्वरस्य पूर्वं दीप्ताश्रुतिरुक्ता सम्प्रति श्रुतित्रयमुपाधिवशेनोच्यते-

109. आयतात्वं भवेन्नीचे मृदुत्वञ्च विपर्यये।
स्वे स्वे स्वरे मध्यमत्वन्तत्समीक्ष्य प्रयोजयेत्।। 12।।

अन्वयः- नीचे आयतात्वम् भवेत्, विपर्यये च मृदुत्वम्, स्वे स्वे स्वरे मध्यमत्वम्, तत् समीक्ष्य प्रयोजयेत्।

नीचे तृतीयस्वरे परतस्थिते द्वितीयस्वरस्याऽयता श्रुतिः। विपर्यये अन्यस्वरे चतुर्थस्वरे परभूते मृदुभूता। स्वे स्वरे स्वरान्तरे परभूते मध्यमा श्रुतिः। एवमवधार्य सामस्वरप्रयोगः कर्तव्यः। स न इन्द्रश्शिवस्साऽ3ख्रा।। उद्धेदभिश्रुतामाऽ3घाम्।। (ऊ.गा आ.1-17) वाऽ2र्त्तोऽ35 हाइ। (प्र.गा 5-1-25) इत्युदाहरणानि ।।

अत्र "ख्रा" इति द्वितीयस्वरात्परः तृतीयस्वरः तत्राऽयता। "घामिति" द्वितीयस्वरात्परश्चतुर्थश्वरः तत्र मृदुभूता "तो" इति समानस्वरे मध्यमाश्रुतिः इति ज्ञेयम्।।

वि- विवरणे अत्र "ख्रा" इत्यादि तस्यायमर्थः "ख्रा" इत्यस्य अश्वा इति तृतीयस्वरः परभूतः। एवं प्रथमस्तोत्रीयायां "घाम्" इत्यस्य "वृषभं" इति चतुर्थस्वरः परभूतः इति। "तो" इत्यस्य समानस्वरपरत्वं "होइ" इत्यपेक्ष्य कथञ्चिन्नेयम। अथवा "अपरभूते पूर्व" इत्यर्थः।

"ऊता प्रहूयसा चैव त्सिवा वारा मही तथा।
नित्यायताः प्रयोक्तव्या निर्दिशन्ति विचक्षणाः।।"

वि- द्वितीये दीप्ता पूर्वोक्ता कदा भवतीत्याह-

110. द्वितीये विरता या तु क्रुष्टस्य परतो भवेत् ।
दीप्तां तान्तु विजानीयात्प्रथमेन मृदुस्मृता ।। 13।।

111. अत्रैव विरता या तु चतुर्थेन प्रवर्तते।
तथा मन्द्रे भवेद्दीप्ता साम्नश्चैव समापने ।। 14।।

अन्वयः- या तु द्वितीये विरता क्रुष्टस्य परतः भवेत्, ताम् तु दीप्ताम् विजानीयात्, प्रथमेन मृदुः स्मृता, या तु अत्र एव विरता चतुर्थेन प्रवर्तते, तथा स्मृता। मन्द्रे साम्नः एव समापने च दीप्ता भवेत्।

क्रुष्टे परभूते द्वितीयस्वरे या विरताऽवस्थिताश्रुतिस्सा दीप्ता। प्रथमस्वरे मृदुभूता श्रुतिः भवति यदि तत्रैव विरताऽवस्थिता भवति। चतुर्थस्वरेऽवस्थिता या श्रुतिः सा च दीप्ता मृदु भवति स्वरान्तरानुगमने सति दीप्ता भवति। "ओग्नाइ" इति (प्र.सा. गा-1.1.1) तथा मन्द्रे स्वरान्तरानुगमने सति दीप्ता भवति। एवं सामसमाप्तौ यत्र यत्र स्वरेऽवस्थिता सा दीप्ता भवति "औहोऽ3वाऽ3 इन्द्रा। होइऽ2। हो । वाहोइ" इत्यादि। (प्र.सा.गा-10.1.24)

प्र- क्रुष्टश्च परतः इति पाठान्तरम् क्रुष्टाच्च परतः इत्येव समीचीनः पाठः। क्रुष्टस्य परतः इति पाठे संबन्धषष्ठ्या निर्वाह्यः क्रुष्टात्परीभूते द्वितीयस्वरे विरता श्रुतिः दीप्ता। अत्र क्रुष्टशब्देन क्रुष्टस्वरः क्वचित्प्रथमस्वरश्च ग्राह्यः लक्ष्यानुरोधात्। "मोषुत्वा" द्वितीये साम्नि (प्रा.ग्रा.1.2.36) "ऊऽ2" इत्यत्र द्वितीयस्वरे क्रुष्टात्परीभूते दीप्ता श्रुतिः। "तृम्पावाऽ1याऽ2" (प्र.गा.5.1.1) इत्यत्र प्रथम क्रुष्ट स्वरात्परीभूते द्वितीयस्वरे दीप्ता श्रुतिः। एवं "औहोहावौहोऽ2" (आ.गा.1.1.18) अत्र प्रथमस्वरात्परीभूते द्वितीयस्वरे दीप्ता श्रुतिः। एवं च क्रुष्टात्परीभूते द्वितीयस्वरे द्वितीयस्वरे परतः दीप्ता श्रुतिः भवतीति। एवं चतुर्थस्वरे स्वरान्तराऽनुगमने । तथा मन्द्रस्वरे। सर्वत्रसामसमापने । इति द्वितीय

स्वर एव दीप्ताश्रुतिचिह्नं प्राचीन पुस्तकेषु दृश्यते। अध्ययनप्रकारश्च तथैव न तु स्वरान्तरेषु दीप्ता चिह्नम्।।

वि- विरता प्राप्ता दीप्ता भवति मृदुभूता श्रुतिर्निषिध्यते-

112. नाविरते श्रुतिं कुर्यात्स्वरयोर्नापिचान्तरे ।
न च ह्रस्वे च दीर्घे च न चापि घुटसंज्ञके ।। 15।।

अन्वयः- अविरते श्रुतिम् न कुर्यात्, स्वरयोः अन्तरे च अपि न, ह्रस्वे च दीर्घे च न च , घुटसंज्ञके च अपि न कुर्यात्।

स्वरे अविरते अपरिसमाप्ते आयतादि श्रुतिः न कार्या श्रुतेरभावोऽपि तत्सदृशः स्वरः कार्यः इत्याह। स्वरपरिसमाप्ता-वपि अविच्छिन्ने गाने स्वरयोर्नान्तरा मध्ये च श्रुतिर्न कार्या। "स न इन्द्रश्शिवस्सखे"त्युदाहरणे ह्रस्वे दीर्घे चाक्षरे गीयमाने श्रुतिर्न कार्या। प्लुते एव कार्या।।

प्र- "न च ह्रस्वे इत्यादि" "ति प्रवह्वीः" (प्र.गा.15.2.9) अत्र द्वितीयस्वरस्य तृतीयस्वरपरकस्य आयताश्रुतिः न भवति "ति" इत्यस्य ह्रस्वत्वात् न दीर्घे "जातमग्निम्" (आ.गा.1.2.16) अत्र दीर्घाक्षरत्वात् "जा" इत्यस्य आयताश्रुतिर्न भवति "णोमनीषाम्" (प्र.गा.15.2.3) अत्र "णो" इति प्लुताक्षरे भवत्येव आयताश्रुतिः इति भावः।

एवमनन्तरश्लोके वक्ष्यमाणेषु घुटेषु च श्रुतिर्न भवति।

वि-घुटसंज्ञकं किमित्याह-

113. द्विविधा गतिः पदान्तः स्थितसन्धिस्सहोष्मभिः।
पञ्चस्वेतेषु स्थानेषु विज्ञेयं घुटसंज्ञितम् ।।16।।

अन्वयः- द्विविधा गतिः ऊष्मभिः सह पदान्तः स्थितसन्धिः, एतेषु पञ्चषु स्थानेषु घुटसंज्ञितम् विज्ञेयम्।

तालव्यस्य इकारस्य उकारस्य च आइभावः आउभावश्चेति द्वे गती । तयोः श्रुतिर्न कार्या। तथा पदान्तोपि त्रिविधः। श ष स हैरूष्मभिस्सह स्थितसन्धिः। अत्र दीप्तादिका श्रुतिः न प्रवर्तते। एतेषां घुट इति संज्ञा। "घुट परिवर्तने" इति शब्दान्तरेण सहवर्तनात् घुट इत्युच्यते। पञ्चानाम्मध्ये यस्य सा श्रुतिः प्राप्ता तस्य निषेधस्सर्वत्र।।

प्र- स्थितसन्धिः "यस्मिन्वर्णे पृथक्त्वं सा विवृत्तिः पदमध्यगा"। इत्युक्तलक्षणा। सा ऊष्मवर्णेषु यदा भवति "अर्ष" इत्यादिषु तदा नैव श्रुतिर्भवति। पदान्तोपि पादान्तः, अर्द्धर्चान्तः ऋगन्तश्च इति त्रिविधः। अथवा पदान्तः पादान्तः सामान्तश्च इति त्रिविधः। एवं च पदान्ते गतिसंज्ञकयोरक्षरयोः ह्रस्वदीर्घयोः स्वर मध्ये श ष स ह युक्तेषु स्थितसन्धिषु च आयतादि श्रुतिर्न भवतीत्युक्तं भवति।।

114. स्वरान्तरनिरतानि ह्रस्वदीर्घघुटानि च ।
श्रुतिस्थाने विशेषेण श्रुतिवत्स्वरतो भवेत् ।।17।।

अन्वयः- विशेषेण स्वरान्तरनिरतानि ह्रस्व दीर्घ घुटानि च श्रुति स्थाने स्वरतः श्रुतिवत् भवेत्।

वि- स्वे स्वरे स्वरान्तरे चाविरते ह्रस्वे दीर्घे च घुटसंज्ञिते च श्रुतिः न कार्या। स्वर एव श्रुतिसदृशः कार्य इति।

वि- सामव्यतिरिक्ते श्रुतिद्धयमेव प्रवर्तत इत्याह-

115. दीप्तामुदात्ते जानीयाद्दीप्ताञ्च स्वरिते विदुः।
अनुदात्ते मृदुर्ज्ञेया गान्धर्वश्रुतिसम्पदः।।18।।

अन्वयः- उदात्ते दीप्ताम् जानीयात्, स्वरिते च दीप्ताम् विदुः, अनुदात्ते मृदुः ज्ञेया। (एताः) गान्धर्वः श्रुतिसम्पदः ।

गान्धर्वे गाने श्रुतेरभावेऽपि तत्सदृशः स्वरः कार्य इत्याह। स्वरसम्पद एता ऋगादि विषये।

वि- उदात्तादयः त्रयः केनचिद्विशेषेण पञ्चत्वेनोच्यन्ते-

116. उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा।
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा ।। 19।।

अन्वयः- उदात्तः च अनुदात्तः च तथा स्वरित प्रचिते निघातः च इति स्वरभेदः तु पञ्चधा विज्ञेयः।

स्वरिताक्षरात्पराणि स्वरितान्येव प्रचयसंज्ञकानि। प्रचये परतः स्थिते स्वरितस्याहननान्निघातः स्वरित एव। प्रचयाऽभावे शुद्ध एव स्वरितो भवति।।

इति सप्तमी कण्डिका

(1.8)
अष्टमी कण्डिका

वि- एवं सामस्वरानुषङ्गेण किञ्चिदृग्यजुर्विषयं लक्षणमुक्तम्। इदानीमार्चिकस्वरनिरूपणं प्राधान्येन क्रियते-

117. अत ऊर्ध्वं प्रवक्ष्यामि आर्चिकस्य स्वरत्रयम्।
उदात्तश्चानुदात्तश्च तृतीयस्स्वरितस्वरः।। 1।।

अन्वयः- अतः ऊर्ध्वम् आर्चिकस्य स्वरत्रयम् प्रवक्ष्यामि। उदात्तः च अनुदात्तः च तृतीयः स्वरितः स्वरः इति।

ऋचां समूह आर्चिकम्। "अग्न आयाही"त्यादिकस्य ग्रन्थस्य संज्ञा। स्वरत्रयं मुख्यतया आर्चिके। प्रचयनिघातादयः स्वरितविशेषा एव।

प्र- उदात्तादीनां हस्तविन्यासप्रकारस्तु-

अङ्गुष्टः प्रथमो ज्ञेयः द्वितीया तर्जनी तथा।
मध्यमा तृतीयास्यादेतास्वेवार्च्चिकं भवेत्।
प्रथमायामुदात्तस्यात्स्वरितप्रचयावुभौ।
द्वितीयायां तृतीयायामनुदात्त इति स्थितिः।
प्रथमः स्वरितो ज्ञेयः प्रचयस्तु तदुत्तरः। इति।।

वि- स्वरितस्य सप्तप्रकारता प्रतिपाद्यते-

118. य एवोदात्त इत्युक्तस्स एव स्वरितात्परः।
प्रचयः प्रोच्यते तज्ज्ञैर्नचात्रान्यत्स्वरान्तरम् ।।2।।

अन्वयः- य एव उदात्त इत्युक्तः स एव स्वरितात् परः तज्ज्ञैः प्रचयः प्रोच्यते, अत्र अन्यत् स्वरान्तरम् न च अस्ति।

119. वर्णस्वारोऽतीतस्वारः स्वरितो द्विविधः स्मृतः।
मात्रिको वर्ण एवेति दीर्घस्तूच्चारितादनु ।।3।।

अन्वयः- स्वरितः वर्णस्वारः अतीतस्वारः द्विविधः स्मृतः। वर्णः एव मात्रिकः इति, उच्चरितात् अनु तु दीर्घः (भवति)।

120. स तु सप्तविधो ज्ञेयः स्वारः प्रत्ययदर्शनात्।
पदेन तु स विज्ञेयो भवेद्यो यत्र यादृशः ।।4।।

अन्वयः- स तु स्वारः प्रत्ययदर्शनात् सप्तविधः ज्ञेयः, यो यत्र यादृशः भवेत् स पदेन तु विज्ञेयः।

स्वर्यते उदात्तानुदात्तयोर्मध्ये उच्चार्यत इति स्वरितः। स्वरित विशेषोरुढ्याऽध्येतृभिरुच्यते। प्रतीयते विशेषोऽवगम्यते येन स

प्रत्ययः । स्वरस्वरूपस्य प्रत्ययस्य दर्शनात् अवगमात् सप्तप्रकारता विज्ञायते।।

वि- स्वरस्यापि स्वरुपविशेषावधारणं कार्यं नात्र लोपः कार्यः इत्युच्यते-

121. सप्तस्वरान्प्रयुञ्जीत दक्षिणं श्रवणं प्रति।
आचार्यैर्विहितं शास्त्रं पुत्रशिष्यहितैषिभिः ।।5।।

अन्वयः- सप्त स्वरान् दक्षिणं श्रवणं प्रति प्रयुञ्जीत। शास्त्रम् पुत्रशिष्यहितैषिभिः आचार्यैः विहितम्।

महता प्रबन्धेन स्वरलक्षणं पुत्राद्युद्देशेनारब्धमाचार्यैः। अतः श्रोतव्यं श्रुतिपथं सप्तस्वरा नेतव्याः। दक्षिणस्य प्राधान्यादादरार्थमुपादानम्।

वि- उच्चनीचव्यतिरिक्तं स्वरितस्य स्वरुपं यन्नावधार्यते सम्यगिति तद्विशेषस्वरपरिज्ञानं कुतो भवेदिति च उच्यते-

122. उच्चादुच्चतरन्नास्ति नीचान्नीचतरं तथा ।
वैस्वर्ये स्वारसंज्ञायां किं स्थानं स्वारमुच्यते ।।6।।

अन्वयः- उच्चात् उच्चतरम् न अस्ति, नीचात् नीचतरम् तथा, वैस्वर्ये स्वारसंज्ञायाम् स्वारं किं स्थानं उच्यते ।

वैस्वर्ये विशिष्टस्वरत्वेन या स्वारसंज्ञा तद्विषये किं स्वारस्य स्थानम् ? उदात्ताऽनुदात्त व्यतिरिक्तस्याभावात्।

वि- अत्रोत्तरम्-

123. उच्चनीचस्य यन्मध्ये साधारणमिति श्रुतिः।
तं स्वारं स्वारसंज्ञायां प्रतिजानन्ति शैक्षिकाः ।।7।।

अन्वयः- उच्चनीचस्य मध्ये यत् साधारणम् इति श्रुतिः, शैक्षिकाः स्वारसंज्ञायां तं स्वारं प्रतिजानन्ति।

उदात्ताऽनुदात्तयोर्मध्यवर्ति यद्रूपं साधारणमिति एवं रूपा श्रुतिर्या तं स्वारं स्वारसंज्ञायां विषयं शैक्षिकाः शीक्षाध्यायिनः उदात्तानुदात्तमध्यवर्तिनी या श्रुतिः तां श्रुतिमेव साधारणं स्वारं वदन्ति।।

वि- उदात्तानुदात्तवत्स्वरितोपि षड्जाद्यनुगमो भवति, भेदे सति स्वरितस्य भवतीत्युच्यते-

124. उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ।
स्वरितप्रभवाह्येते षड्जमध्यमपञ्चमाः ।।8।।

अन्वयः- निषादगान्धारौ उदात्ते, ऋषभ धैवतौ अनुदात्ते, एते षड्ज मध्यम पञ्चमाः स्वरितप्रभवाः हि ज्ञेयाः।

वि- जिह्वामूलीयोपध्मानीययोरपि वर्णैकदेशयोः स्वरयोगः पृथक् पृथगवगन्तव्य इति प्रतिपादनाय उच्यते-

125. यत्र क ख परा ऊष्मा जिह्वामूलप्रयोजना।
तामप्याज्ञापयेन्मात्रां प्रकृत्यैव तु सा कला ।।9।।

अन्वयः- यत्र क ख परा ऊष्मा जिह्वामूलप्रयोजना, अथ ताम् मात्राम् आज्ञापयेत्, कला तु सा प्रकृत्या एव ज्ञेया।

जिह्वामूलस्य प्रयोजनभूता। जिह्वामूलप्रयोजना क खौ परौ यस्यास्तां मात्रां आज्ञापयेत्। मात्रात्वे नाज्ञापयेत्। यतः प्रकृत्यैव स्वेन रूपेण सा कला अङ्गः वर्णैकदेशभूतः। उपध्मानीयस्याप्युपलक्षण-मेतत्। "नमः कपर्दिने", "यः पावमानीः" (उ.ऋ.10.7) इत्याद्युदाह-रणानि।।

वि- स्वारसप्तकानान्नामानि निर्दिश्यन्ते लक्षणभेद प्रतिपादनार्थम्-

126. जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जनमेव च।
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः।। 10।।

अन्वयः- जात्यः, क्षैप्रः, अभिनिहितः, तैरोव्यञ्जनः, तिरोविरामः, प्रश्लिष्टः, सप्तमः पादवृत्तः चेत् पूर्वसूचिताः स्वरितस्य सप्त भेदाः सन्ति।

वि- एतेषां लक्षणमुदाहरणं च कथ्यते-

127. स्वराणामहमेतेषां पृथग्वक्ष्यामि लक्षणम्।
उद्दिष्टानां यथान्यायमुदाहरणमेव च ।। 11।।

अन्वयः- अहम् उद्दिष्टानाम् एतेषाम् स्वराणाम् यथान्यायम् पृथक् लक्षणम् उदाहरणम् एव च वक्ष्यामि।

प्र-

सर्वतीक्ष्णोऽभिनिहितस्ततः प्रश्लिष्ट उच्यते।
ततो मृदुतरौ चैव जात्यः क्षैप्रश्च तावुभौ।
ततो मृदुतरस्वारस्तैरोव्यञ्जन उच्यते।
पादवृत्तो मृदुतर इति स्वारबलाबलम्।। (मां.शि.81,82)

इति अष्टमी कण्डिका

प्रथमप्रपाठकः समाप्तः

(2.1)

अथ द्वितीयः प्रपाठकः

प्रथमा कण्डिका

128. सयकारं सवं वाप्यक्षरं स्वरितं भवेत्।
न चोदात्तं पुरस्तस्य जात्यः स्वारस्स उच्यते ।।1।।

अन्वयः- स यकारम् स वम् वा अपि अक्षरम् स्वरितम् भवेत्, तस्य पुरः उदात्तं न च, सः स्वारः जात्यः उच्यते।

वि- स यकारेण वा वकारेण वा यदक्षरं स्वरितं वर्तते अनन्तरं चोदात्तं तस्य न भवति स स्वारो जात्यः पदमध्यस्थत्वात् स्वाभाविकः। "सजात्येन" (पू. आ.5.2.6) इति सयकारम्। "भूर्भुवस्वः" (प्र.गा. 1.1.1) इति सवकारं विजानीयात्।।

प्र- उदात्तादीनां वर्णादयः-

शुक्लमुच्चं विजानीयान्नीचं लोहितमेव च ।
श्यामन्तु स्वरितं विद्यात् अग्निरुच्चस्य दैवतम्।।
नीचं सोमं विजानीयात्स्वरिते सविता भवेत्।
उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमेव च।।
वैश्यन्तु स्वरितं विद्यात् भारद्वाजमुदात्तकम्।
नीचं गौतममित्याहुः गार्ग्यन्तु स्वरितं विदुः।।
विद्यादुदात्तं गायत्रं नीन्त्रैष्टुभमेव च।
जागतं स्वरितं विद्यात्.................. ।। इति (शै.शि, या शि)

129. इ उ वर्णौ यदोदात्तावपद्येते य वौ क्वचित् ।
अनुदात्त परे नित्यं विद्यात्क्षैप्रस्य लक्षणम् ।।2।।

अन्वयः- यदा क्वचित् उदात्तौ इ उ वर्णौ अनुदात्ते परे नित्यं य वौ आपद्येते (तत्) क्षैप्रस्य लक्षणम् विद्यात्।

वि- इकार उकारो वा उदात्तः पदादिना अकारेण अनुदात्तेन सँहितायां यकारापत्या वकारापत्या वा स्वरितो भवति स स्वारः क्षेपणात् परस्य पूर्वस्य प्रेरणात् क्षिप्रस्वरिते भवतः। क्षैप्रः श्रुष्टि + अग्ने = श्रुष्ट्यग्ने (पू.आ.2.1.10) वीडु+ अङ्गः= वीड्वङ्गः इति।।

130. ए ओ आभ्यामुदात्ताभ्यामकारो निहितश्च यः ।
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः ।।3।।

अन्वयः- उदात्ताभ्याम् ए ओ आभ्याम् निहितः च यः अकारः, अकारम् यत्र लुम्पन्ति तम् अभिनिहितम् विदुः।

वि- एकारादोकाराद्वा उदात्तादुत्तरो योसावकारो निहितो निवारितः तं यत्र लुम्पन्ति एकारे वा ओकारे वा अनुप्रवेशयन्ति सँहितायां तमभिनिहितं पूर्वत्र प्रक्षिप्तं स्वरितं स्वरं विदुः। "तेऽमन्वत" (पू. आ.7.3.5)इति।।

131. उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत्।
एष सर्वबहुस्वारस्तैरोव्यञ्जनमुच्यते।।4।।

अन्वयः- छन्दसि यत् किञ्चित् उदात्तपूर्वम् स्वरितम् भवेत्, एष सर्वबहुस्वारः तैरोव्यञ्जनम् उच्यते।

वि- एवं विधानां स्वराणां बहुत्वात् बहुश्चासौ स्वरश्च बहुस्वारः सर्वत्र ऋग्वेदे यजुर्वेदे च भावात् सर्वबहुस्वारः तिरोधागमनेन तिरोधावगमने वा व्यज्यत इति तिरव्यञ्जन एव तैरोव्यञ्जनः स्वारः। ऊतये (पू.आ.3.9.2.) वीतये (पू.आ.1.1.1) इत्यादि।।

132. अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम्।
तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः।।5।।

अन्वयः- यदि अवग्रहः उदात्तः, यत्र अवग्रहात् अनन्तरम् परम् स्वरितम् स्यात्, तम् तिरोवारमम् विद्यात्।

वि- उपसर्गा अवगृह्यन्ते इति तत्परं तस् वा तिङन्तस्य कृदन्तस्य वा पदस्य अन्तरः पृथक् क्रियते इत्यवग्रहः उदात्तः तस्मात्परं स्वरितः तिरोविरामं प्राप्तः अवग्रहस्वारः। विष्कभिते (पू.आ.4.8.9) इत्यादि।।

133. इकारं यत्र पश्येयुरिकारेणैव संयुतम् ।
उदात्तमनुदात्तेन प्रश्लिष्टन्तन्निबोधत ।।6।।

अन्वयः- यत्र उदात्तम् इकारम् अनुदात्तेन इकारेण एव संयुतम् पश्येयुः, तम् प्रश्लिष्टम् निबोधत।

वि- इकार उदात्त इकारेणानुदात्तेन यदा संयुक्तो भवति तदा स्वरितः प्रश्लिष्टस्वार उच्यते। अधाहीन्द्र (पू.आ 4.2.8) इत्यादि।।

134. स्वरे चेत्स्वरित यत्र विवृत्ता यत्र संहिता ।
एतत्पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम् ।।7।।

अन्वयः- यत्र संहिता विवृत्ता, यत्र स्वरे स्वरितम् चेत् , एतत् शास्त्रचोदितम् पादान्तवृत्तस्य लक्षणम्।

वि- स्वरेऽक्षरे अकारादौ यत्र यत्र मन्त्रे स्वरितः संहितानुपूर्वेण पदेन सह यदा विवृत्ता विभक्ता भवति तदा पादान्तवृत्तः पादवृत्तः स्वरितस्वरः सप्तमः। कईवेद (पू. आ. 4.1.5) इत्यादि।।

135. जात्यस्वारस्सजात्येन श्रुष्ट्यग्ने क्षैप्र उच्येत ।
तेमन्वताभिनिहितः तैरोव्यञ्जन ऊतये ।।8।।

136. तिरोविरामो विष्कभिते प्रश्लिष्टोहीन्द्रगिर्वणः।
पादवृत्तः कई वेद स्वारास्सप्तैवमादयः ।।9।।

अन्वयः- सजात्येन स्वारः जात्यः, श्रुष्ट्यग्ने क्षैप्रः उच्यते, तेमन्वत अभिनहितः, ऊतये तैरोव्यञ्जनः, विष्कभिते तिरोविरामः, हीन्द्र गीर्वणः प्रश्लिष्टः, कई वेद पादवृत्तः, एवमादयः सप्त स्वाराः। वि-श्लोकद्वयेनोक्तान्युदाहरणानि पूर्वमेवोक्तानि-

137. उच्चादेकाक्षरात्पूर्वं स्वर्यते यदिहाक्षरम् ।
स्वाराणां जात्यवर्जानामेषा प्रकृतिरुच्यते ।।10।।

अन्वयः- पूर्वम् उच्चात् एकाक्षरात् यत् अक्षरम् इह स्वर्यते, जात्यवर्जानाम् स्वाराणाम् एषा प्रकृतिः उच्यते।

वि- जात्यस्वारादिवर्जमुदात्तादनन्तरं वर्णं उच्चार्यमाणमक्षरं स्वरितं स्वारसंज्ञं भवतीति सामान्यलक्षणमुक्तम्-

138. चत्वारस्त्वादितः स्वाराः कम्पं पुष्यन्ति शास्त्रतः।
उदात्तेवैकनीचे वा जुह्वोग्निस्तत्र दर्शनम्।।11।।

अन्वयः- आदितः चत्वारः तु स्वाराः उदात्ते वा एकनीचे वा शास्त्रतः कम्पम् पुष्यन्ति, तत्र जुह्वोग्नि दर्शनम्।

वि- इकारान्त उकारान्तपरतः अकारद्वयपरौकारपरः सन्ध्यक्षर इति चत्वारः स्वाराः उदात्ते नीचे अनुदात्ते वा एकस्मिन्नीचे परतः आदितः आदिभागे कम्पं पुष्यन्ति प्रतिपद्यन्ते। "कम्पितः चलद्रूपस्वारः कम्प इत्युच्यते"। उपत्वाजुह्वोऽ3मम इति (उ.आ.15.3) सन्ध्यक्षरोदाहरणम् - श्लोकानुरोधाद्व्यवहित पदोपादेन उदाहरण-मुक्तम्। "उपत्वाजुह्वोऽ3मम घृताचीर्यन्तु हर्यत। अग्ने हव्या जुषस्वनः" (उ.आ.15.3) जुह्वोग्निस्तन्निदर्शनमिति।।

प्र- चत्वारः- जात्यः क्षैप्रः अभिनिहितः प्रश्लिष्टश्च। आदितः आदिभागे। जात्यः- उपत्वाजुह्वोऽ3मम (उ.आ.15.3) क्षैप्रः- पाह्यूऽ3त

द्वितीयया (पू.आ 1.4.2) इत्यादि। अभिनिहितः -वृधेऽस्मान् (पू.आ 3.5.7) प्रश्लिष्टः- अधाहीन्द्र गीर्वणः (पू.आ. 4.2.8) । अभ्याऽ3र्षानपच्युतः (उ.आ.5.7) एकनीचः।

अत्र शिक्षान्तरम्-

प्रश्लिष्टजात्यक्षैप्राश्च यश्चाभिनिहितश्च यः।
उदात्तोपस्थिते तेषामेकदेशं प्रकल्पयेत्।। इति (मा.शि.85)

इति प्रथमः खण्डः

(2.2)

द्वितीया कण्डिका

वि- चतुर्णां स्वाराणां क्वचिद्ध्रस्वकम्पत्वं क्वचिद्दीर्घकम्पत्वं इत्याह-

139. इकारान्ते पदे पूर्वे उकारे परतः स्थिते।
ह्रस्वकम्पं विजानीयान्मेधावी नात्र संशयः।।1।।

अन्वयः- पूर्वे पदे इकारान्ते परतः उकारे स्थिते, मेधावी कम्पम् ह्रस्वम् विजानीयात्, अत्र संशयः न अस्ति।

140. इकारान्ते पदेचैवोकारद्धे परे पदे।
दीर्घकम्पं विजानीयाच्छग्धूष्विति निदर्शनम्।।2।।

अन्वयः- इकारान्ते एव च पदे परे उकारद्धेपदे दीर्घम् कम्पम् विजानीयात्, शग्ध्यूषु इति निदर्शनम्।

141. त्रयो दीर्घास्तु विज्ञेया ये च सन्ध्यक्षरेषु वै।
मन्या पथ्या न इन्द्राभ्या शेषा ह्रस्वाः प्रकीर्तिताः।।3।।

अन्वयः- मन्या पथ्या इन्द्राभ्या त्रयः, ये सन्ध्यक्षरेषु वै च दीर्घाः तु विज्ञेयाः, शेषाः ह्रस्वाः प्रकीर्तिताः।

पाह्यूऽ3तद्धितीयया (पू.आ.1.4.2) इत्युकारपरो ह्रस्व-कम्पः। शिष्टमन्यदुदाहृतम्।।

प्र- "इकारान्ते" इत्यस्य शग्ध्यूऽ3षु शचीपते इति (पू.आ 3.2.1) मन्या- भद्रावस्त्रासमन्याऽ3वसानः इति (उ.आ 11.8) पथ्या - ऋतस्य पथ्याऽ3अनु इति (उ.आ 16.2) न इन्द्राभ्या - मानइन्द्राभ्याऽ3दिशः इति (पू. आ 1.4.4) सन्ध्यक्षरेषु- संवेशन-स्तन्वेऽ3। उपत्वाजुह्वोऽ3 । अन्यत्र ह्रस्वकम्प एव उच्चारणीयः इत्यर्थः।। कम्पस्वरूपन्तु –

पूर्वाङ्गेण हतं पूर्वं पराङ्गेण तु धारितम्।
व्यञ्जनेन द्विधा भिन्नः स्वरो भीतस्तु कम्पते।

इति (लो.शि.1.4)

ह्रस्वदीर्घकम्पयोर्मात्राविशेषश्च-

दीर्घकम्पेऽद्ध्यर्द्धमात्रा तृतीये परिकीर्तिता।
द्वितीये अर्द्धमात्रा तु ....।।

इति (लो.शि.1.5)

वि- उदात्तपूर्वं स्वरितं स्वारप्राप्तं क्वचिन्न भवति। उदात्तमेव भवतीत्युच्यते-

142. अनेकानामुदात्तानां अनुदात्तः परो यदि ।
शिवकम्पं विजानीयादुदात्तः प्रत्ययो यदि ।।4।।

अन्वयः- यदि अनुदात्तः अनेकानाम् उदात्तानाम् परः, यदि प्रत्ययः उदात्तः (तम्) शिवकम्पं विजानीयात्।

द्वित्रादीनामुदात्तानां अनुदात्तः परो यदि भवति तदा द्वितीये तृतीये वा उदात्तपरतः शिवकसंज्ञः आद्य उदात्तो भवतीति। त्र्यम्बकः, त्रिणयनः, शिवः, शिवकः। तर्जन्यङ्गुष्ठसंयुक्तयोः मध्यमाङ्गुलिर्यदा ह पृष्ठे वर्तते द्वित्वयोगात् शिव इवाङ्गुली सन्निवेशः शिवक इत्यध्येतृप्रसिद्धः। "आदित्प्रत्नस्य" (पू.आ.1.2.10) इत्यादौ द्वयोः उदात्तयोः परोऽनुदात्तः। "गिराममाऽजाता सुक्रतो पृण" (पू.आ. 1.5.8) इत्यादौ त्रयाणामुदात्तानां परोऽनुदात्तः। शिवक इति उदात्तविषया संज्ञा न स्वरितविषया इति।।

वि- पूर्वोक्तमेव विशेषेणोच्यते-

143. यत्र द्विप्रभृतीनि स्युः उदात्तान्यक्षराणि तु।
नीचञ्चोच्चञ्च परतः तत्रोदात्तं विदुर्बुधाः।।5।।

अन्वयः- यत्र द्विप्रभृतीनि तु अक्षराणि उदात्तानि स्युः, परतः नीचम् च उच्चम् च , तत्र बुधा उदात्तम् विदुः।

नीचमनुदात्तं नीचं पूर्वं परं वा उदात्तं पूर्वस्य पूर्वयोर्वा परत इत्यर्थः।।

प्र- अस्त्यैव अनुदात्तमध्यगतस्य नामान्तरमुक्तं आर्चिकलक्षणे-

मध्येऽनुदात्तयोस्स्यातामुदात्तौ प्रथमं तयोः।
उत्कलाः कोशमित्याहुरुदात्तं सम्प्रदायिनः।
संज्ञामात्रं हि तस्यैतदन्येभ्यः पारिभाषिकम्।
सङ्कोच्य मध्यमां किञ्चिदुदात्ते तर्जनीं स्पृशेत्।

उदाहरणमालोड्य "स नः पवस्व शङ्गवे" ।। इति (आ.ल.1.1)

वि- वर्णोच्चारणगतं लक्षणमुच्यते-

144. न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ।
न च वर्गद्वितीयेषु न चतुर्थे कदाचन ।।6।।

अन्वयः- रेफे वा हकारे वा क्वचित् द्विर्भावः न जायते, वर्गद्वितीयेषु च न, चतुर्थे कदाचन न जायते।

रेफहकारयोः ख छ ठ थ फानां घ झ ढ ध भानां च केवलानां प्रयोगो भवति। न रेफहकारादि द्वित्वरूपेणेति।।

प्र- तदुक्तं गौतमीयायाम् –
"अथ सर्वेषां व्यञ्जनानां द्विर्भावो भवति द्वादशाक्षरवर्जम्।
ते ख छ ठ थ फाः घ झ ढ ध भाः रहयोश्च" इति (गौ.शि 2.2.6)
वि- कथं चतुर्थादीनां प्रयोगसंयोग इत्याह-

145. चतुर्थञ्च तृतीयेन द्वितीयं प्रथमेन तु।
आद्यमन्त्यञ्च मध्यञ्च स्वाक्षरेणैव पीडयेत् ।।7।।

अन्वयः- चतुर्थम् तु तृतीयेन, द्वितीयम् तु प्रथमेन, आद्यम् अन्त्यम् च मध्यम् च स्वाक्षरेण एव पीडयेत्।

ककारादियुक्तास्संयोगे खकारादय उच्चारणीयाः। गकारादि युक्ताश्च घादयः। प्रतिवर्गमाद्यमध्यान्त्यानि स्वाक्षरेणैव योजनीयानि। वाक्करोतीत्युदाहरणम्।।

146. अनन्त्यश्च भवेत्पूर्वोन्त्यश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः।।8।।

अन्वयः- यदि अनन्त्यः च पूर्वः भवेत्, अन्त्यः च परतः, तत्र मध्ये पूर्ववर्णयोः सवर्णः यमः तिष्ठेत्।

वि- अनन्त्यो गकारादिः पूर्वः अन्त्यश्च नकारादिः परतः संयोगे यदा भवति तत्र मध्ये यमः निपाताद्यो पूर्ववर्णस्य सवर्णः सदृशः उच्चारणीयः। पूर्ववर्णयोरिति द्विरुक्तत्वापेक्षया उक्तम्। "अग्न आयाहि" (पू.आ 1.1.1) इत्युदाहार्यः।।

प्र-

अपञ्चमश्चैकपदे संयुक्तं पञ्चमात्परम्।
उत्पद्यते यमस्तत्र सोङ्ग पूर्वाक्षरस्य हि ।।

इति शिक्षान्तरम्।।

147. वर्गान्त्याञ्छषसैस्सार्द्धमन्तस्थैर्वापि संयुतान्।
दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाध्वगाः।।9।।

अन्वयः- श ष सैः सार्धम् वा अन्तस्थैः संयुतान् अपि वर्गान्त्यान् दृष्ट्वा आदेशिकम् अध्वगा इव यमाः निवर्तन्ते।

वि- शषसयरलवैः पूर्वैः शादिभिस्सह यत्र वर्गान्त्या नकारादयो भवन्ति तत्र यमा न प्रयुज्यन्ते। विष्णुः (पू.आ. 3.4.9) इत्यादि। अध्वगा आदेशिकं देशवासित्वं यस्य न संभाव्यते तं चोरन्दृष्ट्वा यथा मार्गान्निवर्तन्ते तद्वद्यमा इत्यर्थः।।

प्र-

पञ्चमाश्शषसैर्युक्ता अन्तस्थैर्वापि संयुताः।
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः।। इति (या.शि)

148. तृतीयश्च चतुर्थश्च चतुर्थादि परं पदम्।
द्वौ तृतीयौ हकारश्च हकारादि परं पदम्।। 10।।

अन्वयः- तृतीयः च चतुर्थः च परम् पदम् चतुर्थादि, द्वौ तृतीयौ चतुर्थः च परम् पदम् हकारादि ज्ञेयम्।

वि- संहितायां वर्गतृतीयचतुर्थौ वर्णौ यदा संयुक्तौ तदा पदकाले चतुर्थाद्युत्तरपदं भवति। न तु द्विर्वचनमता तृतीयादि एवं द्विर्वचने सति द्वौ तृतीयौ वर्णौ हकारश्च सँहितायां यत्र तं पदकाले हकारादि पदं भवति। न तृतीयादि तद्भवति। वाग्घहहहह (आ.गा.5.2.20) इत्यादि उदाहरणीयः।

प्र- प्रथमन्तु हकारश्च तच्चतुर्थमवाप्यते इति शिक्षान्तरम्।

149. अनुस्वारोपध्ममूलानां न क्वचित्क्रमतेऽक्षरम्।
र ह पूर्वयुते चापि उत्तरं क्रमतेक्षरम्।। 11 ।।

अन्वयः- अनुस्वारोपध्मामूलानाम् परम् क्वचित् क्रमते। रहपूर्वे संयुते च अपि उत्तरम् अक्षरम् क्रमते।

वि- अनुस्वारस्य उपध्मानीयस्य जिह्वामूलीयस्य च क्वचित्पदे यदक्षरं न क्रमते न द्विरुच्यते। न संबाधः। "नमः पथे च"(आ.गा 5.1.7) "नमः कपर्दिने" (आ.गा 5.1.7) इत्युदाहर-णानि । रेफेण संयुते संबद्धे हकारेण च संबद्धे पदे उत्तरमक्षरं क्रमते द्विरुच्यते। "अर्क्कोदेवानाम्" (प्र.गा.16.234) "ब्रह्म" (पू.आ. 3.3.9) इत्याद्युदाहरणम्।।

प्र- सर्वत्र स्वरात्संयोगादिः क्रामति रेफहकारवर्जम्। ताभ्यामुत्तरं क्रमति। न क्रामते परमुपध्मानीयानुस्वारजिह्वामूलीया-नाम् इति (गौ.शि)

150. संयोगे यत्र दृश्येत व्यञ्जनं विरते पदे।
पूर्वाङ्गमादितः कृत्वा पराङ्गादौ निवेशयेत् ।। 12।।

अन्वयः- संयोगे यत्र विरते पदे व्यञ्जनम् दृश्येत, पूर्वाङ्गम् आदितः कृत्वा पराङ्गादौ निवेशयेत्।

151. संयोगे स्वरिते यत्र उद्घाते पतने तथा ।
पूर्वाङ्गमादितः कृत्वा पराङ्गादौ निवेशयेत् ।। 13।।

अन्वयः- यत्र संयोगे स्वरितम् उद्घाते पतने च तथा पूर्वाङ्गम् आदितः कृत्वा पराङ्गादौ निवेशयेत्।

वि- संयोगे यत्स्वरितं उद्घाते नीचादुपरिगमने पतने च उच्चादधोगमने च स्वरितस्य व्यञ्जनं पूर्वाङ्गं आदौ नीचे च उच्चे च कृत्वा पराङ्गस्यादौ स्वरं निवेशयेत् उच्चारयेत्।।

वि- पूर्वाङ्गपराङ्गविवेकार्थमुच्यते-

152. संयोगे दृश्यते यत्र व्यञ्जनं विरते पदे ।
पूर्वाङ्गं तद्विजानीयात् येनारम्भः परं हि तत् ।। 13।।

अन्वयः- यत्र संयोगे विरते पदे व्यञ्जनं दृश्यते, तत् पूर्वाङ्गं विजानीयात् येन परं हि तत् आरम्भः।

संयोगे विरते विभक्ते यद्व्यञ्जनं उत्तरपदेनाऽसंलग्नं दृश्यते तत् पूर्वस्य पदस्य अङ्गमिव तस्यैकदेशः। येन व्यञ्जनेन विभक्तेन संयोगे उत्तरपदस्यारम्भः तत्परस्याङ्गम्। "भूर्भुवस्वः" (प्र.गा.1.1) "तत्सवितुर्वरेण्यम्" (उ.आ.13.10) इत्युदाहरणे नीचोच्चयोः।।

153. संयोगात्तु परं स्वार्यं परं संयोगनायकम् ।
संयुक्तस्य तु वर्णस्यास्वरं पूर्वमक्षरम् ।। 14।।

अन्वयः- परम् संयोगनायकम् संयोगात् तु परम् स्वार्यम्, संयुक्तस्य वर्णस्य तु पूर्वम् अक्षरम् अस्वरम्।

वि- संयोगे परो भागः स्वरसंयुक्तः कार्यः। स्वरस्य तत्र विश्रान्तिः प्रधानत्वात्। पूर्वव्यञ्जनं अस्वरं प्रयोक्तव्यम्। उदाहरणद्वयमुक्तम्।।

प्र- संयुक्ताक्षरे परवर्ण स्वरसहितं कुर्यात्। संयोगनायकत्वं परस्यैव। संयुक्तस्य तु वर्णस्य पूर्वमक्षरं न स्वार्यम्। यथा "अग्ने" इत्यत्र द्वौ गकारौ यमश्च नकारश्च एषां संयोगे पूर्ववर्णः गकारः स च न स्वार्यः। किन्तु परवर्ण एव इति ।।

154. अनुस्वारः पदान्तश्च क्रमजं प्रत्यये स्वके ।
स्वरभक्तिस्तथारेफः सर्वं पूर्वाङ्गमुच्यते ।।15।।

अन्वयः- अनुस्वारः पदान्तः स्वके प्रत्यये क्रमजम् च तथा स्वरभक्तिः रेफः सर्वम् पूर्वाङ्गम् उच्यते।

वि- सम्भवतीति अनुस्वारः पदान्तश्च ककारादि प्रत्यये स्वके सवर्णे सम्बन्धे पदे परतः क्रमजः द्विर्वचनं जातः तद्वद्भवतीत्यर्थः। सममीहति अर्द्धं सम्भवतीति ऋकाररेफरुपास्वरभक्तिः एतत्पूर्वाङ्गम्।।

प्र- अनुस्वारो विसर्गश्च नासिक्योऽथयमास्तथा।
जिह्वामूलमुपध्मा च न वै ते स्युः पराश्रयाः।।
अयोगवाहा एवैते निजस्वर विवर्जिताः।
पूर्वस्याङ्गं भवन्त्येते स्वर एतेषु पूर्ववत्।।
स्वरभक्तिश्च पूर्वाङ्गम्। इति शिक्षान्तरम्।।

155. पादादौ च पदादौ च संयोगावग्रहेषु च।
य्यशब्द इति विज्ञेयो योन्यस्स य इति स्मृतः।।16।।

अन्वयः- पादादौ च पदादौ च संयोगावग्रहेषु च यशब्दः इति विज्ञेयः, यः अन्यः सः यः इति स्मृतः।

वि- पादपदसंयोगाऽवग्रहेषु द्विरुक्तो यकारः प्रयोक्तव्यः। अन्यस्तु केवलः । यज्ञायज्ञा (पू.आ.1.4.1)इति पादादौ। त्वंय्यविष्ठ (उ.आ.1.18) इति पदादौ। पन्य्यं पन्य्यम् (पू.आ.1.3. 9) इति संयोगे। अन्य्यः अन् यः (उ.प 9.3.4) उद्यता उत् यता (उ.प. 1.5.12) इत्यवग्रहे। वीतये (पू.आ 1.1.1) इत्यादौ लघु यकारः।।

156. पदादावप्यविच्छेदे संयोगान्ते च तिष्ठताम्।
वर्जयित्वा रहू याणामयादेशः प्रदृश्यते।। 17।।

अन्वयः- पदादौ अपि अविच्छेदे संयोगान्ते च तिष्ठताम् रहयाणाम् वर्जयित्वा यादेशः प्रदृश्यते।

प्र- सूर्य्यम् (पू.आ.1.3.10) मुह्यन्त्वन्ये (उ.आ.16.9) इत्यादौ द्विरुक्तो यकारः। तक्षद्यदि (पू.आ 5.5.5) न्यग्वाहूयसे (पू.आ.3.9.7) इत्यादौ लघु यकारः।।

157. स्वसंयुक्तो गुरुर्ज्ञेयः सानुस्वारोऽग्रिमः स्फुटः।
अणुशेषोऽध्रिगोर्वापि युगलादिरविस्फुटः।। 18।।

अन्वयः- स्वसंयुक्तः गुरुः ज्ञेयः, सानुस्वाराऽग्रिमः स्फुटः, अणुशेषः अध्रिगोः वा अपि युगलादिः अविस्फुटः।

इति द्वितीया कण्डिका

(2.3)

तृतीया कण्डिका

158. यदुदात्तमुदात्तन्तद्यत्स्वरितन्तत्पदे भवति नीचम्।
यन्नीचन्नीचमेव तद्यत्प्रचयस्थन्तदपि नीचम् ।।1।।

अन्वयः- यत् उदात्तम् तत् पदे उदात्तम्, यत् स्वरितम् तत् नीचम् भवति, यत् नीचम् तत् नीचम् एव भवति, यत् प्रचयस्थम् तत् अपि नीचम् भवति।

वि- संहिताकाले यदुदात्तं तत्पदे उदात्तमेव। यदनुदात्तं तदपि पदे अनुदात्तमेव। यत्स्वरितं स्वरितविशेषो वा प्रचयः स अनुदात्तो भवति पदकाले। "अग्नआयाहि वीतये"। अग्ने-आ-याहि-वीतये (पू.आ.प.1.1.1) इत्याद्युदाहरणम्।।

159. अयमग्निस्सुतोमित्रमिदं वयमयावहाः।
प्रियन्दूतं घृतवित्त चित्तमभिशब्दश्च नीचतः।। 2।।

वि- एतानि पदानि नीचादनुदात्तादारभ्यन्ते अयन्ते (पू.आ.1.7.5) अग्निः(पू.आ.1.1.4) सः-सुतः (उ.आ.10.6) मित्रं -हुवे (उ.आ.4.6) इदं-वसो (पू.आ.2.3.10) वयम्-इन्द्र (पू.आ. 2.4.8) अया-सोम (पू.आ.6.2.12) वहाः-प्रियम्-मित्रम् (पू.आ. 1.4.1) घृतम्-दुहते (पू.आ.2.10.3) वित्तम्- मे (पू.आ.5.3.9) अभि-प्रियाणि (पू.आ.6.7.1) इत्युदाहरणानि।।

160. अर्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च।
शतेषु सपवित्रेषु नीचादुच्चार्यते श्रुतिः।।3।।

वि- अर्कमर्चन्तु (पू.आ.2.7.4) इत्यादयोर्क्काः। सुतेषु नः (पू.आ.5.8.4) सुते सचा (पू.आ.3.5.9) इति सुतादयः। यज्ञायज्ञा (पू.आ.1.4.1) यज्ञायसन्तु (उ.आ.1.18) इत्यादयः। यज्ञाः कलशेषु (उ.आ.9.2) इत्यादयः कलशाः। शतहिमाः (पू.आ. 5.7.8) शतं (उ.आ.22.1) इत्यादयश्शताः। पवित्रे (पू.आ.6.1.4) इत्यादयः पवित्राः। एतेषान्नीचादनुदात्तादुपक्रमः।

161. हरिवरुणवरेण्येषु धारापुरुषेषु च स्वरति रेफः।
विश्वानरो नकारेण शेषा रस्वरिता नराः ।।4।।

वि- हरिँ हिन्वन्ति (उ.आ.2.21) वरुणोमित्रः (पू.आ. 2. 10.1) वरेण्यम् (पू.आ.1.5.4) धारासुतस्य (पू.आ.5.2.4) सहस्र शीर्षाः पुरुषः (पू.आ.7.4.3) एतेषु रेफस्य स्वरितत्वम्। विश्वानरस्य (पू.आ.4.8.5) इति नकारस्य स्वरितत्वम्। अन्यत्र नरशब्देषु रेफस्यैव स्वरितत्वम्। शेषा नराः रस्वरिताः।

162. द्वौ वरुणौ वस्वरितौ उदुत्तमं त्वं वरुण ।
धाकारे चोरुधारायामुरुधारेव दोहते ।।5।।

वि- उदुत्तमं वरुण (पू.आ.6.1.4) इति वकारस्य स्वरितत्वम् न रेफस्य। एवं त्वं वरुण (पू.आ.7.5.11) इत्यत्रापि उरुधारामरङ्कृतम् (पू.आ.4.1.3) उरुधारेव (उ.आ.13.4) इति धाकारस्य स्वरितत्वम्।।

163. मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्।
तस्यादितोऽर्द्धमात्रा वै शेषन्तु परतो भवेत् ।।6।।

अन्वयः- इह मात्रिकम् वा द्विमात्रम् वा यत् अक्षरम् स्वर्यते, तस्य अर्धमात्रा आदितः, वै शेषम् तु परतः भवेत्।

वि- पूर्वाङ्गम् इति (2.2.12) वर्णापेक्षया उक्तम्। स्वरापेक्षया इदमुच्यते। ह्रस्वस्य दीर्घस्य वा स्वरितस्यादावर्द्धमात्रा उदात्तस्य वाऽनुदात्तस्य वा पूर्वभागः। शिष्टं परतः स्वरितम्। "तस्यादित उदात्तमर्द्धह्रस्वम्" इति पाणिनिः (1.2.32)

164. अदीर्घं दीर्घवत्कुर्याद्द्विस्वरं यत्प्रत्युज्यते।
कम्पोत्स्वरिताऽभिगीतह्रस्वकर्षणमेव च ।।7।।

अन्वयः- कम्पोत्स्वरिताभिगीतम् ह्रस्वकर्षणम् एव च यत् द्विस्वरम् प्रयुज्यते, अदीर्घं दीर्घवत् कुर्यात्।

वि- कम्पादि विषये ह्रस्वानां दीर्घसादृश्यं कुर्यात्। "पाह्यूऽ3उतद्वितीयया" (पू.आ.2.4.2) उद्गतं स्वरं उत्स्वरम्। नीचादुपरिस्थित उत्स्वरितम् "भूर्भुवस्वः" (प्र.गा.1.1.1) ओइवोइपन्यया (प्र.गा.1.1.8) इत्यभिगीतम्। यंयंयऽ2म् (प्र.गा.9.1.9) इति ह्रस्वकर्षणम्।।

प्र- साम्नि तु उत्स्वरितं- "चतुर्थादि मन्द्रान्तं" यथा मनुष्येऽ5भिरग्निः (प्र.गा.2.2.10) इत्यादि। द्वितीयादि प्रथमान्तं अभिगीतम् "अभिगीतेर्द्धमात्रा द्वितीये प्रथमेऽद्ध्यर्द्धा (मा.ल)।

165. निमेषकाला मात्रास्याद्विद्युत्कालेति चाऽपरे।
ऋक्स्वरातुल्ययोगा वा मतिस्स्यात्सोमशर्मणः ।।8।।

अन्वयः- मात्रा निमेषकाला स्यात्, अपरे च विद्युत्काला इति, ऋस्वरा वा तुल्ययोगा स्यात् सोमशर्मणः मतिः।।

वि- मात्रास्वरूपमुच्यते- "अक्षिपक्ष्मपातनं निमेषः"। तत्काला मात्रा। विद्युत्कालोक्ता मात्रेति केचिदाचार्याः। सोमशर्मण आचार्यस्य ऋगकारकालतुल्यावेति। द्रुत मध्य विलम्बितत्वेन व्यवस्थाकार्या।।

प्र- ह्रस्वमात्रा इति मात्रालक्षणे अकालोह्रस्वः इति (ऋ.तं मात्रा इति च (ऋ.तं.2.5.7) अक्ष्मपक्षपरिक्षेपो निमेषः परिकीर्तितः । सूर्यरश्मिप्रतीकाशा कणिका यत्र दृश्यते। आणवस्य तु सा मात्रा तु चतुराणवी इति च।।

166. समासेऽवग्रहं कुर्यात्पदञ्चात्रानुसंहितम् ।
यतोक्षरादितिकरणं पदान्तन्तस्य तं विदुः ।।9।।

अन्वयः- अत्र समासे अनुसंहितम् पदम् अवग्रहम् च कुर्यात्। यतः अक्षरात् इतिकरणम् तम् तस्य पदान्तम् विदुः।

वि- समासपदमेव विषयं तत्रावग्रहं पदविभागं कुर्यात्। समासपदं चाऽनुसंहितं अत्र अनुसन्धेयम्। यतोक्षरादितिकरणं अध्येतारः कुर्वन्ति पदान्तं तं समासपदस्य विदुः। हव्यदातये इति हव्य-दातये (पू.आ.प.1.1.1) विश्ववेदसमिति विश्व-वेदसम् (पू.आ.प.1.2.2) इति पूर्वाचार्यापेक्षया इति करणान्तता। कात्यायनस्तु हव्यदातये हव्य-दातये इति अवग्रहं करोति।

प्र- सामपदपाठकारो गार्ग्य इति दुर्गः (निरु.2.3.1)

167. सर्वत्र पुत्र मित्र सखिशब्दा
अद्रि शतक्रतो इत्यवग्राह्याः।
आदित्य विप्रजातवेदाश्च सत्पति
गोपति वृत्रहा समुद्राश्च।। 10।।

168. स्वर्युवो देवयवश्चारतिन्देवतातये।
चिकितिश्चुक्रुधं चैव नावगृह्णन्ति पण्डिताः ।। 11।।

वि- स्वुर्युवो देवयव इति अच् प्रत्ययान्तो न पदद्वयम्। अरतिमिति न तत्र "अलं भूषणपर्याप्तवारणेषु" (धा.पा 615) इति धातो रूपम्। देवतातये इति तिलिप्रत्यये देवतातिः। चिकितिरित चेततिः द्विवचनम्। चक्रुधमिति क्रुधेः द्विवचनम्। अत एकपदत्वादेतेषां नावग्रहं कुर्वन्ति आचार्याः।।

प्र- स्वुर्युवः- अच्छाव इन्द्रम्मतयस्वुर्युवः (पू.आ.5.9.6) देवयवः- मर्मृज्यन्ते देवयवः (उ.आ.16.5) अरतिम्- मूर्द्धानन्दिवो अरतिम् (पू.आ.1.8.5) देवतातये- उपमान्देवतातये (पू.आ. 5.1.1) चिकितिः- अचेत्यग्निश्चिकितिः (पू.आ. 5.7.1) चुक्रुधम् -भूर्णिम्मृगन्न सवनेषु चुक्रुधम् (पू.आ.4.2.5) ।

इति तृतीया कण्डिका

(2.4)
चतुर्थी कण्डिका

169. विवृत्तयश्चतस्रो वै विज्ञेया इति मे मतम्।
अक्षराणान्नियोगेन तासान्नामानि मे श्रृणु ।। 1।।

अन्वयः- अक्षराणाम् नियोगेन चतस्रः वै विवृत्तयः विज्ञेयाः इति मे मतम्। तासाम् नामानि मे श्रृणु।

170. ह्रस्वादिर्वत्सानुसृजा वत्सानुसारिणी चाग्रे।
पाकवत्युभयोर्ह्रस्वा दीर्घवृद्धा पिपीलिका ।।2।।

अन्वयः- ह्रस्वादिः वत्सानुसृजा, अग्रे च वत्सानुसारिणी, उभयोः ह्रस्वा पाकवती, दीर्घवृद्धा पिपीलिका।

वि- विवेकेन पृथक्भावेन वर्तत इति विवृत्तिः। पूर्वपदे ह्रस्वः उत्तरपदे दीर्घः इति ह्रस्वादिः। वत्सेनेव लघुना गौर्वृद्धा अनुसृता। अग्नआयाहि (पू.आ.1.1.1) इत्यादिका। आदौ दीर्घः यस्याः परतः ह्रस्वः सावत्समिवानुसरतीति वत्सानुसारिणी। प्रेष्ठंवो अतिथिम् (पू.आ.1.1.5) इत्यादिका। उभयोः पदयोराद्यन्तयोः ह्रस्वो यस्यास्सापाकवती चुल्लीद्वयसंयोगात्। अग्न इत्थेतरा गिरः (पू.आ.1.1.7) इति। यथा उभयत्र दीर्घाभ्यां वृद्धा पिपीलिकेव पुर्वोत्तरभागे गुरुत्वम्। तेन दीर्घवृद्धा पिपीलिका। निष्कृण्वाना आयुधानीव (उ.आ.19.16) इति यथा ।।

प्र- द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते। विवृत्तिस्तत्र विज्ञेया ... इति विवृत्ति लक्षणम्।।

171. चतसृणां विवृत्तीनामन्तरम्मात्रिकं भवेत्।
अर्द्धमात्रिकमन्येषामन्येषामणुमात्रिकम् ।।3।।

अन्वयः- चतसृणां विवृत्तीनां अन्तरं मात्रिकं भवेत्। अर्द्धमात्रिकं अन्येषाम् अन्येषां अणु मात्रिकम्।।
वि- शाखाभेदाभिप्रायेणायं मात्राविकल्पः।

172. आपद्येत मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्।
यलवेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम् ।।4।।

अन्वयः- मकारः रेफोष्मसु प्रत्ययेषु अनुस्वारम् आपद्येत, यलवेषु परसवर्णम्, स्पर्शेषु उत्तमापत्तिम् च आपद्येत।।

वि- मावाँ रातिः (पू.आ.3.10.5) तँसखायः (उ.आ.1 8. 8) उद्धँशमिव (पू.आ.4.6.1) एवँ ह एहि । एवमादिषु परतो मकारोऽनुस्वारो भवति। त्वं यविष्ट (उ.आ.9.18) तं लोकम् । सुहवँ शूरमिन्द्रं। तंवस्सखा (पू.आ.6.8.4) संवत्सरः।। इत्यादौ परसवर्णता । सम्महेम (पू.आ. 1.5.4) विधुन्दद्राणम् (पू.आ. 4.4.3) इत्यादौ स्पर्शेषु परतः स्पर्शवर्गसदृशोत्तमापत्तिर्मकारस्य भवतीत्यर्थः।।

प्र- अनुस्वारस्वरूपन्तु-

अनुस्वारपदे पूर्वे विकारमुपगच्छति।
वेष्टितं बिन्दुमात्रं च तल्लिखित्वा प्रकीर्तितम्।
रेफोष्मसु प्रत्ययेषु निदर्शनमथोच्यते।
चित्रँराधो अँशुर्मदाय हवीँषितो धियँ सचे।
त्वँ होतेति च पञ्चानान्निदर्शनमितीरितम्।
ऊष्माणस्तु यदाऽन्येन व्यञ्जनेन समन्विताः।
स्थिताश्च प्रत्यये तेषां वैकृतन्तुल्यमुच्यते।
सोमँ श्रीणन्ति नृँप्याहि सँस्थे त्वँह्यङ्गदेति च। इति।।

173. नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते।
आकाँरँ रक्तमित्याहुर्नकारेण तु रज्यते।।5।।

अन्वयः- पूर्वे पदे नकारान्ते परतः च स्वरे स्थिते आकारम् रक्तम् इति आहुः, नकारेण तु रज्यते।

वि- स्वरे परतः आकारः पूर्वः नकारेण रज्यते। वण्महाँ असि (पू.आ.3.9.4) इत्युदाहरणम्। पूर्वः आकारः रक्तस्सन् नकारेण रागो भवतीत्यर्थः।

174. नकारान्ते पदे पूर्वे व्यञ्जनैश्च यवोहिषु।
अर्द्धमात्रा तु पूर्वस्य रज्यते त्वणुमात्रया ।।6।।

अन्वयः- पूर्वे पदे नकारान्ते य वो हि षु व्यञ्जनैः च पूर्वस्य तु अर्धमात्रा अणुमात्रया रज्यते।

वि- नकारान्तस्य अर्द्धमात्रेण नकारेण अर्द्धमात्राकारादिकस्य वर्णस्य रज्यत इत्यर्थः। यकारवकारादिषु परतः नकारान्तं तस्य अर्द्धमात्रेण नकारेण अर्द्धमात्राकारादिकस्य वर्णस्य रज्यत इत्यर्थः। नान्यथा तु रज्यते। तन्नोरुच्च। तान्ह्युश्मसि (उ.आ.7.7) इत्यादि। नान्यथा तु रज्यत इति एना तव यजामहे इत्याद्युदाहरणम्।।

175. नकारः स्वरसंयुक्तश्चतुर्युक्तो विधीयते।
रेफो रङ्गश्च लोपश्चेत्यनुस्वारोपि वा क्वचित् ।।7।।

अन्वयः- स्वरसंयुक्तः नकारः रेफः रङ्गः च लोपः च क्वचित् अनुस्वारः वा अपि चतुर्युक्तः विधीयते।

वि- पदान्तस्य नकारस्य पदे परतः चत्वारि रूपाणि भवन्ति। भवान्- चिनोती भवाँश्चिनोतीति नकारस्य विसर्जनीयश्चुत्वं पूर्वस्यानुनासिक इति रेफोदाहरणम्। रङ्गः पूर्वमुदाहृतः। महाँ इन्द्रः (पू. आ.2. 8.2) दधन्वाँ योन (5.3.2) इत्यादौ नकारस्य लोपः पूर्वस्यानुनासिकः। पूर्वस्यानुस्वारः अनुनासिकात्परोऽनुस्वारो वा भवति।।
वि-रङ्गस्वरूपदर्शनं क्रियते-

176. हृदयादुत्थितो रङ्गः कांस्येन समनिस्स्वनः।
मृदुश्चैव त्रिमात्रश्च दधन्वाँ इति निदर्शनम्।।8।।

अन्वयः- कांस्येन समनिरस्वनः मृदुः च एव त्रिमात्रः च रङ्गः हृदयाद् उत्थितः. दधन्वाँ इति निदर्शनम्।

177. यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते ।
एवं रङ्गः प्रयोक्तव्यः नारदस्य मतं यथा ।।9।।

अन्वयः- नारदस्य मतम् यथा, यथा सौराष्ट्रिका नारी तक्राँ इति अभिभाषते, एवम् रङ्गः प्रयोक्तव्यः।

सुराष्ट्रदेशे जाता सौराष्ट्रिका । सा यथा तक्राँ इत्यभिभाषते तादृग्विधो रङ्गः । स्पष्टार्थमन्यत्।।

प्र- रङ्गविषये शिक्षान्तरवचनानि-

रङ्गवर्णं प्रयुञ्जीत न ग्रसेत्पूर्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत्।।
हृदये चैकमात्रस्तु अर्द्धमात्रस्तु मूर्द्धनि।
नासिकायान्तथार्द्धञ्च रङ्गस्यैवं द्विमात्रता ।।

(पा.शि.27.28)

रङ्गे चैव समुत्पन्ने न ग्रसेत्पूर्वमक्षरम्।
स्वरन्दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत्।।
यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते।
एवं रङ्गः प्रयोक्तव्यः ङकारपरिवर्जितः।।
द्विमात्रो मात्रिको वापि नासामूलं समाश्रितः।
अन्ते प्रयुज्यते रङ्गः पञ्चमैस्सानुनासिकः।।
नासादुत्पद्यते रङ्गः कांस्येन समनिस्स्वनः।
मृदुश्चैव द्विमात्रश्च वृष्टिमाँ इति निदर्शनम्।।

इति (या.शि.1891.94)

इति चतुर्थी कण्डिका

(2.5)
पञ्चमी कण्डिका

178. स्वरा गडदबाश्चैव ङणनमास्सहोष्मभिः ।
चतुर्णां पदजातीनां पदान्ता दशकीर्तिताः ।।1।।

अन्वयः- स्वराः गडदबाः ऊष्मभिः सह ङणनमाः च एव दश चतुर्णाम् पदजातीनाम् पदान्ताः कीर्तिताः।

वि- स्वराः अकारादयः। गडदबङणनमाश्चाष्टौ ऊष्माणौ च षकारसकारौ इति दश पदान्ताः पदैस्सह न सम्बध्यन्ते। कटतपानां पदान्तेन सह सम्बन्धेऽतिप्रसिद्धत्वान्नोच्यते। खछठथफघझढधभाश्च न सम्बध्यन्ते। शकारहकारौ च ऊष्ममध्या न सम्बध्यन्ते इति पदानां दशेत्युक्तम्। "नामाख्यातोपसर्गनिपाताः" चत्वारि पदजातानि। उदाहरणानि- अग्न आयाहि (पू.आ.1.1.1) इम इन्द्र (पू.आ.3.1.1) इत्यादि स्वराः पदान्ताः। वाग्घहहहह (आ.गा.5.2.20) विभ्राड् बृहत् (पू.आ 7.5.2)। तदिन्द्र (उ.आ. 10.23) त्रिष्टुबिह । त्वं य इति (उ.आ. 9.18) त्वङ्कविः (उ.आ.6.17) त्वञ्जनासः। तन्नोमित्रः (पू.आ. 8.1.5) त्वम्भरामसि । निष्पविः । भुवः स्वरिति गादयो दश ।।

179. स्वर उच्चस्वरो नीचः स्वरस्स्वरित एव च।
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः ।।2।।

अन्वयः- स्वरः उच्चः, स्वरः नीचः, स्वरः एव स्वरितः च । स स्वरः यत्र तिष्ठति व्यञ्जनानि तम् अनुवर्तन्ते।

180. स्वरप्रधानन्त्रैस्वर्यमाचार्याः प्रतिजानते।
मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः।।3।।

अन्वयः- आचर्याः त्रैस्वर्यम् स्वरप्रधानम् प्रतिजानते। व्यञ्जनम् मणिवद् विद्यात्, स्वरं च सूत्रवद् विदुः।

181. दुर्बलस्य यथा राष्ट्रं हरेत बलवान्नृपः।
दुर्बलं व्यञ्जनन्तद्वद्धरेत बलवान्स्वरः।।4।।

अन्वयः- यथा बलवान् नृपः दुर्बलस्य राष्ट्रम् हरेत, तद्वत् बलवान् स्वरः दुर्बलम् व्यञ्जनम् हरेत।

वि- अकारादयः चतुर्दश स्वराः उदात्तादिस्वरयुक्ताः। कादयो हकारान्ताः व्यञ्जनविशेषा नोदात्तादि श्रुतियोगिनः। यत्रोदात्तादौ स्वरास्तिष्ठन्ति तत्र व्यञ्जनान्यनुतिष्ठन्ति गुणत्वेन वर्तन्ते । स्वर प्रयुक्तानां कादीनां स्वरमुपलभ्यत इति मणिदृष्टान्तेनोच्यते। पूर्वपदान्तमपि ककारादि परपदस्थेन स्वरेण स्वरूपलाभार्थमाकृष्यत इति नृपराष्ट्रोदाहरणम्।।

प्र- दुर्बलस्य यथा राष्ट्रं हरेत वलवान्नृपः।
एवं व्यञ्जनमासाद्य अकारो हरते स्वरम्।

इति शिक्षान्तरम्।।

182. ओभावश्च विवृत्तिश्च शष सा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः।।5।।

अन्वयः- ऊष्मणः ओभावः च विवृत्तिः च शषसाः रेफः एव च जिह्वामूलम् उपध्मा च अष्टविधाः गतिः।

वि- तन्नोमित्रः (पू.आ.6.1.5) इति ओभावः ऊष्मणः विसर्जनीयस्य । त्वन्न इन्द्र (पू.आ.5.2.7) इति विवृत्तिः। निष्पीते-समिद्धश्शुक्रः। अग्निस्तिग्मेन (पू.आ.1.3.2) इति अग्निस्समिधा (पू.आ.1.8.1) इति शषसाः। सुष्टुतीरूप (उ.आ.6.23) इति रेफः।

अग्निर्वृत्राणि (पू.आ.1.1.4) गीतिस्स्युः। दिवः कविः (पू.आ.1.3) जिह्वामूलम्। महोभिः पाहि (पू.आ.1.1) इति उपध्मा च इति विसर्जनीयस्य सँहिताकाले इन्द्रधनुराकारता।।

प्र- गृणानो हव्यदातये (पू.आ.1.1.1) ओभावः ऊष्मणः विसर्गस्य। विश्वस्या अरातेः (पू.आ.1.1.6) इति विवृत्तिः। समिद्धश्शुक्रः (पू.आ. 1.1.4) इति शकारः। ज्योतिष्कृणोति (पू.आ. 4.2.1) इति षकारः। नमस्ते (पू.आ. 1.2.1) इति सकारः।

183. स्वरप्रत्यया विवृत्तिस्संहितायां तु या भवेत् ।
विसर्गस्तत्र मन्तव्यस्तालव्यो वात्र जायते ।।6।।

अन्वयः- संहितायाम् तु या स्वरप्रत्यया विवृत्तिः भवेत् तत्र विसर्गः मन्तव्यः, अत्र तालव्यः वा जायते।

184. सन्ध्यक्षरोपधे सन्धौ प्राप्त लुप्तौ यवौ यदि ।
व्यञ्जनाख्या विवृत्तिस्तु स्वराख्या प्रकृतिसंहिता ।।7।।

अन्वयः- सन्ध्यक्षरोपधे सन्धौ यदि यवौ प्राप्त लुप्तौ , विवृत्तिः तु व्यञ्जनाख्या प्रकृतिसंहिता स्वराख्या भवति।

वि- अस्मे इति भानो इति सन्ध्यक्षरमधीयते उपधेरन्ते यस्य सन्धिस्तस्य यदा यवौ श्रूयमाणतया प्राप्तौ तदा अस्मा इति व्यञ्जनाख्या विवृत्तिः। अस्माइदन्धसो (उ.आ. 12.2) इति। यदा यवौ लुप्तौ तदा स्वराख्या विवृत्तिः। तेन कृत्वा संहिता तुल्या विवृत्तिः। सार्द्ध व्यञ्जनाख्या यवयोरलोपो भवतीत्यर्थः।।

प्र- स्वरप्रत्ययेति शुक्र आहुतः (पू.आ. 1.1.4) अग्न आयाहि (पू.आ 1.1.1) इति क्रमेणोदाहरणे।।

185. ऊष्मान्तं विरते यत्र सन्धावो भवते च यत् ।
विवृत्तिर्या भवेत्तत्र स्वराख्या तां विनिर्द्दिशेत् ।।8।।

अन्वयः- यत्र विरते ऊष्मान्तम्, यत् सन्धौ च ओ भवते, तत्र या विवृत्तिः भवेत् ताम् स्वराख्या विनिर्द्दिशेत्।

वि- इदमपि स्वराख्या विवृत्तिः सन्धानं सन्धौ विसर्गलोपे सति यत्र अ ओ भवति सापि स्वराख्या विवृत्ति-र्भवति। क ईं वेदेत्यादि (पू.आ.3.1.5) को अद्य (पू.आ.4.5.10)

186. यद्योभावप्रसन्धानमुकारादि परं पदम् ।
स्वरान्तन्तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ।।9।।

अन्वयः- यदि ओभावप्रसन्धानम् पदम् उकारादिपरम् तादृशम् स्वरान्तम् विद्यात्, यद् अन्यत् तत् व्यक्तम् ऊष्मणः विद्यात्।

वि- ओभावश्च सन्धानं ओकारान्तस्य यदा सन्धानमुकारादि परं पदं भवति स्वरान्तं तादृशं सम्यगित्यादि ऊष्मणस्सन्धानम्। अपरा व्याख्या - ओभावः प्रसन्धानमोकारन्तस्य यदा प्रसन्धानता भवति तदा उकारादि परं पदं भवति स्वरान्तं च तादृशं सन्धानं भवति। "वायो ऋ" इति "क इह" इत्यादि ऊष्मणस्सन्धानम्।।

प्र- यदि कदाचित् ऊष्मणो विसर्गादन्यत् विसर्गाद्विना ओभाव प्रसन्धाने गुणकृत्यं ऊष्मणस्तु। सत्व रुत्व उत्व गुणत्वेऽतिपरे उत्वम्। यत्रोष्मणोऽभावात् केवलं गुणत्वे उभयोरुदाहरणयोस्सादृश्ये चिन्त्यते, उकारादिर्यस्य तत्पदं यस्य तत् तादृशं स्वरान्तं ओभावान्तं ज्ञेयं व्यक्तम्। दूतं वो विश्ववेदसम् (पू.आ. 1.2.2) अत्र विसर्गान्तम्। एषो उषा (पू.आ. 2.9.4) अत्र स्वरान्तं इति विवेकः।।

187. प्रथमा उत्तमाश्चैव पदान्तेषु यदि स्थिताः ।
द्वितीयँ स्थानमापन्नाश्शषसप्रत्यया यदि ।।10।।

अन्वयः-यदि प्रथमाः उत्तमाः च एव पदान्तेषु स्थिताः, यदि शषसप्रत्ययाः द्वितीयम् स्थानम् आपन्नाः भवन्ति।

वि- शषसादिषु परतः प्रथमास्तकारादय उत्तमाश्च मकारादयः यदा पदान्ताः तदा द्वितीयं स्थानं थकारादिरूपतां आपन्ना भवन्ति। तत्सवितुः । तथ्सवितुः (उ.आ.13.10) तांत्समुद्रम् । तांथ्समुद्रम्। महान्त्समुद्रः। महान्थ्समुद्रः (पू.आ. 5.5.3) इत्यादि।

188. प्रथमानूष्मसंयुक्तान् द्वितीयानिव दर्शयेत् ।
न चैनान्प्रतिजानीयाद्यथामत्स्यः क्षुरोप्सराः ।।11।।

अन्वयः- ऊष्मंसयुक्तान् प्रथमान् द्वितीयान् इव दर्शयेत्। एनान् न च प्रतिजानीयात्, यथा मत्स्यः क्षुरः अप्सराः।

वि- सकारादिषु परतः तकारादयः द्वितीय थकारादि सदृशा उच्चारणीयाः। न तु द्वितीया एव स्युः। स्फुटमुच्चारणीयाः।।

प्र- पदान्ताः प्रथमवर्णाः शषसेषु परेषु तान् ।
शौनको द्वितीयानिच्छेत्प्रकृत्या शाकटायनः।।

इत्युक्तत्वात् उभयथाऽपि पाठः-

तत्सवितुः। अथवा तथ्सवितुः (उ.आ.13.10) इत्यादिषु।

इति पञ्चमी कण्डिका

(2.6)
षष्ठी कण्डिका

वि- गायत्र्यादि छन्द आदिस्वरुपं सामान्येन प्रतिपाद्यते-

189. छन्दोमानञ्च वृत्तञ्च पादस्थानन्त्रिकारणम् ।
ऋचस्वच्छन्दवृत्तास्तु पादास्त्वक्षरमानशः।।1।।

अन्वयः- छन्दः मानम् च वृत्तम् च त्रिकारणम् पाद-स्थानम्। ऋचः तु स्वच्छन्दवृत्ताः, पादाः तु अक्षरमानशः भवन्ति।

पादस्थाने पादतो मन्त्रतः श्लोकतश्च त्रिकारणम्। पादान्तं छन्दोमानं वृत्तञ्चेति त्रीणि कारणानि लौकिकानि। लौकिकादि-गुरुलघुपरिज्ञानेन गायत्र्यादिरुपमवधार्यते, ऋचान्तु स्वाभाविकं गायत्र्यादि छन्दः । गुरुलघ्वारब्धं छन्दवृत्तं अक्षरगणनया मानं छन्दोविभागावगमायाऽवस्थितमिति नातीवच्छन्दो लक्षणेनेह प्रयोजनम्। स्वच्छन्दः वृत्तञ्च यासामिति स्वच्छन्दवृत्ताः। अक्षराणाम्मानेन अक्षरमानशः। तेन यन्मानं छन्दोविभागः अवगमायावस्थितमिति तेनैव छन्दो लक्षणेनेह प्रयोजनम्। स्वच्छन्दोवृत्तञ्च यासामिति स्वच्छन्दवृत्तम्। अक्षराणाम्मानेन अक्षरमानशः।

अपरा व्याख्या- पादस्थाने पदान्तो मन्त्रः श्लोकश्च त्रिकारणम्। पदान्तं छन्दोमानञ्च वृत्तञ्चेति त्रीणि कारणानि। लौकिकं श्लोकादि। गुरुलघुपरिज्ञानं गायत्र्यादिरुपमवधार्यते। ऋचान्तु स्वाभाविकं गायत्र्यादिछन्दः। गुरुलघ्वोरक्षरं छन्दोवृत्तमक्षरगणनया मानं छन्दोविभागावगमाय अवस्थित-न्नातीवछन्दो लक्षणेनेह प्रयोजनम्। स्वच्छन्दो वृत्तञ्च सामानि यासां इति स्वच्छन्दो वृत्तम्। अक्षराणाम्मानेन अक्षरमानशः।

190. ऋवर्णं स्वरभक्तिञ्च छन्दोमाने न निर्दिशेत् ।
प्रत्ययेन सहारेफं मिमीत स्वरभक्तिषु ।।2।।

अन्वयः- छन्दोमाने न ऋवर्णम् स्वरभक्तिम् च निर्दिशेत् स्वरभक्तिषु प्रत्ययेन सह अरेफम् मिमीत।

वि- ऋकारे स्वरे यो रेफः स्वरभक्तावसौ रेफः स्वरभक्तौ च यन्मात्राधिकः तदक्षरगणनायां छन्दोमाने न गणनीयम्। अक्षरान्तरत्वाभावात्। अर्षसि (5.3.2) अर्हति इत्यादौ स्वरभक्ति विषये। रेफं अपृथक् भूतरेफं वर्णमिव गणयेत् इति ।

191. ऋवर्णे तु पृथक् रेफः प्रत्ययस्तु यदा भवेत्।
विद्याल्लघुमृकारन्तु यदि तूष्माण संयुतः।।3।।

अन्वयः- ऋवर्णे तु रेफः पृथक् प्रत्ययः तु भवेत्। यदि ऊष्मणा संयुतः न, ऋकारम् तु लघुम् विद्यात्।

वि- ऋवर्णे एकस्मिन्नेव रेफमात्राव्यञ्जनरुपः प्रतीयतेऽनेन स्वरुपमक्षरमिति प्रत्ययः मात्रैकदेशोवधार्यते। तेन पृथक्वर्णद्वयं प्रत्ययस्तु पृथक् भवेत्। विद्याल्लघुमृकारं ऊष्मवर्णो यदि न संयुतो न संबद्धः तदा लघु ऋकारो वर्णः विज्ञायते। लघुस्वराख्यपदो विज्ञायते।

192. ऊष्मणैव हि संयुक्तो ऋकारो यत्र गम्यते ।
गुरुवर्णस्स विज्ञेयस्तृचञ्चात्राऽनुदर्शनम्।।4।।

अन्वयः- यत्र संयुक्तः ऋकारः ऊष्मणा एव हि गम्यते स गुरुवर्णः विज्ञेयः। अत्र अनुदर्शनम् स्तृचम्।

वि- ऋकार ऊष्मणैव शकारादिना संबध्यमानः स्वरोऽपि गुरुर्भवति। न लघुस्तृचमित्युदाहरणम्।।

प्र- ऊष्मणैव संयुक्त ऋकारः, उभयँ श्रृणवच्च नः(पू.आ. 290)

193. ऋषभञ्च गृहीतञ्च बृहस्पति पृथिव्याञ्च।
निर्ऋति पञ्चमाह्यत्र ऋकारा नाऽत्र संशयः।। 5 ।।

वि-निर्ऋतिः पञ्चमो येषां ते ऋषभादयो ऋकारा स्वरा विज्ञेयाः।

194. शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदसन्धौ ।
इ उ वर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता ।।6।।

अन्वयः- श ष स ह रादौ सन्धौ रेफः इ उ वर्णाभ्याम् हीना द्विपद स्वरभक्तिः क्वचित् जायते। एकपदा क्रमवियुक्ता जायते।

वि- शषसहरा आदिर्यस्य तत् शषसहरादि पदम्। तत्र एकपदा स्वरभक्तिर्जायते। किं भूता ? इत्याह इ उवर्णाभ्यां हीना अर्षसीति (पू.आ.6.3.1) अरिषसीति इकाराहीना। अरुषसीति उकारहीना। अर्षसीत्येवं प्रयोक्तव्येत्यर्थः। अत्र सुविचारः क्षेपकः ? क्वचिदेकपदा नृषाहमो इति ? एषा एकपदभूता पूर्वापरवर्णविभागक्रमयुक्ता । पूर्वपदपरवर्णविभागक्रमयुक्तेत्यर्थः।

प्र- रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः।
स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते।।

इति(या.शि.102)

ऋवर्णतुल्यतां याति रेफः शषसहोद्ध्र्वगः।
स्वरभक्त्यभिधेयोऽथ प्रत्येकन्नाम कथ्यते।।
हरिणी हंसचरणा काकिनी च करेणुका।
दर्शते हर्षते बर्सौ बर्हणा च यथाक्रमम्।।
ऋग्वेदब्राह्मणे दृष्टं बर्सावििति निदर्शनम्।

व्यञ्जनत्रयसंयोगात्पिण्डत्वन्न ऋवर्णताम् ।।
तर्ह्यारोहन्ति दर्श्या च कार्ष्मन्वेति निदर्शनम्, इति।।
स्वरोत्तरोष्मणः पूर्वा रेफस्य स्वरभक्तिता।
ऋकारस्य स्वरूपन्तत्बुद्ध्वा बोद्धुं हि शक्यते।।
स्वरभक्तिरतोविद्यादुकारमिति विस्तरात्।
ऋकारस्य स्वरूपं हि श्लिष्टपादचतुष्टयम्।।
पादेषु तेषु विज्ञेयावादावन्ते स्वरात्मकौ।
अणू रेफस्य मध्ये द्वौ विज्ञेयौ व्यञ्जनात्मकौ।।
रेफस्यादिभूतँ हि पादं पूर्वेण योजयेत्।
स्वरात्मकेन पादेन ह्युत्तरेणोत्तरं तथा।
स्वरपादान्वितौ भागौ स्वरभक्तिरितीरितौ।
हकारे पूर्वभागस्यादुत्तरश्शषसेषु च।
हकारे संवृतां विद्याद्विवृतामितरत्र तु।
पूर्वस्वरस्य चाल्पत्वमित्वमुत्वमितित्रयम्।
एतत्रयं विसृज्यैव स्वरभक्तिं समुच्चरेत्।। इति

याज्ञवल्क्यस्तु –

करिणी कुर्विणी चैव हरिणी हरिता तथा।
तथा हंसपादा नाम पञ्चैते स्वरभक्तयः।।
हरिणी रहयोर्योगे कुर्विणी लहकारयोः।
हरिणी रशयोर्योगे हरिता लहकारयोः।।
या तु हंसपदा नाम सा तु रेफषकारयोः।

इति (या.शि.98,99,100)

195. स्वरभक्तिर्द्विविधात्वृकारो रेफ एव च ।
स्वरोदा व्यञ्जनोदा च विहिताऽक्षरचिन्तकैः ।।7।।

अन्वयः- स्वरभक्तिः तु ऋकारः रेफ एव च द्विविधा, अक्षरचिन्तकैः स्वरोदा व्यञ्जनोदा च विहिता अस्ति।

वि- स्वरादुदेति स्वरोदा ऋकाराख्या। व्यञ्जनादुदेति व्यञ्जनोदा रेफाख्या ।।

196. शषसेषु स्वरोदयां हकारे व्यञ्जनोदयाम्।
शषसेषु विवृत्तान्तु हकारे संवृतां विदुः।।8।।

अन्वयः- श ष सेषु स्वरोदयाम् , हकारे व्यञ्जनोदयाम्, श ष सेषु विवृताम् हकारे तु संवृताम् विदुः।

वि- शषसविषये स्वरोदयां विवृत्ताञ्च जानन्ति। हकारविषये व्यञ्जनोदयां संवृताञ्च जानन्ति स्वरभक्तिं विदुः। शषसेषु अर्षसीत्यादि। हविषये अर्हन्तीत्यादि।।

197. स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान्परिवर्जयेत्।
इकारञ्चाप्युकारञ्च ग्रस्तदोषन्तथैव च ।।9।।

अन्वयः- स्वरभक्तिम् प्रयुञ्जानः इकारम् च अपि उकारम् च तथा एव ग्रस्तदोषम् च त्रीन् दोषान् परिवर्जयेत्।

वि- इउवर्णाभ्यां हीनेति (2.6.6) यदुक्तं तदेव सविशेषमुच्यते- अर्षसि (पू.आ.6.3.1) अर्हतीति। स्थानकरणनिष्पीडनेन प्रयोक्तव्यं इत्यर्थः।।

प्र- ग्रस्तदोषं अल्पत्वं इत्यर्थः। शिष्टं स्पष्टम्।।

198. संयोगपरं छपरं विसर्जनीयं द्विमात्रिकञ्चैव।
अवसानिकञ्च न लघु सानुस्वारं घुटन्तञ्च।।10।।

अन्वयः- संयोगपरम् छपरम् विसर्जनीयम् द्विमात्रिकम् च एव अवसानिकम् च सानुस्वारम् घुटन्तम् च लघु न भवति।

वि- संयोगः पर यस्याक्षरस्य छात्परं विसर्जनीयं अक्षरं द्वे मात्रे यस्याकारादेः तत् द्विमात्रिकं अवसाने भवं अवसानिकं सहानुस्वारेण वर्तत इति सानुस्वारं "द्विविधा गतिः पदान्तः" (ना.शि.1.7.16) इत्यादि घुटं न लघु गुरुत्वेनोच्चारणीयम्।।

प्र- यद्व्यञ्जनान्तं यदुचाऽपि दीर्घं संयोगपूर्वन्तथाऽनुनासिकम्। एतानि सर्वाणि गुरूणि विद्याच्छेषाण्यतोऽन्यानि ततो लघूनि इति (तै.प्रा.22.14)

इति षष्ठी कण्डिका

(2.7)

सप्तमी कण्डिका

वि- पादश्लोकादिना भवतीति वृत्तं गुरुलघुवर्णाः पथ्यादिगाथाऽवधारणं छन्दोलक्षणतः कर्तव्यमित्युदाहरणरूपेणोच्यते-

199. पथ्यापादः प्रथमो द्वादशमात्रस्तथा तृतीयोऽपि ।
अष्टादशो द्वितीयस्समापनः पञ्चदशमात्रः ।।1।।

अन्वयः- प्रथमः पथ्यापादः द्वादशमात्रः, तथा तृतीयः अपि, द्वितीयः अष्टादशः,समापनः पञ्चदशमात्रः।

पूर्वः पादस्सप्ताक्षरः । द्वादशमात्रस्तथा तृतीयोपीति एकादशाक्षरः। अष्टादशमात्रः द्वितीयः पादः। सप्ताक्षर एव द्वादशमात्रा तृतीयः। समापनोऽन्तिमश्चतुर्थः दशाक्षरः पञ्चदशमात्रः।।

200. पथ्यालक्षणमुक्तं या त्वन्या सा स्मृता विपुला ।।2।।

वि- पूर्वलक्षणेन विपुलापादप्राधान्यात्समासः समाप्ति-रूपा दशाक्षरश्चतुर्थः पादः द्वादशमात्रः समापनः पुनः पञ्चदशमात्रेति सकारादिकाः पञ्चेति पथ्यायालक्षणमुक्तं तदेव विपुलायाः। किन्तु "यात्वन्येति" पञ्चदशमात्रः द्वितीय इति व्यत्यासात् भेदः।।

201. अक्षराणां लघु ह्रस्वमसंयोगपरं यदि।
तत्संयोगोत्तरं विद्यात् गुरुर्दीर्घाक्षराणि तु।।3।।

अन्वयः- अक्षराणाम् ह्रस्वम् यदि असंयोगपरम् लघु, संयोगोत्तरं तत् दीर्घाक्षराणि तु गुरुः विद्यात्।

वि- अक्षराणाम्मध्ये यद्ध्रस्वन्तल्लघु। यत्र ह्रस्वं संयोगपरं दीर्घाणि चाक्षराणि गुरूणि च।।

202. विवृत्तिर्यत्र दृश्येत स्वारश्चैवाग्रतस्स्थितः।
गुरुस्वारस्सविज्ञेयः क्षैप्रस्तत्र न विद्यते ।।4।।

अन्वयः- यत्र स्वारः एव च अग्रतः स्थिता विवृत्तिः दृश्येत स स्वारः गुरुः विज्ञेयः , तत्र क्षैप्रः न विद्यते।

वि- विवृत्तः परभूतः स्वारः गुरुः। न क्षैप्रः न लघुरित्यर्थः।

203. अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तन्नीचस्वरितम्।
मध्योदात्तँ स्वरितं द्विरुदात्तमित्येता अष्टौ पदसंज्ञाः।।5।।

अन्वयः- अन्तोदात्तम् आद्युदात्तम् उदात्तम् अनुदात्तम् नीचस्वरतिम् मध्योदात्तम् स्वरितम् द्विरुदात्तम् इति एता अष्टौ पदसंज्ञाः।

वि- अष्टावेव प्रकारास्संभवन्तीति। तत्रोदाहरणानि प्रदर्श्यन्ते।

204. अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम् ।
अग्निस्सोमः प्रवोवीर्यँ हविषास्ववर्वनस्पतिः ॥6॥

अन्वयः- पदानाम् स्वरलक्षणम् अष्टप्रकारकम् विज्ञेयम्। अग्निः सोमः प्र वः वीर्यम् हविषा स्वः वनस्पतिः।

"अग्निर्वृत्राणि" इत्यग्निः अन्तोदात्तः (पू.आ.1.1.4) "सोमः पवते" इति सोम आद्युदात्तः (पू.आ. 6.4.5) "प्रवोयह्व"मिति "प्र" इत्युदात्तः । "व" इत्यनुदात्तः (पू.आ. 1.6.5) "बलं न्युब्जवीर्यम्" वीर्यं नीचस्वरितम् (पू.आ. 1.10.5) "हविषावावृधानः" (उ.आ.16.9) इति हविषा मध्योदात्तम्। "भूर्भुवस्वः" (पू.आ. 1.1.1) इति स्वः स्वरितम्। "वनस्पतिः" (उ.आ. 9.4) इति "व" "स्प" द्वे उदात्ते।।

प्र- कौहलिपाणिनिभ्यां नवप्रकार उक्तः-

अन्तोदात्तमथोदात्तमाद्युदात्तमुदात्तकम्।
मध्योदात्तं ह्युदात्तञ्च निहतस्वरितं तथा ।।
एकस्वरितम् , इति (कौहलशिक्षा.34.35) (पा.शि.45)

205. अन्तर्मध्ययोर्नाप्युदमनुदनुदनिपाते ।
आद्यात्स्वरितमुपसर्गे द्विर्न्नीचमाख्यात इति ॥7॥

206. स्वरितात्पराणि यानि स्युर्धार्याण्यक्षराणि तु ।
सर्वाणि प्रचयस्थान्युपोदात्तन्निहन्यते ॥8॥

अन्वयः- यानि स्वरितात् पराणि (तानि) तु धार्याक्षराणि स्युः। सर्वाणि प्रचयस्थानि उपोदात्तम् निहन्यते।

वि- निहोतासत्सि (पू.आ. 1.1.1) इति स्वरितात्तकारात्पराणि "सत्सीति" धार्याण्यक्षराणि ऊर्ध्वमधश्चागतानीति प्रचयस्थानि

स्वरितस्य प्रचिततत्वात्। उपोद्धतोदात्तमुपोदात्तं आद्यं स्वरितं निहन्यते। गान्धारो गीत्योच्चार्यते इति।।

वि- एतदेव विशेषत उच्यते।

207. प्रचयो यत्र दृश्येत तत्राहन्यात्स्वरं बुधः।
स्वरितः केवलो यत्र मृदु तत्र निपातयेत् ।।9।।

अन्वयः- यत्र प्रचयः दृश्येत तत्र बुधः स्वरम् हन्यात्,यत्र स्वरितः केवलः तत्र मृदु निपातयेत्।

प्रचये तत्राहननं निहोतासत्सि (पू.आ. 1.1.1) इति। बर्हिषि (पू.आ.1.1.1) इति प्रचयाभावे केवलस्य स्वरितस्य मृदुत्वम्।।

वि- एतत्परिज्ञानायाचार्यलक्षणमाह-

208. पञ्चविधमाचार्यकन्नाम मुखं न्यासः करणं प्रतिज्ञोच्चारणे।
अत्रोच्यते श्रेयः खलु वै सप्रतिज्ञोच्चारणा ।। 10।।

अन्वयः- आचार्यकम् नाम मुखम् न्यासः करणम् प्रतिज्ञा उच्चारणे। अत्र सप्रतिज्ञा उच्चारणा खलु श्रेयः उच्यते वै।

आचार्यत्वं पञ्चविधं पञ्चप्रकारम्। हस्ताग्रे दृष्टिनिवेशनादि मुखम् न्यासः अङ्गुष्ठादौ स्वरनिवेशः। करणं शिक्षाशास्त्रम्। प्रतिज्ञा गुरुपरम्पराऽगतमन्त्रस्वरूपावधारणम्। लक्षणागमानुसारेण प्रयोग उच्चारणम्। उच्चारणं यद्यपि सम्यक्कर्तुं न शक्यते तथाप्यागमावधारणं अवश्यं कर्तव्यमिति श्रेयः खलु सप्रतिज्ञोच्चारणमिति।।

वि- एतदेव विशेषेणोच्यते-

209. यस्य कस्यचिद्वर्णस्य करणन्नोपलभ्यते।
प्रतिज्ञा तत्र वोढव्या करणं हि तदात्मकमिति ।।11।।

अन्वयः- यस्य कस्यचित् वर्णस्य करणम् न उपलभ्यते, हि करणम् तदात्मकम् तत्र प्रतिज्ञावोढव्या इति।

वर्णस्वरादि विषयं करणं शिक्षादि शास्त्रं न ज्ञायते अथाप्यागमो यत्र सोऽवधारणीयः। करणं हि आगमपूर्वकं लक्षणम्। यथा लौकिकानामपि शब्दानां व्याकरणं लक्षणम्। अनेन प्रयोगमूलमभ्युपगम्यत इत्युच्यते "करणं हि तदात्मकमिति"। लक्ष्यानुसारि लक्षणमनुसृत्यवर्णाद्युच्चारणं यत्नतः करणीयम्।।

वि- नारदादीनामपि एतद्यत्नेनावधारणीयमित्याह-

210. तुम्बुरुनारदवसिष्ठविश्वावस्वादयश्च गन्धर्वाः।
सामसु निभृतं करणं स्वरसौक्ष्म्यात्तेपि हि न कुर्युः ।।12।।

अन्वयः- तुम्बुरु नारद वसिष्ठ विश्वावस्वादयः च गन्धर्वाः, ते अपि सामसु स्वरसौक्ष्म्यात् निभृतम् करणम् न हि कुर्युः।

निभृतं परिपूर्ण करणलक्षणं तेऽपि न कुर्युः। न वै योजयितुं शक्नुवन्ति भ्रंशन्नोजानन्तीत्यर्थः।।

इति सप्तमी कण्डिका

(2.8)
अष्टमी कण्डिका

वि-शरीरवाङ्मनोनिरूपणं सम्यग्गानसिद्धेरधिक्रियते-

211. कौक्षेयाग्निं सदा रक्षेदश्नीयादशनं हितम् ।
जीर्णाहारः प्रबुद्धस्सन्नुषसि ब्रह्म चिन्तयेत् ।। 1 ।।

अन्वयः- सदा कौक्षेयाग्निं रक्षेत्, हितम् अशनम् अश्नीयात्, जीर्णाहारः प्रबुद्धः सन् उषसि ब्रह्म चिन्तयेत्।

कुक्षौ भवं कौक्षेयं जाठराग्निम्। हितं पथ्यम्। पथ्याशनेन चाग्नेरक्षा । परिणतेचाहारे ब्रह्मणो वेदस्य चिन्तनम्। वाङ्मनोव्यापारेणावधारणं कार्यम्।।

212. शरद्विषुवतेऽतीते उषस्युत्थानमिष्यते।
यावद्वासन्तिकी रात्रिः मध्यमा पर्युपस्थिता ।। 2 ।।

अन्वयः- अतीते शरद्विषुवतः यावद् वासन्तिकी मध्यमा रात्रिः पर्युपस्थिता उषसि उत्थानम् इष्यते।

वि- शरन्मध्ये यो विषुवान् तस्मादतीते उषसि रात्रिशेषे पाठार्थमुत्थानमिष्यते। यावद्वासन्तिकी वसन्ते भवा पर्युपस्थिता प्राप्ता रात्रिः तावदुत्थानं रात्रेर्महतीत्वात्।

213. आम्रपालाशबिल्वानामपामार्गशिरीषयोः ।
वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् ।। 3 ।।

अन्वयः- प्रातः उत्थाय वाग्यतः आम्रपालाशबिल्वानाम् अपामार्गशिरीषयोः दन्तधावनम् भक्षयेत्।

वि- आम्रादि वृक्षावयवदन्तधावनं वाग्यतो भक्षयेत् ततस्सन्ध्योपासनं कार्यम्।

214. खदिरश्च कदम्बश्च करवीरकरञ्जयोः।
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः।।4।।

अन्वयः- खदिरः कदम्बः करवीरकरञ्जयोः सर्वे कण्टकिनः पुण्याः, क्षीरिणः च यशस्विनः भवन्ति।
वि-खदिरनामावयवः कण्टकिनः पुण्याः । क्षीरिणः यशस्विनः ।

215. तेनास्यकरणं सौक्ष्म्यम्माधुर्यञ्चोपजायते।
वर्णांश्च कुरुते सम्यक्प्राचीनौदव्रजिर्यथा ।। 5।।

अन्वयः- तेन अस्य करणं सौक्ष्मम् माधुर्यम् च उपजायते। यथा प्राचीनौदव्रजिः वर्णान् च सम्यक् कुरुते।

वि- शाकादिना ताम्बूलभक्षणं प्रसिद्धम्। तेन खदिरादिना पुंसः आस्यकरणे वाचस्सौक्ष्मं श्लेष्मनिवृत्या गुरुत्वन्निवर्तते। सूक्ष्मा च मधुरा च वाक् सम्पद्यते। वर्णांश्च कम्पादि स्थानेषु सम्यक्भूता वाक् निष्पादयतीत्येवं प्राचीनौदव्रजिराचार्यो मन्यते।।

216. त्रिफलां लवणाख्येन भवेच्छिष्यस्य सर्वदा।
अग्निमेधाजनन्येषा स्वरवर्णकरी तथा ।। 6।।

अन्वयः- शिष्यस्य सर्वदा भवेत् त्रिफलां लवणाख्येन, एषा अग्नि मेधाजननी तथा स्वरवर्णकरी ।

वि- त्रिफलां लवणाख्येनयुतां भोजनावसरकालं सायं शिष्यो भक्षयेत्। जाठरमग्निं बुद्धिञ्चैषा जनयति। अग्निपाटवं स्वरवर्णसौष्ठवं भवतीति।।

प्र- त्रिफलां लवणाक्तेन भवेच्छिष्यकस्सदा।
क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा।।
इति शिक्षान्तरपाठः (या.शि.36)।।

217. कृत्वा चावश्यकान्धर्माञ्जाठरं पर्युपास्य च।
पीत्वा मधुघृतञ्चैव शुचिर्भूत्वा ततो वदेत् ।।7।।

अन्वयः- आवश्यकान् धर्मान् च कृत्वा जाठरम् च पर्युपास्य मधु घृतम् च एव पीत्वा ततः शुचिः भूत्वा वदेत्।

वि- अवश्यं सदा भवतीत्यावश्यकाः दन्तधावनस्नान-सन्ध्योपासनादयः। पूर्वं जठरं पर्युपास्य मूत्रपुरीषोत्सर्गं कृत्वान्यच्चाऽशुचित्वे शवस्पर्शादौ मधुघृतप्राशनं कृत्वा स्नानादिना शुचिर्भूत्वा ततो वदेत्। मन्त्राध्ययनं कुर्यात्।।

218. मन्द्रेणोपक्रमेत्पूर्वं सर्वशाखा स्वयं विधिः।
सप्तमन्त्रानतिक्रम्य यथेष्टां वाचमुत्सृजेत्।
न तां समीरयेद्वाचं या प्राणमुपरोधयेत् ।।8।।

अन्वयः- पूर्वम् मन्द्रेण उपक्रमेत्, अयम् विधिः सर्वशाखासु, सप्त मन्त्रान् अतिक्रम्य वाचम् यथेष्टाम् उत्सृजेत्। या प्राणम् उपरोधयेत् ताम् वाचम् न समीरयेत्।

वि- मन्त्रसप्तकमुपांशु पठित्वा यथेष्टां वाचं मन्द्रादि-स्वरेणोच्चारयेत्। प्राणोपरोधकमुच्चैश्शब्दोच्चारणं विशेषतः प्रातः न कार्यम्। अन्यथा –

219. प्राणानामुपरोधेन वैस्वर्यञ्चोपजायते ।
स्वरव्यञ्जनमाधुर्यं लुप्यते नाऽत्र संशयः ।।9।।

अन्वयः- प्राणानाम् उपरोधेन वैस्वर्यम् उपजायते, स्वव्यञ्जन-माधुर्यम् लुप्यते च अत्र न संशयः।

विरुद्धानामपरिपूर्णानां वर्णानां भावो वैस्वर्यं वैवर्ण्यम्। तत्र तस्यां वाचि जायते। वर्णानाम्माधुर्यं यत्स्वाभाविकन्तन्निवर्तत एव।।

वि- अप्रवीणस्यानामयिकस्यवोपाध्यायस्य सकाशान्नाधि-गन्तव्यम्। प्रतिष्ठितादध्ययनं कर्तव्यमित्याह-

220. कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम्।
न तस्य परिमोक्षोऽस्ति पापाहेरिव किल्बिषात्।। 10।।

अन्वयः - कुतीर्थात् आगतम् दग्धम् अपवर्णम् भक्षितम् च तस्य परिमोक्षः पापाहेः इव किल्बिषात् मोक्षः न अस्ति।

कुतीर्थात् उपाध्यायात्स्थानात् जलौघेनानीतविषयं अपवर्णैः दुष्टजनैर्दुष्कृतिभिर्भक्षितं तस्मात्पापरुपात् सर्पात् निर्गताद्विषात् यथा मुक्तिर्न भवति एवं कुतीर्थादुपाध्यायादागतमध्ययनं अपवर्णैः मुखरैर्भक्षितं अधीतं तस्मादध्ययनात् पापिष्ठात् उपाध्यायादागतान्न परिमोक्षो भवति। न कुसंस्कारो निवर्तत इत्यर्थः।

प्र- कुतीर्थात् अननूचानाद्गुरोः। तीर्थः गुरुः। "निपातागमयोस्तीर्थमृषिजुष्टे जले गुरौ" इत्यमरः। प्राप्तं दग्धं भस्मवद्गतरसं अपगतवर्णं अयथोदितस्थानवर्णञ्च भक्षितं आदराद्घुष्टं तस्य घोषयितुः परिमोक्षो नास्ति। तत्र दृष्टान्तः - कस्येव पापाहेरिव हन्तुरिव किल्बिषात् मोक्षो नास्तीति। यथा कुतीर्थाद्विषोद्भवस्थाना-ज्जलौघेन।।

221. सुतीर्थादागतं व्यक्तं स्वाम्नातं सुप्रतिष्ठितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ।। 11।।

अन्वयः- सुतीर्थात् आगतम् व्यक्तम् स्वाम्नातम् सुप्रतिष्ठितम् सुस्वरेण सुवक्त्रेण प्रयुक्तम् ब्रह्म राजते।

वि- सुतीर्थादुपाध्यायाच्छोभनादामादागतं अधीतं उपाध्यायात्सम्यगाम्नातं शिष्येषु च प्रतिष्ठितं अभ्यस्तं स्थितं सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म वेदो राजते अप्रतिष्ठितेन सुस्वरेणापि प्रयुक्तन्न राजत इत्यर्थः।।

प्र- सुतीर्थात् सुगुरोः प्राप्तमभ्यस्तं सुसम्प्रदायि ब्रह्म वेदरूपं राजति शोभते इति स्तुतिः ।।

वि- विकृतमुखानां पाठो न शोभते इत्याह-

222. न करालो न लम्बोष्ठो न च सर्वाऽनुनासिकः।
गद्गदो बद्धजिह्वश्च प्रयोगान् वक्तुमर्हति ।। 12।।

अन्वयः- करालः प्रयोगान् वक्तुम् न अर्हति, लम्बोष्ठः न, सर्वानुनासिकः च न, गद्गदः बद्धजिह्वः च न अर्हति।

नासाक्षिकर्णादिना विकृतः करालः। नासिकायाः प्राधान्येन यश्च शब्दमुच्चरति स सर्वानुनासिकः। कण्ठप्राधान्येन शब्दोच्चारणात् गद्गदो भवति। वाक्स्तम्भेन बद्धजिह्वः। प्रयुज्यत इति प्रयोगः। न शब्दान् वक्तुमर्हतीत्यर्थः।।

वि- अदृष्टान्तःकरणः संयतचित्तः शोभनं पठतीत्याह-

223. एकचित्तो निरुद्धान्तः तान्तगानविवर्जितः ।
स तु वर्णान्प्रयुञ्जीत दन्तोष्ठं यस्य शोभनम् ।। 13।।

अन्वयः- यस्य दन्तोष्ठम् शोभनम् स तु एकचित्तः निरुद्धान्तः तान्तगानविवर्जितः वर्णान् प्रयुञ्जीत।

स्वाध्यायविषयं चित्तं यस्य स एकचित्तः। अभ्यस्तपाठत्वात् भ्रान्तिरहितः। अतिविलम्बितशब्दोच्चारणाभावात् तान्तगान विवर्जितः। अविकृतदन्तोष्ठादित्वात् रमणीयशब्दमुच्चरति।
वि- अहङ्काररहितानां विद्याप्रवर्तत इति-

224. पञ्चविद्यां न गृह्णन्ति चण्डा स्तब्धाश्च ये नराः।
अलसाश्च सरोगाश्च येषाञ्च विसृतम्मनः ।।14।।

अन्वयः- चण्डाः ये नराः स्तब्धाः च अलसाः च अनरोगाः च येषाम् मनः विसृतम् च पञ्च विद्याम् न गृह्णन्ति।

साहङ्कारः कोपप्रधानः उपाध्यायादीनामनुप्रवृत्तिं न भजते चण्डः। स्तब्धः स्वचातुर्येण अध्ययने प्रवृत्तः। उक्तमपि कदाऽपि तावान्नो बुध्यते। अलसः मनसोसिद्धः। करणानामवधारणे अपाटवान्। न अरोगः सरोगः सर्वकालरोगयुक्तस्सरोगः। विसृतं चञ्चलं मनः।।

वि- त्वरया च अध्ययनं न कर्तव्यम्। आचार्येणाध्ययनं कर्तव्यमित्युक्ते। इत्युच्यते-

225. शनैर्विद्यां शनैरर्थानारोहेत्पर्वतं शनैः।
शनैरेवाध्वगमनं योजनानां परिव्रजेत् ।।15।।

अन्वयः- विद्याम् शनैः, अर्थान् शनैः, पर्वतम् शनैः आरोहेत्, अध्वगमनं शनैः एव योजनानाम् परिव्रजेत्।

अर्थार्जनं नाम अध्ययनं अध्वगमनं पर्वतारोहणं त्रयाणां यथा सम्यग्भवति तथा विद्या शनैर्यथावदभिनिर्वर्तते प्रहरद्वय-योजनं भवति।

वि- उच्चैरुच्चार्यमाणशब्दाः पश्चादसंहता विच्छेद्यमाना वैरस्यमुत्पादयन्तीत्युच्यते-

226. योजनानां सहस्रन्तु शनैर्यान्ति पिपीलिकाः ।
अगच्छन्वैनतेयोऽपि पदमेकन्न गच्छति ।। 16।।

अन्वयः- पिपीलिकाः शनैः योजनानां सहस्रं तु यान्ति। अगच्छन् वैनतेयः अपि एकम् पदम् न गच्छति।

227. न हि पार्ष्णिहता वाणी प्रयोगान्वक्तुमर्हति ।
बधिरस्येव तल्पस्था विदग्धा वामलोचना ।। 17।।

अन्वयः- तल्पस्था विदग्धा बधिरस्य वामलोचना इव पार्ष्णिहता वाणी प्रयोगान् वक्तुम् न हि अर्हति।

अश्रृण्वति पुरुषे रतिसमयोचितं व्यक्तं गानं कामुक्या अपि खलस्यापि वैरस्यमापद्यते। एवमुच्चैरुच्चार्यमाणा पश्चाद्विच्छिन्नावाणी सर्वस्योद्वेगं जनयति। पार्ष्णिः पादस्य पश्चिमो भागः। बधिरस्य तल्पस्था एकस्मिंच्छयने स्थिता विदग्धा सुरते कामशास्त्रे प्रवीणा वामलोचना रमणीयलोचना यथा रतिप्रयोगान् करोति एवं पश्चाद्विच्छिन्ना न प्रयोक्तव्या।।

228. उपांशु त्वरितञ्चैव योऽधीते वित्रसन्निव ।
अपि रूपसहस्रेषु सन्देहेष्वेव जायते ।। 18।।

अन्वयः- यः उपांशु त्वरितम् वित्रसन् इव च एव अधीते रूपसहस्रेषु अपि सन्देहेषु एव जायते।

वि- उपांशु त्वरितञ्च वित्रसन्निव अधीतं बाधितं सत् सहस्रकृत्वोऽपि न निर्मलतामासादयतीति तता न फणितव्यमित्याह उपांशुत्वरितमित्यादि त्वरितरूपं शब्दोच्चारणं तद्विषये सन्देहेष्वेवाऽस्ते।।

वि-प्रणतेन आचार्यादध्ययनं कार्यं न पुस्तकादिनेत्याह-

229. पुस्तकप्रत्ययाऽधीतन्नाधीतं गुरुसन्निधौ।
न भ्राजते सभामध्ये जारगर्भा इव स्त्रियः ।। 19।।

अन्वयः- गुरुसन्निधौ न अधीतम् पुस्तकप्रत्ययाधीतम् जारगर्भाः स्त्रियः इव सभामध्ये न भ्राजते।

तदेव दृढयति। जाराद्गर्भो यासान्ताः यथा न भ्राजन्ते एवन्दुष्टादागमाध्ययनम्।।

वि- प्राज्ञेनापि यत्नपरेणाध्ययनादौ भवितव्यमित्युच्यते-

230. अञ्जनस्य क्षयन्दृष्ट्वा वल्मीकस्य च सञ्चयम्।
अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ।।20।।

अन्वयः- अञ्जनस्य क्षयम् वल्मीकस्य तु सञ्चयम् दृष्ट्वा दानाध्ययनकर्मसु दिवसम् अवन्ध्यम् कुर्यात्।

अञ्जनस्य पर्वतस्य व्यये क्रियमाणे क्षयो दृश्यते। वल्मीकस्यापि पिपीलिकादिभिः सञ्चयः क्रियते। एवं तत्वं क्रियमाणस्य सञ्चितः चित्तपाटवं यत्नेनावगम्यते अतोऽध्यनादिभिश्शास्त्राद्यैः अबन्ध्यं अशून्यमहः कार्यम्।।

वि- अबलोपि यत्नवानर्थे साधयति। न तु बलवान्रहितयत्न इति पूर्वोक्तमुच्यते विशेषेण-

231. योजनानां शतं साग्रं शनैर्याति पिपीलिकाः ।
अगच्छन्वैनतेयोपि पदमेकन्न गच्छति ।।21।।

अन्वयः- पिपीलिकाः शनैः योजनानां शतं साग्रं याति। अगच्छन् वैनतेयः अपि एकम् पदम् न गच्छति।

वि- यत्नपरेणासमर्थेन पाठः शोभनो वर्तते। नत्वयत्नेन बलवतापि कृतं शोभनं भवतीत्याह-

232. यत्कीटैः पांसुभिश्लक्ष्णैः वल्मीकः क्रियते महान् ।
न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम् ।।22।।

अन्वयः- कीटैः श्लक्ष्णैः पांसुभिः महान् वल्मीकः यत् क्रियते, तत्र बलसामर्थ्यम् न, तत्र उद्यमः कारणम् ।

वि- विद्याभ्यासः सदैव कर्तव्यः। यथाधीतस्य नाशो न भवतीत्याह-

233. सहस्रगुणिता विद्या शतशः परिकीर्तिता ।
आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् ।।23।।

अन्वयः- सहस्रगुणिता शतशः परिकीर्तिता विद्या उदकम् स्थलान् निम्नम् इव जिह्वाग्रे आगमिष्यति।

गुणिता अभ्यस्ता परिकीर्तिता अयत्नेन सुखेन परिवर्तते आगमिष्यति जिह्वाग्रे। स्थलान्निम्नं स्थानं यथा गच्छति।

प्र- जलमभ्यासयोगेन शैलानां कुरुते क्षयम्।
कर्कशानाम्मृदुस्पर्शं किमभ्यासान्न साधयेत्।।

इति (या.शि.170)

वि- विद्यार्थिना प्रहरद्वयं हेमन्ते। प्रहरत्रयं वसन्तादौ स्वापोऽनुशीलनीय इत्याह-

234. हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम् ।
न हि विद्यार्थिनान्निद्रा चिरन्नेत्रेषु तिष्ठति ।।24।।

अन्वयः- अर्द्धरात्रार्द्धशायिनाम् जात्यानाम् हयानाम् इव विद्यार्थिनाम् निद्रा नेत्रेषु चिरम् न हि तिष्ठति।

वि- अन्नपाननारीव्यसनं वर्जनीयम्। जनसमूहनिवासः कृष्णसर्पवदगन्तव्यः। अतिबहुभोजनं विषवत्परिहरणीयम्। दूरगमने च यत्न आश्रयणीय इत्याह-

235. न भोजनविलम्बी स्यान्न च नारीनिबन्धनः ।
सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत् ।।25।।

अन्वयः- विद्यार्थी भोजनविलम्बी न स्यात्, नारीनिबन्धनः च न, सुदूरम् अपि गरुडहंसवत् व्रजेत्।

236. अहेरिव गणाद्भीतः सौहार्दान्नरकादिव।
राक्षसीभ्य इव स्त्रीभ्यस्स विद्यामधिगच्छति ।।26।।

अन्वयः- गणात् अहेः इव भीतः, सौहार्दान् नरकात् इव, स्त्रीभ्यः राक्षसीभ्यः इव सः विद्याम् अधिगच्छति।

नार्यो निबन्धनमवष्टम्भभूता यस्य । गरुड इव हंस इव धावेत्। स्त्रियश्च राक्षस्य इव वर्जनीयाः इत्यर्थः।।

प्र- अन्नव्यञ्जनयोर्भागौ तृतीयमुदकस्य च ।
वायोस्सञ्चरणार्थाय चतुर्थमुपकल्पयेत् ।।
इत्युक्त प्रकारेण विद्यार्थिना भोजनं कार्यम्।

वि- अलसोविद्याधनादि नासादयति। क्लीबो नपुंसकः पुत्रादि न लभते। मानी च अननुवर्तनशीलः न विद्याभाजनं नायं विद्या मासादयति। लोकरवाद्भीतो न विद्यां गृह्णति। अद्य प्रातः पुनः प्रातः इति कालप्रतीक्षको न विद्यामाप्नोतीत्याह-

237. न शठाः प्राप्नुवन्त्यर्थान्न क्लीबा न च मानिनः।
न च लोकरवाद्भीताः न च श्वः श्वः प्रतीक्षकाः ।।27।।

अन्वयः- शठाः अर्थान् न प्राप्नुवन्ति, क्लीबाः न , मानिनः च न, लोकरवाद् भीताः च न, श्वः श्वः प्रतीक्षकाः च न ।

वि- यथा भूतलादुदकं महता यत्नेन लभ्यते एवं पौनः पुण्येन गुरुसेवनादसन्दिग्धो पाठः प्राप्यते इत्याह-

238. यथाखनन्खनित्रेण भूतले वारि विन्दति ।
एवं गुरुगतां विद्यां शुश्रुषुरधिगच्छति ।।28।।

अन्वयः- खनित्रेण खनन् भूतले वारि यथा विन्दति, शुश्रुषुः गुरुगतां विद्यां एवं अधिगच्छति।

239. शुश्रूषारहिता विद्या यद्यपि मेधागुणैस्समुपयाति।
वन्ध्येव यौवनवती न तस्य विद्या फलवती भवति।।29।।

अन्वयः- यदि शुश्रूषारहिता अपि विद्या मेधागुणैः समुपयाति, तस्य विद्या वन्ध्या यौवनवती इव फलवती न भवति।

240. गुरुशुश्रुषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थेन न लभ्यते ।।30।।

अन्वयः- विद्या गुरुशुश्रूषया, पुष्कलेन धनेन वा अथवा विद्या विद्यया, चतुर्थेन न लभ्यते।

प्र- विद्यार्थिना द्यूतादि नैव कर्तव्यमित्याह-

241. द्यूतं पुस्तकवाचञ्च नाटकेषु च सक्तिका।
स्त्रियस्तन्द्री च निद्रा च विद्याविघ्नकराणि षट् ।।31।।

अन्वयः- द्यूतम् पुस्तकवाचम् च नाटकेषु सक्तिका च स्त्रियः तन्द्री च निद्रा च षट् विद्याविघ्नकराणि भवन्ति।

वि- यथा स्थानकरणैरपीडयता वर्णस्वरादि स्फुटमवगम्यते तथा स्वाध्यायादि कर्तव्यं ब्रह्मलोकप्राप्त्यर्थमिति वर्णस्वरूपावधारणार्थं शिक्षेति च शास्त्रान्ते प्रतिपाद्यते-

242. यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ।। 32।।

अन्वयः- पतनभेदाभ्याम् भीता व्याघ्री पुत्रान् यथा दंष्ट्राभ्यां हरेत्, न च पीडयेत्, तद्वद् वर्णान् प्रयोजयेत्।

243. एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ।।33।।

अन्वयः- एवम् वर्णाः प्रयोक्तव्याः, अव्यक्ता न पीडिताः च न। सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते।

शुनी व्याघ्री बिडाली च अचिरजातान्यपत्यानि दन्तैरपीडयन्ती नयत्यानयति च। यदि न सम्यक् प्रतिगृह्णति तदा

पतन्ति। यदा अतिबलेन गृह्णति तदा भेदः उपघातोऽपत्यानां भवति इति। एवं वर्णोच्चारणं कार्यम्। व्यक्तास्स्फुटाः। प्रयोगस्तु जपः। ऋक् स्वाध्यायेऽध्ययनेऽध्यापने च। इति।।

प्र- इदं च वर्णस्वरादि स्फुटोच्चारणाद्युपदेशः न केवलं शिष्यस्य अपि तु आचार्यस्यापि यतः तस्यापि गुणदोषौ स्मर्येते-

गीती शीघ्री शिरः कम्पी यथालिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।।
युक्तियुक्तं वचो ग्राह्यं न ग्राह्यं गुरुगौरवात्। इति दोषः।

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं गुरुलघुत्वञ्च षडेते पाठकागुणाः।। इति गुणश्च।।

****

इति भट्टशोभाकरविरचित विवरणेन, पुन्नागपुराभिजन पूज्यरामस्वामिदीक्षितपुत्रेण नारायणस्वामिदीक्षितेन कृतं नारदीयशिक्षा प्रकाशाख्या व्याख्या ।।

इत्यष्टमी कण्डिका

इति द्वितीयः प्रपाठकः

।।नारदीयशिक्षा समाप्ता।।

नारदशिक्षासंग्रहः

अस्तिनाम शिक्षाख्यमङ्गं वेदपुरुषस्य वर्णानां स्थानप्रयत्नादि बोधकं, प्रधानगुणभेदेन बहुधाभिन्नानां स्वराणां विवेचकं, मात्राकालेयत्ता-निर्णायकञ्च।तच्च वेदपुरुषस्य घ्राणत्वेन रुपितं "शिक्षा घ्राणं तु विज्ञेयं" इति। मुखस्य श्लक्ष्णता पादकं नासासौन्दर्यम्। अतः वेदपुरुषस्य कमनीयत्वरक्षणाय शिक्षापरिज्ञानमवर्जनीयम्। शिक्षा च प्रतिवेदं प्रभिन्ना। सामवेदस्य तु शिक्षात्रयं नारदीय, गौतमीय, लोमशीय भेदेन चकास्ति। तत्र नारदोनाममहर्षिः अनारतं भगवद्गुणगणस्तावकान् साममन्त्रान् वीणानुरणनेन गायन्नास्तेति प्रसिद्धं लोकत्रयेऽपि। स च सामवेदस्य शिक्षाग्रन्थरचयन् लौकिकस्यापिगानस्य लक्षणं क्वचित् ज्ञापयामास।।

अस्मिन् शिक्षाशास्त्रे प्रपाठकद्वयं षोडश खण्डाश्च विलसन्ति। अत्र वर्णानां स्थानकरणप्रयत्नाः, स्वराणां प्रधानगुणभावेन बहुधा प्रभेदः, अङ्गुल्या स्वरनिर्देशप्रकारः, तस्यावश्यकता, मात्राकाल-निर्णयः, आचार्यशिष्यनियमाः, वेदस्य सम्यगुच्चारणायपथ्यसेवनं, सम्प्रदायागतस्वररक्षणावश्यकता, वेदस्य सम्यक् प्रयोगेण अनायासेन ब्रह्मलोकावाप्तिपर्यन्तफलप्राप्तिः इत्यादयो नैकविधाः विषया अनितरसाधारणाः विचारिताः। अस्य विवरणं भट्टशोभाकरप्रणीतं वर्तते। मैसूरमहाराजावेदसंस्कृतपाठशाला-ध्यापकैः श्रीनारायणस्वामिदीक्षितैः विवरणप्रकाश इति व्याख्या कृताऽस्ति। सोऽपि ग्रन्थः मूलपद्यानां अर्थवैशद्येन प्रभवति।

अतः परं प्रवक्ष्यामि आर्चिकस्य स्वरत्रयम् ।
उदात्तश्चानुदात्तश्च तृतीयः स्वरितपरः ।। 1 ।। ना.शि.1.8.1

सामस्वरनिरुपणानन्तरं आर्चिकस्य ऋचां समूहः आर्चिकं अग्न आयाहीत्यादिकस्य ग्रन्थस्य संज्ञा तस्य उदात्तानुदात्तस्वरिता इति

स्वरत्रयम् प्रवक्ष्यामि। प्रचयस्य स्वरान्तरत्वाभावविवक्षया पृथङ्नोक्तम्। तदेवाह-

य एवोदात्त इत्युक्तः स एव स्वरितोत्तरः।
प्रचयः प्रोच्यते तज्ज्ञैः न चात्रान्यत् स्वरान्तरम् ।।2।।

प्रचयस्य उदात्तवत् उच्चस्वरत्वात् उदात्त इत्युक्तं, स्वरितस्वरात् परं विद्यमानः प्रचय इत्युच्यते।

जात्यः क्षैप्रोऽभिनिहितः तैरोव्यञ्जन एव च ।
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः ।।3।।

निगद व्याख्यातमेतत्।

स यकारं सवं वाप्यक्षरं स्वरितं भवेत् ।
नचोदात्तं परस्तस्य जात्यः स्वारस्स उच्यते ।।4।।

जात्यादि सप्तविधस्वरितमध्ये जात्यस्य लक्षणमाह यकारेण वकारेण वा सहितं अनन्तरमुदात्तरहितं यत् स्वरितं तत् जात्यस्वारः इत्युच्यते। सजात्येन इति यकारसहितं भूर्भुवस्व इति वकारसहितम्।।

इउवर्णौ यदोदात्ता वापद्येते यवौ क्वचित् ।
अनुदात्ते प्रत्यये नित्यं विद्यात् क्षैप्रस्य लक्षणम् ।।5।।

इकारः उकारो वा उदात्तः पदादिना अकारेण अनुदात्तेन संहितायां यकारं वकारं वाऽपद्यते सः स्वरितो भवति। स क्षैप्र इत्युच्यते। श्रुष्टि + अग्ने= श्रुष्ट्यग्ने (पू.आ.प.2.1.10) इति यकारस्य। वीडु+अङ्गं = वीड्वङ्गः इति वकारस्य।

ए ओ आभ्यामुदात्ताभ्यामकारोनिहतश्चयः ।
अकारं यत्र लुम्पन्ति तमभिनिहितं विदुः ।।6।।

एकारादोकाराद्वा उदात्तादुत्तरोयोऽकारः निहतः अनुदात्तः यत्र लुम्पन्ति एकारे ओकारे वा प्रविशन्ति संहितायां तं अभिनिहितं विदुः। ते + अमन्वत= तेऽमन्वत इत्यादि।

उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत् ।
एष सर्व बहुस्वारस्तैरोव्यञ्जन उच्यते ।। 7।।

उदात्तात्परं स्वरितं इत्येतत् बहुत्र भवति अतः बहुस्वारः, सर्वत्र ऋग्यजुर्वेदेऽपि भावात् सर्व बहुस्वारः। तिरोधायस्वर्यमाणत्वं विहाय साधारणतया उदात्तवत् व्यञ्जत इति तिरोव्यञ्जन एव तैरोव्यञ्जनः इत्युच्यते। वीतये ऊतये इत्यादि येकारः ।।

अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम् ।
तिरोविरामं तं विद्यादुदात्तोयद्यवग्रहः ।।8।।

उपसर्गादिः इति अवग्रहसूत्रेण उपसर्गादिपदमवगृह्यते। अवग्रहः पृथक्करणं पृथक्करणात् उपसर्गस्य अत्र अवग्रहत्वं तस्मात् परं यत् स्वरितं तिरोविरामं विद्यात्। विरामस्य तिरोधानात् । अत्र उपसर्गः उदात्तो भवति। विष्कभिते वि स्कभिते इति इत्युदाहरणम्।।

इकारं यत्र पश्येयुरिकारेणैव संयुतम् ।
उदात्तमनुदात्तेन प्रश्लिष्टं तं निबोधत ।।9।।

उदात्तः इकारः अनुदात्तेन इकारेण यदा संयुक्तो भवति तदा तं प्रश्लिष्टस्वरितं इति निबोधत जानीत। उदाहरणं अध हि इन्द्र अधाहीन्द्र अत्र उदात्तानुदात्तेकारद्वययोगः।।

स्वरेचेत्स्वरितं यत्र विवृता यत्र संहिता ।
एतत्पदान्तवृत्तस्य लक्षणं शास्त्रचोदितम् ।। 10।।

उदात्तानुदात्तयोः सन्धिः स्वरितम्। तच्च स्वरितं स्वरे चेत् उदात्तानुदात्ताक्षरद्वयमपि अजक्षरं चेत् अक्षरद्वययोगे सन्धिः स्यात्

सन्धिं विहाय संहितायां विवृत्तिः असंश्लेषः, यदि तं पादवृत्तमिति विद्यात् तदेवलक्षणं पादवृत्तस्य। कई वेद इत्यत्र ककारोत्तर अकारस्य ईकारस्य च सन्धौ ऐ इति स्यात् स न भवति । विश्लिष्ट एव वर्तते-

जात्यस्वारः सजात्येन, श्रुष्ट्यग्ने क्षैप्र उच्यते ।
तेऽमन्वताभिनिहितः, तैरोव्यञ्जन ऊतये ।। 11।।
तिरोविरामो विष्कभिते, प्रश्लिष्टोऽहीन्द्र गिर्वणः ।
पादवृत्तः कई वेद स्वाराः सप्तैवमादयः ।। 12।।

विगदव्याख्यातमेतत्। एवं स्वरितविशेषाणां लक्षणमुक्ता। स्वरितसामान्यस्य लक्षणमाह-

उच्चादेकाक्षरात्पूर्व स्वर्यते यदि साक्षरम् ।
स्वाराणां जात्यवर्जानां एषा प्रकृतिरुच्यते ।। 13।।

जात्यादि वर्जं इतरत्र एकाक्षरात् उदात्तात् पूर्वं स्थितात् परं यदि अक्षरसहितं स्वर्यते स्वरितस्वरस्य एषा प्रकृतिः स्वरित सामान्यस्य एतत् लक्षणं भवति।।

अथ कम्पलक्षणम्-

चत्वारस्त्वादितः स्वाराः कम्पं पुष्यन्ति शास्त्रतः ।
उदात्ते वैकनीचे वा जुह्वोग्निस्तत्र दर्शनम् ।। 14 ।।

चत्वारः स्वाराः स्वरिताः शास्त्रतः कम्पं पुष्यन्ति। आदितः इकारान्तपदे पूर्वे उकारे परतः प्रथमः, उकारद्वये परतः द्वितीयः, ओकारे तृतीयः, सन्ध्यक्षरे तुरीयः पाह्युत, शग्ध्यूषु, जुह्वोमम, अभ्य3र्षानपच्युतः इति यथा संख्यमुदाहरणानि ओकारस्य सन्ध्यत्वेऽपि पृथङ्निर्देशः।

चतुर्षु कम्पेषु मध्ये ह्रस्वत्व दीर्घत्व व्यवस्थामाह-

इकारान्ते पदे पूर्वे उकारे परतः स्थिते ।
ह्रस्वकम्पं विजानीयात् मेधावी नात्र संशयः ।। 15।।
इकारान्ते पदे चैव उकारद्धय पदे परे।
दीर्घं कम्पं विजानीयात् शग्ध्यूष्विति निदर्शनम् ।। 16।।
त्रयोदीर्घास्तु विज्ञेया ये च सन्ध्यक्षरेषु वै।
मन्या पथ्या न इन्द्राभ्या श्शेषा ह्रस्वाः प्रकीर्तिताः ।। 17।।

ह्रस्वकम्पस्योदाहरणं पाह्युतद्धितीययया इति । दीर्घ चतुष्टयस्य उदाहरणानि मूल एवोक्तानि- पाह्युत (पू.आ. 1.4.2) उपत्वा जुह्वोमम (उ.आ.15.3), शग्ध्यूषु (पू.आ.3.2.1) भद्रावस्त्रासमन्याऽ3दिशः (उ.आ.11.4) ऋतस्य पथ्याऽ3अनु (उ.आ.16.2) मानइन्द्राभ्या3दिशः (पू.आ.1.4.4) ये च सन्ध्यक्षरेषु इत्यस्योदाहरणम्, संवेशनस्तन्वेऽ3-चारु इत्यत्रन्वे इति (पू.आ.1.7.3) द्धि तृतीयस्वरः कम्पः इति कम्पस्य द्धितीय तृतीयस्वरत्वत्।

पूर्वाङ्गेण हतं पूर्वं पराङ्गेण तु धारितम्।
व्यञ्जनेन द्धिधाभिन्नः स्वरो भीतस्तु कम्पते।। लो.शि-1.4
दीर्घं कम्पेऽध्यर्धमात्रा तृतीये परिकीर्तिता।
द्धितीयेऽर्धमात्रातु प्रयोगे घण्टलालवत्।। लो.शि-1.5
मध्ये तु कम्पयेत्कम्पं उभौ नीचौ समौ भवेत्।
द्धिगुणं वर्णकालाच्च पादः कम्पार्थमिष्यते।। शौ.शि-56
अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत्।
पुनर्निहतमागच्छेदेष कम्पविधिः स्मृतः।।शौ.शि-57

कम्पस्वरः यस्य तस्य पूर्ववर्णः उत्तरवर्णश्च नीचौ समौचानुदात्तौ मध्ये कम्पवर्णः द्धितृतीयस्वरवान् भवति। वर्णस्य कालः ह्रस्वस्य एकमात्रा

दीर्घस्य द्विमात्रा इति तस्मात् द्विगुणः कम्पे भवति अनुदात्तस्वरमादाय स्वरितस्वरं अवलम्बते, पुनः अनुदात्तमागच्छति इति कम्पस्वरविधिः। शिवकोदात्तलक्षणमाह-

अनेकानामुदात्तानामनुदात्तः परो यदि ।
शिवकं तं विजानीयादुदात्तः प्रत्ययो यदि ।। 18।।

उदात्ते अनेकाक्षरसत्वे समनन्तरं अनुदात्तस्वरश्च भवेत् यदि तत्र प्रथमाक्षरस्य शिवकोदात्तत्वम्। मध्येऽनुदात्तयोः स्यातामुदात्तौ प्रथमं तयोः, इति आर्चिकलक्षणे प्रथमस्य वर्णस्य शिवकोदात्तत्व स्मरणात्। अस्य स्वरसन्निवेशश्च एवं, सङ्कोच्यमध्यमां किञ्चिदुदात्ते तर्जनीं स्पृशेत् इति मध्यमाङ्गुलिं सङ्कुचितां कृत्वा अङ्गुष्ठेन तर्जनीमध्यरेखां स्पृशेत्। शिवक इत्यस्य उपपत्तिः एवं शिवस्य नामसु त्र्यम्बकः इति नाम असाधारणं अस्य त्रिणेत्रत्वमर्थः। मध्यमाङ्गुलिं सङ्कोच्यस्वरविन्यासकाले अङ्गुलीनां पृष्ठभागे, अनामिकातर्जन्योः संसक्तयोः मध्ये मध्यमाङ्गुलेः उन्नतत्वात् नेत्रत्रयमिव भाति तस्य शिवासाधारण्यात् शिवकोदात्तमिति संज्ञा सञ्जातेति। अत एव नारदशिक्षाविवरणे त्र्यम्बकः त्रिणेत्रः, शिवः इत्याद्युक्तम्। उदाहरणं आदित्प्रत्नस्य गिराममाजाता अत्र पूर्वं द्व्यक्षरं उत्तरत्र त्र्यक्षरं उदात्तम्। अस्यैव प्रकारान्तरेण लक्षणमाह-

यत्र द्विप्रभृतीनि स्युः उदात्तान्यक्षराणि तु ।
नीचं चोच्चं च परतः तत्रोदात्तं विदुर्बुधाः ।। 19।।

यत्र द्वित्र्याक्षराणि उदात्ते परं अनुदात्तं ततः परं उदात्तं च तत्र शिवकोदात्तं विदुः इदमेवोक्तं आर्चिकलक्षणे।

मध्येनुदात्तयोः स्यातां उदात्तौ प्रथमं तयोः।
उत्कलाः कोशमित्याहुः उदात्तं सम्प्रदायिनः।।

संज्ञामात्रं हितस्यैतदन्येभ्यः पारिभाषितम्।
सङ्कोच्यमध्यमां किञ्चिदुदात्ते तर्जनीं स्पृशेत्।।
अनयोरर्थः आर्चिकलक्षणविवरणे उक्तः।

वर्णानां संयोगे द्विर्भावमाह उच्चारण परिज्ञानाय-

न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ।
न च वर्गद्वितीयेषु न चतुर्थे कदाचन ।।20।।

वर्णानां व्यञ्जनानां संयोगे द्विर्भावो भवति तत्र वर्गद्वितीय चतुर्थानां रेफ इकारयोश्च द्वित्वं नास्तीत्युच्यते। एतदुक्तं गौतमशिक्षायाम्- अथ सर्वेषां व्यञ्जनानां द्विर्भावो भवति द्वादशाक्षरवर्जं इत्यादिना।

तच्चतुर्थं तृतीयेन द्वितीयं प्रथमेन तु ।
आद्यमन्त्यं च मध्यं च स्वाक्षरेणैव पीडयेत् ।।21।।

तत्र पूर्वोक्तानां संयोगविषये चतुर्थाक्षरस्य तृतीयेन संयोगः द्वितीयाक्षरस्य प्रथमेन योगः, आद्यं प्रथमं, अन्त्यं पञ्चमं, मध्यमं तृतीयं च तस्य स्वेनैव संयोगः पीडनं संघर्षः अन्योन्य संश्लेषः वर्णद्वित्वमिति यावत्, वेत्थाहि निर्ऋतीनां अत्र तकार थकार योगः। भरामेध्मं इत्यत्र दकारधकारयोगः। क्वेयथ क्वेदसि अत्र क्वेदसि इति क क योगः, अग्न आयाहि इति ग ग योगः। अग्नेयुंक्ष्वा इति ङ ङ योगः इत्याद्यूहनीयम्।।

अनन्त्यश्च भवेत्पूर्वोह्यन्त्यश्च परतो यदि ।
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः ।।22।।

अन्त्यवर्ण भिन्नं वर्गाद्यचतुष्टयं यदि पूर्व, परतः अन्त्यवर्णः ङादिः अनन्त्यान्त्यसंयोग इति यावत् तत्र मध्ये यमो नाम वर्णः पूर्ववर्णसदृशः

तिष्ठति विद्यत इति जानीयात् उच्चारणकाले। पूर्ववर्णयोरिति द्विवचनं पूर्ववर्णस्य द्वित्वोपेक्षयोक्तम् इदमुक्तं शिक्षान्तरे-

अपंचमश्चैकपदे संयुक्तः पञ्चमे न हि।
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि इति।।

एवं यमागममुक्त्वा अर्थं सिद्धोऽन्यत्र यमाभावः विशदीक्रियते।

वर्गान्त्याश्शषसैस्सार्धमन्तस्थैश्चापि संयुताः।
दृष्वा यमा निवर्तन्ते आदेशिकमिवाध्वगाः ।।23।।

वर्गान्त्याः ङकारादयः, श ष स य र ल व एतैस्संयुक्ताश्चेत् यमा निवर्तन्ते। कुत्रचिद्देशे वासः नियतं, यस्य नास्ति सः चोरः अदेशः स एव आदेशिकः तं दृष्ट्वा अध्वगाः पथि गच्छन्तः यथा निवर्तन्ते तद्वत्।

तृतीयश्च चतुर्थश्च चतुर्थादि परं पदम् ।
द्वौ तृतीयौ हकारश्च हकारादि परं पदम् ।।24।।

संहितायां वर्गतृतीयचतुर्थौ यदा संयुक्तौ तदा पदकाले उत्तरपदं चतुर्थादि भवति। एवं द्वौ तृतीयवर्णौ हकारश्च यदा संयुक्ताः तदा उत्तरं पदं हकारादि भवति।

संयोगात्तु परं स्वर्यं परं संयोगनायकम् ।
संयुक्तस्य तु वर्णस्य त्वस्वरं पूर्वमक्षरम् ।।25।।

संयुक्ताक्षरे परवर्णं स्वरसहितं कुर्यात्। संयोगनायकत्वं परस्यैव। संयुक्तवर्णस्य पूर्वमक्षरं स्वररहितं यथा अग्ने इत्यत्र ने इत्यस्यैव स्वरितत्वम्।

पादादौ च पदादौ च संयोगावग्रहेषु च ।
यशब्द इति विज्ञेयो योऽन्यस्स य इति स्मृतः ।।26।।

पादादि विषये यकारस्संयुक्तः द्विर्भवति अन्यत्र नास्ति। द्विर्भावः। न्यग्वाहूयसेनृभिः पादादौ (पू.आ.3.9.7), त्वं यविष्ठ-पदादौ (उ.आ. 9.9.1) त्वं यविष्ठ। पन्यं, पन्यं संयोगे (पू.आ.2.3.9) अन्यः अन् यः अवग्रहे (उ.आ.1.4.1)

आर्चिकपदपाठयोः स्वरविपरिणाममाह-

यदुदात्तमुदात्तं तत् यत्स्वरितं तत्पदे भवति नीचम् ।
यन्नीचं नीचमेव तद्यत्प्रचयस्थं तदपि नीचम् ।।27।।

संहितायां यत् उदात्तं तदक्षरं पदकालेऽपि उदात्तमेव भवति। यत्स्वरितं संहितायां, तत् पदकाले नीचं अनुदात्तं भवति। यत् नीचं अनुदात्तं तत् अनुदात्तमेव भवति। प्रचयस्वरस्थमपि अक्षरं नीचमेव भवति। अग्न आयाहि वीतये। इत्यत्र अग्ने-आ-याहि-वीतये अत्र अ आ इत्यक्षरद्वयमपि आर्चिकपदपाठयोः उदात्तम्। याहि ऋचि स्वरितप्रचयौ पदे अनुदात्तौ । वी एतत् ऋचि पदे च अनुदात्तत्। इत्युदाहरणानि एवं सर्वत्र ऊह्यम्।

पदपाठमधिकृत्यस्वरविशेषमाह-

अयमग्निस्सुतोमित्रमिदं वयमयावहाः ।
प्रियं दूतं घृतंवित्तमभिशब्दश्च नीचतः ।।28।।

एते नीचादारभ्यन्ते उदाहरणानि।

अयम् अग्निः सुतः मित्रं इदं वयं अया, वहाः, प्रियं, दूतं, घृतं, वित्तं,अभि। सर्वे समस्वराः अन्तोदात्ताः अधोनिर्दिष्टानां पदानां स्थलनिर्देशो यथासंख्यम्। पूर्वार्चिके पू.आ इति, उत्तरार्चिके उ.आ इति प्रपाठक, अध्याय, खण्ड ऋक् संख्यानिर्दिष्टाः –

(1-2) पू.आ-1.6.6, (3) उ.आ-10.6.1, (4) पू.आ-1.1.5 , (5) पू.आ-1.7.3, (6) पू.आ-2.4.8 , (7)पू.आ-5.8.7, (8)... . (9) पू.आ-

1.1.5, (10) पू.आ-1.1.3, (11) पू.आ-2.10.3, (12) पू.आ-5.3.9, (13) पू.आ-2.8.4

अर्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च।
शतेषु सपवित्रेषु नीचादुच्चार्यते श्रुतिः।।29।।

अत्र सप्तम्यन्तपदानि तत्तत्प्रकृतिवाचकानि तथा च अर्क सुत इत्यादयः अनुदात्तादारभ्यन्ते इत्यर्थः। नत्वर्केषु इति ग्रहणात्। उदाहरणानि- अर्क्कं अर्चन्तु (पू.आ.2.7.4), सुते सचा (पू.आ.3.5.9) , यज्ञा यज्ञा (पू.आ.1.4.1), कलशम् (पू.आ.6.1.3), शतहिमाः (पू.आ.5.7.8), पवित्र (पू.आ.6.7.12)

हरिवरुणवरेण्येषु धारापुरुषेषु च स्वरति रेफः।
विश्वानरो नकारश्च शेषा न स्वरिता नराः ।।30।।

हरि इत्यादिषु रेफः स्वरितः, विश्वानर इत्यत्र नकारश्च स्वरितः। अवशिष्टाः नरशब्दाः नस्वरिताः। हरिं हिन्वन्ति(पू.आ.3.5.2,6) वरुणः मित्रः (पू.आ.2.10.1) वरेण्यम् तत्सवितुः , धारा सुतस्य (पू.आ.6.2.4) पुरुषः (पू.आ.7.4.3), विश्वानरस्य (पू.आ.4.8.5) मूर्धानमित्यत्र वैश्वानरं इति न स्वरितम्।।

मात्राकालमाह-

मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम् ।
तस्यादितोऽर्धमात्रा वै शेषन्तु परतो भवेत् ।।31।।

ह्रस्वस्य दीर्घस्य वा अक्षरस्य स्वरितस्य, अर्धमात्रा पूर्वं उदात्तानुदात्तसन्धिरूपत्वात् स्वरितस्य, उदात्तभागस्यार्धमात्रा अवशिष्टानुदात्तभागस्य तस्यादित उदात्तमर्धह्रस्वं इति पाणिनिः।

अदीर्घं दीर्घवत् कुर्यात् विस्वरं यत्प्रयुज्यते ।
कम्पोत्स्वरिताभिगीतं ह्रस्वकर्षणमेव च ।।32।।

कम्पादिषु,अदीर्घं एकमात्रं ह्रस्वाक्षरं दीर्घवत् दीर्घाक्षरवत् द्विमात्रयुक्तं कुर्यात्। उदाहरणानि-पाह्यु3तद्वितीयया कम्पः। भूर्भुवस्वः उत्स्वरितं ओइवोइ पन्यया । यं यं यं याम्। अभिगीत ह्रस्वकर्षणे ।

निमेषकालामात्रास्यात् विद्युत्कालेति चापरे।
अक्षिपक्ष्मपातनं निमेषः
तत्कालामात्रा, विद्युत्काला इति केचित्।
सर्वत्रपुत्रमित्रसखिशब्दा अद्रिशतक्रतोरवग्राह्याः।
आदित्यविप्रजातवेदाश्च सत्पतिं गोपतिं वृत्रहासमुद्राश्च।।34
पुत्रमित्रादिशब्दाः सर्वत्र अवगृह्यन्ते।
स्वर्युवोदेवयवश्चारातिं देवतातये ।
चिकितिश्चुक्रुधम् चैव नावगृह्णन्तिपण्डिताः ।।35।।

अरतिमिति न नञ् समासः किन्तु अलंभूषणपर्याप्तवारण इति धातोरुत्पन्नम्। देवतातय इति देवताशब्दात् लिप्रत्ययः तस्य चतुर्थी। चिकितिः चुक्रुध इति चिति धातोः क्रुधू धातोश्च निष्पन्नं रूपं अतः एकपदत्वात् अवग्रहो नास्ति। अच्छावइन्द्रं मतयः स्वर्युवः (पू.आ-4.9.6) मर्मृज्यन्ते देवयवः (उ.आ-16.5) मूर्धानं दिवो अरतिं (पू.आ-1.7.5) उपमान्देवतातये (पू.आ-5.1.1), अचेत्यग्निश्चिकितिः (पू.आ-5.7.1) भूर्णिमृगन्नसवनेषु चुक्रुधम् (पू.आ-4.2.5)।

आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम् ।
यलवेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम् ।।36।।

मकारः रेफे श ष स ह इत्यूष्मसु च प्रत्ययेषु अनुस्वारं आपद्यते। समकारः य ल व इत्येतेषु प्रत्ययेषु परस्य समानं वर्णं आपद्यते।

समकारः स्पर्शेषु प्रत्ययेषु, तत्तत्स्पर्शोत्तमवर्णापत्तिं च लभते। अनुस्वारसंज्ञकं ँ एवमङ्कनम्। उदाहरणानि- रेफस्य मावाँ रातिः मा वाम् रातिः (पू.आ-3.10.5) इति पदपाठः, अत्र वाम् इति मकारस्य रेफे प्रत्यये सन्धौ अनुस्वारः। शकारस्य उद्धँशमिव, षकारस्य हवीँषि, सकारस्य तँ सखायः। हकारस्य त्वँ ह्येहि। यकारस्य त्वँ यविष्ठ, त्वय्यविष्ठ। ल उद्यन् लोकान्, उद्यल्लोकान्, वकारस्य तं वः- तव्वो। स्पर्शेषु उत्तमापत्तिः कं काः- कङ्काः, दूत्यं चरन्- दूत्यञ्चरन्। अग्निम् दूतं - अग्निन्दूतं , अपां फेनेन- अपाम्फेनेन एवमादीनि द्रष्टव्यानि। य ल व इत्यत्र संयुक्तस्य पूर्ववर्णः सानुनासिकः अन्तरः निरनुनासिकः इति अवधेयम्।

नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते ।
आकारं रक्तमित्याहुः नकारेण तु रज्यते ।।37।।

पूर्व आकारपूर्व नकारान्ते पदे परतः स्वरे स्थिते रङ्गः प्रयोक्तव्यः स च आकारः सानुनासिको भवति। नकारेण रज्यते नकारस्थाने रङ्गः प्रयुज्यते। यथा महान् इन्द्रः -महाँ इन्द्रः। बट् महान् असि- बण्महाँ असि।

हृदयादुत्थितोरङ्गः कांस्येन समनिस्वनः ।
मृदुश्चैव द्विमात्रश्च दधन्वां इति निदर्शनम् ।।38।।
यथा सौराष्ट्रिका नारी तक्राँ इत्यभिभाषते ।
एवं रङ्गः प्रयोक्तव्यो नारदस्य मतं यथा ।।39।।

रङ्गः द्विमात्रः कांस्यघट्टनसमध्वनिः मृदुश्च भवति स च ध्वनिः हृदयात् उत्तिष्ठते। यथा दधन्वाँ यो नर्यः इति। अस्य लोकानुभवं प्रदर्शयति सौराष्ट्रदेशीयानारी तक्रविक्रेत्री तक्राँ इति विक्रीणाति तथा रङ्गस्वरः प्रयुज्यते इति।

रङ्गविषये शिक्षान्तरम्-

रङ्गवर्णं प्रयुञ्जीत नग्रसेत्पूर्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत्।। पा.शि-27
हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि।
नासिकायां तदर्धं च रङ्गस्यैव द्विमात्रता।। पा.शि-28

अत्र हृदयादुत्थितः इत्येतावन्मात्रमुक्तं, पाणिनीये तु हृदयमूर्ध नासासु एकार्धार्धमात्रारूपेण द्विमात्रात्मकः प्रयोक्तव्य इति विवेचितम्।। उदात्तादयः स्वराः अचामेव न व्यञ्जनानामित्याह।

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ।
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः ।।40।।
स्वरप्रधानं वैस्वर्यं आचार्याः प्रतिजानते ।
मणिवद्व्यञ्जनं विद्यात् सूत्रवच्चस्वरं विदुः ।।41।।
दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ।
दुर्बलं व्यञ्जनं तद्वत् हरते बलवान् स्वरः ।।42।।

उदात्तः उच्चः, अनुदात्तः नीचः, स्वरितः एते स्वराः स्वरं अजक्षरं आश्रयन्ति व्यञ्जनाक्षरं तु अजक्षरमनुसरति। स्वरः अच् यत्र विरमते तत्रैव व्यञ्जनमपि तिष्ठति न स्वरमतिक्रामति स्वातन्त्र्येण। अग्न आयाहि इति प्रयोगे हि इत्यत्र हकारोत्तर इकारस्य विरामे, हकारोऽपि विरमते। हीऽ234षी इति वैस्वर्येऽपि ईकारस्यैव प्रयोगः न तु हकारस्य। एवमाचार्याः अभिप्रयन्ति। तथा च अयमुदात्तः अयमनुदात्तः इति व्यवहारः अजक्षरस्यैव व्यञ्जनं तु सूत्रप्रोतमणिवत् पराधीनतया वर्तते, स्वरस्य यः उदात्तादिः स एव व्यञ्जनस्य, न तु स्वतन्त्रतया स्वरभाक्त्वम् तस्य। बलवता राष्ट्रपतिना दुर्बलः राजा यथा स्वाभिमतं नीयते तथा स्वतन्त्रेण अजक्षरेण व्यञ्जनं नीयते।

ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ।।43।।

ऊष्मणः विसर्जनीयस्य अष्टविधागतिः अष्टविधपरिणामः। संहितायामितिशेषः। उदाहरणानि-

गृणानः हव्यदातये अत्र नकारोत्तरविसर्जनीयस्य ओभावः गृणानो हव्यदातये इति (पू.आ-1.1)। विवृत्तिः विविक्ततया वर्तनं विश्वस्याः अरातेः- विश्वस्या अरातेः (पू.आ-1.1.6), समिद्धः शुक्रः- समिद्धश्शुक्रः (पू.आ-1.1.4) शकारस्य। ज्योतिः कृणोति- ज्योतिष्कृणोति (पू.आ-4.2.1) षकारस्य। नमः ते -नमस्ते (पू.आ-1.2.1) सकारस्य , अमैः अमित्रं - अमैरमित्रम् (पू.आ-1.2.1) रेफस्य । दिवः ककुत्- दिवःककुत् (पू.आ-1.3.7) महोभिः पाहि - महोभिप्पाहि (पू.आ-1.1.6), जिह्वामूलोपध्मयोः उदाहरणानि। एवमादीनि द्रष्टव्यानि।

प्रथमानूष्म संयुक्तान् द्वितीयानिव दर्शयेत् ।
नचैनान्प्रतिजानीयाद्यथामत्स्यः क्षुरोऽप्सराः ।।44।।

वर्गप्रथमाः वर्णाः शकारादिषु, ऊष्मसु परेषु, द्वितीयवर्ण इव प्रयोक्तव्याः। यथा मत्स्यः अत्र तकारोपरि सकारः वर्तते अतः तकारः थकारसदृशः प्रयुज्यते, न तु थकार एव इव शब्दप्रयोगात् । एवं क्षुरः अप्सराः इत्यादिषु च द्रष्टव्याः। तथा च-

पदान्ताः प्रथमा वर्णाः शषसेषु परेषु तान्।
शौनकोद्धितीयानिच्छेत् प्रकृत्या शाकटायनः।।
अपदान्ताः प्रथमाः वर्णाः ऊष्मसंज्ञे परे स्थिते।
वर्णा द्वितीयाविज्ञेया उच्यन्ते वर्णवेदिभिः। शौ.शि-51

इति ऋग्वेदिनां प्रथमस्य द्वितीयवर्णत्वं नियतं, सामवेदिनान्तु न तथेति ज्ञायते।।

छन्दोमानञ्च वृत्तञ्च पादस्थानं त्रिकारणम् ।
ऋचस्वच्छन्दवृत्तास्तु पादास्त्वक्षरमानशः ।।45।।

पादानां परिज्ञानाय कारणत्रयं भवति छन्दः गायत्र्यादि। मानं अक्षरगणनया वृत्तं आर्यादि तस्य गुरुलघु परिज्ञानेन पादपरिज्ञानम्। ऋचः पादास्तु अक्षरप्रमाणेन भवन्ति। अष्टाक्षरा एकादशाक्षरा इत्यादि।

स्वरभक्तिर्द्विविधात्वृकारो रेफ एव च ।
स्वरोदा व्यञ्जनोदा च विहिताक्षरचिन्तकैः ।।46।।

ऋकारः स्वरोदास्वरभक्तिः, रेफः व्यञ्जनोदा स्वरभक्तिः इति द्विविधा स्वरभक्तिः। स्वरादुदेतीति प्रथमा स्वरोदा ऋकारः, व्यञ्जनादुदेतीति व्यञ्जनोदा, द्वितीया रेफः।।

शषसेषु स्वरोदा या हकारे व्यञ्जनोदया।
शषसेषु विवृत्तान्तु हकारे संवृतां विदुः।।

श ष स इत्येतेषु परेषु या स्वरभक्तिः सा स्वरोदा । हकारे परे या सा व्यञ्जनोदा सैव व्यञ्जनोदया ।।

ऋवर्णतुल्यतां याति रेफः शषसहोर्ध्वगः इति स्वरभक्तेरुच्चारणं ऋवर्णवत् कार्यम्। अदर्शि अर्षासोम तर्ह्यारोहन्ति इत्यादि पदानां स्वरनिर्णयमाह।

अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम्-

अन्तोदात्तं आद्युदात्तमुदात्तमनुदात्तन्नीचस्वरितम्।
मध्योदात्तं स्वरितं द्विरुदात्तमित्येता अष्टौ पदसंज्ञकाः।।47।।

पदपाठे पदानां अष्टप्रकारत्वमेव। उदाहरणानि-

अग्निर्वृत्राणि इत्यत्र अग्निः अन्तोदात्तः । सोमः पवते इत्यत्र सोमः आद्युदात्तः। प्रवोयह्वं इत्यत्र, प्र - उदात्तः, वः- अनुदात्तः बलंन्युब्जवीर्यम् अत्र वीर्यमिति नीचस्वरितम्। अग्नआयाहिवीतये अत्र वीतये अत्र वीतये मध्योदात्तम्। भूर्भुवः स्वः अत्र स्वः स्वरितम्। वनस्पतिः अत्र व स्प इति द्वे उदात्ते अतः द्विरुदात्तं पदम्, एवं द्रष्टव्यानि।

अध्यापकस्य नियममाह –

पञ्चविधमाचार्यकं नाम मुखं न्यासः करणं प्रतिज्ञानोच्चारणे।
अत्रोच्यते श्रेयः खलु प्रतिज्ञानोच्चारणे ।।48।।

आचार्यकं अध्यापनार्हत्वम् पञ्चविधं पञ्चप्रकारगुणत्वम्। यथा मुखं हस्ताग्रे दृष्टिनिवेशनादि न्यासः स्वाङ्गुलीषु स्वरनिर्देशः। करणं शिक्षाशास्त्रपरिज्ञानम्। प्रतिज्ञा गुरुपरम्परागतमन्त्रस्वरुपावधारणम्। उच्चारणं लक्षणागमानुसारेण प्रयोगः मन्त्राणाम्।

यत्र लक्षणं नोपलभ्यते तत्रागमानुसारेण प्रयोगः कर्तव्यः इत्याह श्रेयः खलु प्रतिज्ञानोच्चारणे इति। एतदेव विशदयति।

यस्य कस्यचिद्वर्णस्य करणं नोपलभ्यते।
प्रतिज्ञा तत्र बोद्धव्या करणं हि तदात्मकम्।।49।।

यस्य करणं शिक्षाशास्त्रं न ज्ञायते तत्र विषये आगमानुसारेण प्रयोगः कर्तव्यः। पूर्वसिद्धस्य लक्षस्यैव परम्पराऽगतस्य लक्षणं स्वरवर्णोच्चारणादीनां सम्प्रदाय संरक्षणाय पूर्वाचार्यैः कृतम्। लोकसिद्धानां शब्दानां संरक्षणाय रचितं व्याकरणमिव। अतः लक्ष्यानुसारित्वाल्लक्षणस्य लक्ष्ये यथा सम्प्रदायं अवधानं

कर्तव्यमित्याह करणं हि तदात्मकम् इति। महर्षिणामपि लक्षणस्य परिपूर्णस्य दुर्ज्ञेयत्वमाह।

तुम्बुरु नारद वसिष्ठ विश्वावस्वादयश्च गन्धर्वाः।
सामसु निभृतं करणं स्वरसौक्ष्म्यात् तेऽपि हि न कुर्युः।।50।।

तुम्बुरु प्रभृतयः सामवेदीयस्वराणां बाहुल्यात् अतिसूक्ष्मत्वाच्च निभृतं परिपूर्णं करणं लक्षणशास्त्रं नैव विदन्ति गुरुपरम्परानुसारेण संरक्षन्तीत्यर्थः।।

शिष्याचार्यानुष्ठेयान् बहून् नियमानुक्त्वान्तेवर्णोच्चारण विषये अवधानमावश्यकमित्याह-

यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभिर्नचपीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।51।।

एवं वर्णाः प्रयोक्तव्याः नाव्यक्ता न च पीडिताः।
सम्यक् वर्णप्रयोगेण ब्रह्मलोके महीयते।।52।।

यथा व्याघ्रीबिडाली वा स्वीयान् पुत्रान् नयनानयनकाले दंष्ट्राभिः न पीडयेत् मृदुतया ग्रहणे अधःपतेत् कठिनतया ग्रहणे पीडनं स्यात् अतः भयेनजागरुकतया गृह्णाति तद्वत् अतिमार्दवं काठिन्यं च हित्वा सम्यक् वर्णाः प्रयोक्तव्याः। स्थानकरणादीन् ज्ञात्वा सुस्वरं वर्णानां प्रयोगेण ब्रह्मलोके महीयते तत्रत्यैर्वेदपुरुष प्रसादात्।।

इति नारदशिक्षासंग्रहः

श्लोकानुक्रमणिका

आधारग्रन्थाः

१. नारदीयशिक्षा, श्रीपीताम्बरपीठसंस्कृतपरिषद, दतिया, मध्यप्रदेशः, 1964
२. नारदीयशिक्षा, सत्यव्रतसामश्रमी , कोलकत्ता , 1947
३. नारदीयशिक्षा, श्रीनारायणस्वामीदीक्षितः, मैसूर 1949
४. नारदीयशिक्षा, शिवराज आचार्यः कौण्डिन्न्यायन, चौखम्बा विद्याभवन,वारणासी, 2008
५. त्रयी परिचयः, सत्यव्रतसामश्रमी , कोलकत्ता,1893
६. ऋग्वेदप्रातिशाख्यम्, डा वीरेन्द्रकुमार वर्मा , चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली,1999
७. सामवेदसंहिता, पण्डित श्रीपाद दामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी, 1956
८. सामवेदः, श्रीराममूर्तिश्रौति, श्रृङ्गेरी,, 1998
९. अथर्ववेदीया माण्डूकीशिक्षा, पण्डित भगवद्दत्तः, मेहरचन्द लछमनदास पब्लिकेशन्स, नईदिल्ली, 2009
१०. ऋक्तन्त्रम्, डा सूर्यकान्तः, मेहरचन्द लछमनदास,दिल्ली, 1970
११. लघुऋक्तन्त्रसंग्रहः, डा सूर्यकान्तः, लाहौरः, 1940
१२. सामतन्त्रम्, ए.एस्, रामनाथदीक्षितः, काशीहिन्दुविश्वविद्यालयः, वारणासी, 1961
१३ स्तोभभाष्यम्,अक्षरतन्त्रम्,म.रामनाथदीक्षितः,मद्रासः, 1984
१४. पञ्चविधसूत्र, मात्रालक्षणम्, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति, 1970
१५. वैयाकरणसिद्धान्तकौमुदी. भट्टोजी दीक्षितः, चौखम्बा सुरभारती प्रकाशन, वारणासी, 1987
१६. शिक्षासंग्रहः, वारणासी, 1893

सामगानस्वरमण्डलम्

वेणुगाने

स्वरसंख्या	स्वरसंज्ञा	हस्तस्वरः	आर्चिकस्वरः	स्थानः
1	प्रथमः[1]	अङ्गुष्ठः [2]	स्वरितः[3]	मध्यमः [4]
2	द्वितीयः	तर्जनी (प्रदेशिनी)	उदात्तः	गान्धारः
3	तृतीयः	मध्यमा	अनुदात्तः	ऋषभः
4	चतुर्थः	अनामिका	स्वरितः	षड्जः
5	मन्द्रः	कनिष्ठिका	उदात्तः	निषादः
6	अतिस्वार्यः	कनिष्ठिका अधस्वरः	अनुदात्तः	धैवतः
7	क्रुष्टः	अङ्गुष्ठस्योत्तमः	स्वरितः	पञ्चमः

1. ना.शि-1.2.5, 2.ना.शि-1.7.3, 3. ना.शि-1.8.8, 4.ना.शि- 1.2.5,1.5.1,2

सर्वे जीवा इमानेव सप्तस्वरानुपजीवन्तीति सामविधानब्राह्मणे निरूपितम्- साम्नः तं देवा उपजीवन्ति। योऽवरेषां प्रथमस्तं मनुष्याः, यो द्वितीयस्तं पञ्चमस्तमसुररक्षाँसि। योऽन्त्यस्तमोषधयो वनस्पतयो यच्चान्यज्जगदिति। अ

सङ्केतः	प्राणिध्वनिः	स्वरोत्पत्तिः	अधिष्ठान देवताः	तृप्तदेवताः
म	क्रौञ्चः[5]	नाभिः,उरः,[6] हृदयः,नाभिः	सोमः[7]	मनुष्याः[8]
ग	अजा	नाभिः,कण्ठः शीर्षः, नासिका	गौः	पशवः
रे	गौः	नाभिः,कण्ठः,शीर्षः	हुताशनः	गन्धर्वः अप्सरसः
स	मयूरः	नासिका,कण्ठः, जिह्वा,तालु, उरः, दन्तः	ब्रह्मा	अण्डजाः पितरः
नि	कुञ्जरः	सर्वस्थानानि	आदित्यः	पिशाचाः असुराः,राक्षसाः
ध	अश्वः	सर्वस्थानानि	ब्रह्मा	स्थावरं जङ्गमम्
प	कोकिलः	नाभिः,उरः, हृदयः,कण्ठः,शिरः	सोमः	देवाः

5. ना.शि-1.5.3,4 6. ना.शि-1.5.7-12 7. ना.शि-1.5.15-19 8. ना.शि-1.7.6,7,8

स वा इदं विश्वं भूतमसृजत। तस्य सामोपजीवनं प्रायच्छत्। तद्योऽसौ क्रुष्टतम इव गन्धर्वाप्सरसः, यस्तृतीयस्तं पशवः, यश्चतुर्थस्तं पितरो ये चाण्डेषु शेरते। यः त्र मन्द्रातिस्वार्ययोःपञ्चमान्त्यत्वेन निर्देशः कृतः।

राणायनीयसंशोधनाप्रतिष्ठानम्, तिरुपति

1. सामवेदराणायनीयम् वर्गपरिभाषाधारितवेयगानम् प्रथमो भागः Rs-200
2. सामवेदराणायनीयम् वर्गपरिभाषाधारितवेयगानम् प्रथमो भागः Rs-200
3. गौतमीयापरसूत्रप्रकाशः - Rs-100
4. फुल्लपोतम् (गणेशपण्डितकृत व्याख्यासहितम्) Rs-300
5. नारदीयशिक्षा एवं नारदशिक्षासंग्रहः। Rs-125